श्रेयोमार्गस्य संसिद्धिः प्रसादात्परमेष्ठिनः ।
इत्याहुस्तद्गुणस्तोत्रं शास्त्रादौ मुनिपुंगवाः ॥

यद्यपि विमलोयोगी छिद्रान्पश्यति मेदिनी
तथापि लौकिकाचारं मनसापि न लंघयेत् ॥

प्रायेण गुरुजनशीलमनुचरंति शिष्याः ।
विघ्नौघाः प्रलयं यान्ति शाकिनीभूतपन्नगाः ।
विषं निर्विषतां याति स्तूयमाने जिनेश्वरे ॥१

श्लोक. चिंता चिता समाख्याता बिन्दुमात्र विशेषतः
सजीवं दहती चिंता निर्जीवं दहति चिता १

दो. नरराची मैं नालखोतें कोल खो प्रयान
पढ नवाज़ बौरा भया नहिं जानो रहमान १

दो. कला बहत्तर पुरुष में तिन में दो सरदार
एक जीव की जीविका एक जीव उद्धार २

॥ श्रीः ॥

श्रीमच्छर्ववर्मजैनाचार्यप्रणीतं

कातन्त्रव्याकरणम् ॥

श्रीमद्भावसेनत्रैविद्यदेवविरचितरूपमाला-
प्रक्रियासहितम् ।

बडोदामण्डलान्तर्गतब्राह्मणग्राममधि-
वसता सम्प्रतिमुम्बापुरीवास्तव्येन 'रैक'
(रायकवाल) लल्लुरामात्मज-
जीवरामशास्त्रिणा
संशोधितम् ।

तच्च
मुम्बय्यां
निर्णयसागराख्ययन्त्रालये
हीराचन्द्रनेमिचन्द्रश्रेष्ठिना
प्रकाशितम्

संवत् १९६२ ।

मूल्यमेकं रूप्यकम् ।

इस पुस्तकके मिलनेके ठिकाने ।

पी. एल. जे. मेनेजर.

देशहितैषीपुस्तकालय मुम्बई

पो. गिरगांव

पण्डित ज्येष्ठाराम मुकुन्दजीपुस्तकालय

ठि. कालिकादेवीरोड नं. ३५३ मुम्बई.

प्रस्तावना ।

इह खलु पण्डितरत्नमण्डिते निखिलेऽपि भारतवर्षे सिद्धान्तकौमुदीप्रभृत्यनेकानि व्याकरणानि मुद्रितानि परं तेषामतीव दुरूहत्वात्सारस्वतप्रभृतीनामनार्षत्वान्न तेषु सुकुमारमतिकुमाराणां विदुषां च प्रवृत्तिर्भवति, अतस्तेषामनायासेन यत्किञ्चिद् व्याकरणपदार्थज्ञानप्रकाशकं कौमारमित्यपरनाम्ना प्रसिद्धं श्रीमद्भावसेनत्रैविद्यदेवविरचितं रूपमालासहितं शर्ववर्माचार्यविरचितं कातन्त्राख्यव्याकरणमेव वर्त्तते । तत्तु प्राचीनतरमत एव वङ्गप्रभृतिदेशेषु कुमाराः सिद्धो वर्णसमाम्नाय इत्यस्य व्याकरणस्य प्रथमादिसूत्रमद्यापि पठन्ति पाठयन्ति च गुरवः । रूपमालासहितमिदमतीव दुष्प्राप्यं परन्तु पुण्यपत्तनस्थराजकीयपुस्तकालयात्संप्राप्तम् । तच्च श्रवणवेलगुलग्रामस्थजयरावनेनारद्वारा न्यूनाधिकदोषपरिहाराय श्रीमद्ब्रह्मसूरिशास्त्रिणां दृष्टिगोचरमपि कारितम् । किञ्चास्य शोधनमप्येतद्ग्रन्थस्थनियमानुसारेण कृतं । यथा " **विरामे वा** " इति सूत्रेण पदान्ते वर्त्तमानस्य मकारस्यानुस्वारविधिः । देवं । देवम् । न दृश्यतेऽयमितरव्याकरणेषु । सर्वव्याकरणापेक्षया अस्य क्रमोऽपि भिन्नः यथा सर्वत्र शतृ प्रत्ययः अत्र तु शन्तृङ् प्रत्यय एवं भिन्नैव रीतिः । किञ्च कुमाराणां स्पष्टप्रतिपत्तये पृथक्पदे पदान्तरेण सह सन्धिनियमोऽपि नादृतः । यद्यप्यस्य पुस्तकस्य पुस्तकान्तराभावाल्लेखनीदोषाद्वा यत्र कुत्रापि स्खलितं तत्तु शोधनपत्रे सम्यक्तया निवेशितं तथाप्येतद्ग्रन्थमुद्रणे प्रयत्नमधिगतस्यापि मम मतिमांद्याद्दृष्टिदोषात्प्रमादाद्वा समुत्पन्नाननल्पानप्यवद्यानुपेक्ष्य गुणैकपक्षपातिनो निर्मत्सरा विद्वांसस्तोषमेष्यन्ति, निष्पक्षपाततयाऽस्य योग्यतामवलोक्य स्वकीयपाठशालासु प्रवृत्तिं नेष्यन्ति भविष्यन्ति च परमेश्वरानुग्रहात्सफलसमीहिता इति भृशमाशास्ते ।

आषाढ कृष्णैकादशी
वि० स० १९९२.

विदुषा मनुचरो—
रैक्क (रायकवाल)
लल्लुरामात्मजो जीवरामशास्त्री.

भूमिका ।

विदित हो कि प्रवृत्तिमें दृष्टिगोचर समस्त व्याकरणोंमें श्रीमच्छर्ववर्मदिग-म्बरजैनाचार्य्यकृत कातन्त्रव्याकरण ही जिसके 'कलाप' कौमार आदिभी नामान्तर हैं, अत्यन्त सरल है। इसके मूलपाठकी प्रवृत्ति बंगाल आदि देशोंमें बहुतदिनोंसे अशुद्धस्वरूपसे पाई जाती है। तथा इसकी टीकायें भी कितनेही प्राचीन आचार्य्योंने रची हैं जिनसे कि इसकी प्राचीनता सिद्ध होती है। वर्त्तमान समयमें इस ग्रन्थकी प्रवृत्ति न होनेमें मुख्य कारण यही दीखता है कि, इसकी जितनी टीकायें प्रसिद्ध हुई वे सब सूत्र क्रमानुसार हैं और आजकल बुद्धिकी मन्दता तथा अन्य व्याकरणोंकी प्रक्रियारूप टीकायें दीखती हैं, इसकारण बालकोंकी प्रवृत्ति उनहीमें होगई। हमने इस व्याकरणकी नवीन प्रक्रिया बनाकर प्रसिद्ध करनेका विचार कियाथा परन्तु सर्व साधारणके भाग्योदयसे बड़े परिश्रमके साथ पूनाकी सरकारी पुस्तकालयमेंसे श्रीमद्भावसेनत्रैविद्यदेवकृत कातन्त्ररूप-माला नामा प्रक्रियारूप टीका प्राप्त हुई, जिसकी सरलता और उत्कृष्टता ग्रन्थावलोकनाधीनही है। ऐसे मन्द बुद्धियोंके लिये अत्यन्त उपयोगी समझकर छपाया है इस ग्रन्थमें " **विरामे वा** " ऐसा विशेष सूत्र है जिसके अनुसार पदान्तका मकार विकल्पसे अनुस्वार होता है। इस कारण इस ग्रन्थमें कहीं२ पदान्तमकारको अनुस्वार कर दिया है। और लेखनी तथा प्रमाददोष और शीघ्रताके कारण दूसरी प्रति न मिलनेसे जहां कहीं अशुद्धियें रह गई हैं वे अशुद्धियां शुद्धिपत्रद्वारा ठीक करदी हैं। तथापि कहीं अशुद्धि रहगई हो तौ विद्वज्जन क्षमा करैं। और कालेज तथा पाठशालाओंके अध्यक्ष महाशयोंसे यह प्रार्थना है कि निष्पक्षतासे इसकी योग्यताको अवलोकनकर अपनी २ पाठशालाओंमें पढावैं और देशमें संस्कृत विद्याको सहजहीमें बढावैं॥

आषाढ कृष्णैकादशी.
सम्वत् १९९२ वि०

ह० रैक (रायकवाल)
शास्त्री जीवराम ललुराम अध्यापक
दिगम्बर जैनपाठशाला.
मुम्बई.

ॐ नमः सिद्धेभ्यः ।

अथ

कातन्त्ररूपमालाव्याकरणम् ।

मङ्गलाचरणम् ।

[1]वीरं प्रणम्य सर्वज्ञं विनष्टाशेषदोषकम् ।
कातन्त्ररूपमालेयं बालबोधाय कथ्यते ॥ १ ॥
नमस्तस्यै [2]सरस्वत्यै विमलज्ञानमूर्त्तये ।
विचित्रालोकयात्रेयं यत्प्रसादात्प्रवर्त्तते ॥ २ ॥
नमो वृषभसेनादिगौतमान्त्यगणेशिने ।
मूलोत्तरगुणाढ्याय सर्वस्मै मुनये नमः ॥ ३ ॥
गुरुभक्त्या वयं सार्द्धद्वीपद्वितयवर्त्तिनः ।
वन्दामहे त्रिसङ्ख्योननवकोटिमुनीश्वरान् ॥ ४ ॥

---

१ वि विशिष्टां ई लक्ष्मीं राति ददातीति वीरः । अथवा विशेषेण ईर्ते सर्वान् सकलपदार्थान् जानातीति वीरः । वि विशिष्टा इरा वाक् दिव्यध्वनिर्यस्यासौ वीरः । अथवा वि विशिष्टा इरा अष्टमपृथ्वी यस्यासौ वीरः । अथवा वीरयतीति वीरः कामराजयमराजमोहराजान् निराकरोतीति वीरः । वि विशिष्टा ईरा गगनगमनं यस्यासौ वीरः तं प्रणमनं पूर्वं पश्चात्किंचिदिति प्रणम्य ॥ सर्वं जानातीति सर्वज्ञः सर्वान् सकलपदार्थान् क्रमकरणव्यवधानराहित्येन युगपत् जानातीति सर्वज्ञः ॥ नश्यंतिस्म नष्टाः । वि विशेषेण नष्टाः विनष्टाः । अशेषाश्च ते दोषाश्च अशेषदोषाः विनष्टाः अशेषदोषाः येनासौ विनष्टाशेषदोषकः तम् । कु ईषत्तन्त्रं कातन्त्रं रूपाणां माला रूपमाला कातन्त्रस्य रूपमाला कातन्त्ररूपमाला ॥ २ सरः प्रसरणं सर्वज्ञानमया मूर्त्तिरस्या अस्तीति सरस्वती तस्यै । विगतं मलं यस्मात्तद्विमलं । ज्ञायतेऽनेन इति ज्ञानं विमलं च तत् ज्ञानं च विमलज्ञानं । विमलज्ञानमेव मूर्त्तिर्यस्याः सा विमलज्ञानमूर्त्तिः तस्यै ॥

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ ५ ॥

अथ संज्ञासन्धिः ।

सिद्धो वर्णसमाम्नायः ॥ १ ॥ सिद्धः[1] खलु वर्णानां समाम्नायो[2] वेदितव्यः । ते के,– अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ । क ख ग घ ङ । च छ ज झ ञ । ट ठ ड ढ ण । त थ द ध न । प फ ब भ म । य र ल व । श ष स ह इति ।

तत्र चतुर्दशादौ स्वराः[3] ॥ २ ॥ तस्मिन् वर्णसमाम्नाये आदौ ये चतुर्दश वर्णास्ते स्वरसंज्ञा भवन्ति । ते के,– अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ इति ।

दश समानाः ॥ ३ ॥ तस्मिन् वर्णसमाम्नाये आदौ ये दश वर्णास्ते समानसंज्ञा भवन्ति । ते के,– अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ इति ।

तेषां द्वौ द्वावन्योऽन्यस्य सवर्णौ ॥ ४ ॥ तेषां समानानां मध्ये द्वौ द्वौ वर्णावन्योऽन्यस्य परस्परं सवर्णसंज्ञौ भवतः । अ-आ इई उऊ ऋॠ ऌॡ । तेषां ग्रहणं किमर्थं । द्वयोर्ह्रस्वयोर्द्वयोर्दीर्घयोश्च सवर्णसंज्ञार्थम् ।

श्लोकः ।

क्रमेण वैपरीत्येन लघूनां लघुभिः सह ।
गुरूणां गुरुभिः सार्धं चतुर्धेति सवर्णता ॥ १ ॥

---

१ अनादिकालेन प्रवृत्त इत्यर्थः । सिद्धशब्दः अनित्यार्थो वा निष्पन्नार्थो वा प्रसिद्धार्थो वा कांपिल्ये सिद्धस्थित इत्यत्र सिद्धशब्दोऽनादिमङ्गलवाची ॥
२ सम्यगाम्नायन्ते अभ्यस्यन्ते इति समाम्नायाः । श्लोकः । व्यञ्जनानि त्रयस्त्रिंशत्स्वराश्चैव चतुर्दश ॥ अनुस्वारो विसर्गश्च जिह्वामूलीय एवच ॥ १ ॥ गजकुम्भाकृतिर्वर्णः प्लुतश्च परिकीर्तितः ॥ एवं वर्णास्त्रिपञ्चाशन्मातृकाया उदाहृताः ॥ २ ॥ ३ स्वयं राजन्त इति स्वराः ॥

ऋकारलृकारौ च ॥ ५ ॥ ऋकारलृकारौ च परस्परं सवर्णसंज्ञौ भवतः । ऋलृ ।

पूर्वो ह्रस्वः[1] ॥ ६ ॥ तयोः सवर्णसंज्ञयोर्मध्ये पूर्वो वर्णो ह्रस्वसंज्ञो भवति । अ इ उ ऋ लृ ॥

परो दीर्घः[2] ॥ ७ ॥ तयोः सवर्णयोर्मध्ये परो वर्णो दीर्घसंज्ञो भवति । आ ई ऊ ॠ ॡ ॥

स्वरोऽवर्णवर्जो नामि ॥ ८ ॥ अवर्णवर्जः स्वरो नामिसंज्ञो भवति । इई उऊ ऋॠ लृॡ एऐ ओऔ ॥ वर्णग्रहणे सवर्णग्रहणं। कारग्रहणे केवलग्रहणम् ।

एकारादीनि सन्ध्यक्षराणि ॥ ९ ॥ एकारादीनि स्वरनामानि सन्ध्यक्षरसंज्ञानि भवन्ति । तानि कानि ए ऐ ओ औ ॥

नित्यंसन्ध्यक्षराणि दीर्घाणि ॥ १० ॥ सन्ध्यक्षराणि नित्यं दीर्घाणि भवन्ति ।

कादीनि व्यञ्जनानि[3] ॥ ११ ॥ ककारादीनि हकारपर्य्यन्तान्यक्षराणि व्यञ्जनसंज्ञानि भवन्ति । क ख ग घ ङ । च छ ज झ ञ । ट ठ ड ढ ण । त थ द ध न । प फ ब भ म । य र ल व । श ष स ह[4] ॥

ते वर्गाः पञ्च पञ्च पञ्च ॥ १२ ॥ ते ककारादयो मावसाना वर्णाः पञ्च पञ्च भूत्वा पञ्चैव वर्गसंज्ञा भवन्ति । क ख ग घ ङ । च छ ज झ ञ । ट ठ ड ढ ण । त थ द ध न । प फ ब भ म ॥

वर्गाणां प्रथमद्वितीयाः शषसाश्चाघोषाः[5] ॥१३॥ वर्गाणां प्रथमद्वितीया वर्णाः शषसाश्चाघोषसंज्ञा भवन्ति । कख चछ टठ तथ पफ श ष स ॥

---

१ ह्रस्यते एकमात्रतया उच्चार्यत इति ह्रस्वः ॥ २ दृणाति विदारयति द्विमात्रतया मुखबिलमिति दीर्घः ॥ ३ व्यज्यन्ते अकारादिभिः पृथक्क्रियन्ते इति व्यञ्जनानि अथवा विगतः अञ्जनः स्वरलेपोयेभ्यः इति व्यञ्जनानि ॥ ४ ककारादीनामकार उच्चारणार्थः ॥ ५ घोषोध्वनिर्न विद्यते येषां ते अघोषाः ॥

घोषवन्तोऽन्ये ॥ १४ ॥ अघोषेभ्योऽन्ये तृतीयचतुर्थपञ्चमा वर्णा यरलवहाश्च घोषवत्संज्ञा भवन्ति । गघङ जझञ डढण दधन बभम यरलव ह इति ॥

अनुनासिका ङञणनमाः ॥ १५ ॥ अनु पश्चान्नासिकास्थानमुच्चारणं येषां ते अनुनासिकाः । ङञणनमाः वर्णा अनुनासिकसंज्ञा भवन्ति । ङञणनम इति ॥

अन्तस्था यरलवाः ॥ १६ ॥ अन्ते तिष्ठन्तीत्यन्तस्थाः यरलवा इत्येते वर्णा अन्तस्थसंज्ञा भवन्ति ॥ यरलव ॥

ऊष्माणः शषसहाः ॥ १७ ॥ उष्म उष्णं धर्ममुत्पादयन्तीति । शषसहा इत्येते वर्णा ऊष्मसंज्ञा भवन्ति । शषसह ।

अः इति विसर्जनीयः ॥ १८ ॥ येन विना यदुच्चारयितुं न शक्यते स उच्चारणार्थो भवति । अकार इहोच्चारणार्थः । यथा कादिषु । कुमारीस्तनयुगलाकृतिवर्णो विसर्जनीयसंज्ञो भवति ।

श्लोकः ।

शृङ्गवद्बालवत्सस्य कुमारीस्तनयुग्मवत् ॥
नेत्रवत्कृष्णसर्पस्य विसर्गो[१]ऽयमिति स्मृतः ॥ १ ॥

ᳵक इतिजिह्वामूलीयः[२] ॥१९॥ ककार इहोच्चारणार्थः । वज्राकृतिवर्णो जिह्वामूलीयसंज्ञो भवति । ᳵक ॥

ᳶप इत्युपध्मानीयः[३] ॥ २० ॥ पकार इहोच्चारणार्थः । गजकुम्भाकृतिवर्ण उपध्मानीयसंज्ञो भवति । ᳶप ॥

---

१ विसृज्यते विरम्यते येन सः विसर्गः ॥ २ जिह्वामूले भवः जीह्वामूलीयः ॥
३ उप समीपे ध्मायते शब्दायते इति उपध्मानीयः ॥

अं इत्यनुस्वारः ॥ २१ ॥ अकार इहोच्चारणार्थः । बिन्दुमात्रो वर्णोऽनुस्वारसंज्ञो भवति ॥ अं ।

लोकोपचाराद्ग्रहणसिद्धिः ॥२२॥ लोकानामुपचारो व्यवहारः । तस्मादिहानुक्तस्यापि ग्रहणस्य शब्दस्य सिद्धिः प्रवृत्तिर्वेदितव्या । तत्कथं? त्वया ग्रामो गम्यते इत्युक्तेस्त्वं ग्रामाय गच्छसीत्यर्थः ।

इति संज्ञासन्धिः ।

अथ स्वरसन्धिरुच्यते ।

कः सन्धिः । पूर्वोत्तरवर्णानामव्यवधानेन परस्परेण सन्धानं संश्लेषः सन्धिः ॥ तव अभ्युदयः । कान्ता आगता । दधि इदम् । नदी ईहते । वसु उभयोः । वधू ऊढा । पितृ ऋषभः । मातॄ ॠकारेण । कॢ ऌकारः । कॣ ॡकारेण । इति स्थिते ।

अनतिक्रमयन्विश्लेषयेत् ॥ २३ ॥ संघटितान्वर्णान् अनतिक्रमयन् विश्लेषयेत् इति विश्लेष्यः ॥

समानः सवर्णे दीर्घीभवति परश्च लोपम् ॥२४॥ समानसंज्ञको वर्णो दीर्घीभवति सवर्णे परे परश्च लोपमापद्यते । सर्वत्र ह्रस्वो दीर्घः । स्वभावतो ह्रस्वाभावे परलोपः ।

श्लोकः ।

अदीर्घो दीर्घतां याति नास्ति दीर्घस्य दीर्घता ।
पूर्वं दीर्घस्वरं दृष्ट्वा परलोपो विधीयते ॥ १ ॥

व्यञ्जनमस्वरं परवर्णं नयेत् ॥ २५ ॥ अस्वरं व्यञ्जनं

---

१ अन्तमनुसृत्य संलीन उच्चार्यते स्वर्यत इति अनुस्वारः ॥ २ व्यवहारो नाम शब्दप्रयोगः ॥ ३ कालकारकसंख्यासाधनोपगृह्यभेदात् भिन्नमर्थं शपतीति शब्दः ॥ ४ पूर्वोत्तरवर्णानामविरामेणोच्चारणं सन्धानमिति च पुस्तकान्तरे ॥

परवर्णं नयेत् । तवाभ्युदयः । कान्तागता । दधीदम् । नदीहते । वसूभयोः । वधूढा । पितृषभः । मातृकारेण । कॄकारः । कॄकारेण । इति सिद्धं पदम् ॥ एवं होतृकारः । होतृ ऋकारः । इति विग्रहः । अत्र समानः सवर्णे दीर्घो भवति इत्यादिना दीर्घत्वम् । होतृ ऋकार इति स्थिते ।

ऋति ऋतोर्लोपो वा ॥ २६ ॥ ऋति परे ऋतोर्लोपो वा भवति । होतृकारः । देव इन्द्रः । कान्ता इयम् । इति स्थिते ।

अवर्ण इवर्णे ए ॥ २७ ॥ इवर्णे परे अवर्ण ए भवति परश्च लोपमापद्यते । वर्णग्रहणे सवर्णग्रहणम् । देवेन्द्रः । कान्तेयम् ॥ हल ईषा । लाङ्गल ईषा । इति स्थिते ।

हललाङ्गलयोरीषायामस्य लोपः ॥ २८ ॥ हललाङ्गलयोरस्य लोपो भवति ईषायां परतः । हलीषा । लाङ्गलीषा ॥ मनस् ईषा । इति स्थिते ।

मनसः सस्य च ॥ २९ ॥ मनसोऽस्य सस्य च लोपो भवति ईषायां परतः । मनीषा ॥ गन्ध उदकम् । माला ऊढा । इति स्थिते ।

उवर्णे ओ ॥ ३० ॥ उवर्णे परे अवर्ण ओ भवति परश्च लोपमापद्यते । गन्धोदकम् । मालोढा ॥ तव ऋकारः । सा ॠकारेण । इति स्थिते ।

ऋवर्णे अर् ॥ ३१ ॥ ऋवर्णे परे अवर्ण अर् भवति परश्च लोपमापद्यते । पूर्वव्यञ्जनमुपरि परव्यञ्जनमधः ॥

रेफाक्रान्तस्य द्वित्वमशिटो वा ॥ ३२ ॥ रेफाक्रान्तस्य वर्णस्य द्वित्वं भवत्यशिटो वा ।

श्लोकः ।

तुंबुरुं तृणकाष्ठं च तैलं जलमुपागतम् ॥
स्वभावादूर्ध्वमायाति रेफस्यैतादृशी गतिः ॥ १ ॥
इति जलतुम्बिकान्यायेन रेफस्योर्ध्वगमनं ।

शिडिति शादयः ॥ ३३ ॥ शषसहा वर्णाः शिट्संज्ञा भवन्ति। तवक्लारः । सक्लारेण॥ ऋण ऋणम्। प्र ऋणम्। वसन ऋणम्। वत्सतर ऋणम्। कम्बल ऋणम्। दश ऋणम्। इति स्थिते।

ऋणप्रवसनवत्सतरकम्बलदशानामृणेऽरो दीर्घः ॥ ३४ ॥ ऋणादीनां अरो दीर्घो भवति ऋणे परे। एकदेशविकृतमनन्यवत्। ऋणार्णम्। प्रार्णम्। वसनार्णम्। वत्सतरार्णम्। कम्बलार्णम्। दशार्णम्॥ शीत ऋतः। दुःख ऋतः इति स्थिते।

ऋते च तृतीयासमासे ॥ ३५ ॥ तृतीयासमासे अरो दीर्घो भवति ऋते च परे। शीतेन ऋतः शीतार्तः। दुःखेन ऋतः दुःखार्तः। तृतीयासमास इति किम्। परमश्चासौ ऋतश्च परमर्तः॥ तव लृकारः। सा लृकारेण। इति स्थिते।

लृवर्णे अल् ॥ ३६ ॥ लवर्णे परे अवर्ण अल् भवति परश्च लोपमापद्यते। तवल्कारः सल्कारेण॥ तव एषा। सा ऐन्द्री। इति स्थिते॥

एकारे ऐ ऐकारे च ॥ ३७ ॥ एकारे ऐकारे च परे अवर्ण ऐर्भवति परश्च लोपमापद्यते। तवैषा। सैन्द्री॥ स्व ईरम्। स्व ईरिणी। स्व ईरी इति स्थिते।

स्वस्यैररिणीरिषु ॥ ३८ ॥ स्वस्याकारस्य ऐत्वं भवति ईरईरिणीईरिषु परतः परश्च लोपमापद्यते। स्वैरम्। स्वैरिणी। स्वैरी॥ अद्य एव। इह एव। इति स्थिते।

एवे चानियोगे नित्यम् ॥ ३९ ॥ अनियोगेऽवर्णस्य नित्यं लोपो भवति एवे च परे। अद्येव। इहेव। नियोगे तु अद्यैव गच्छ। इहैव तिष्ठ॥ तव ओदनम्। सा औपगवी। इति स्थिते।

ओकारे औ औकारे च ॥ ४० ॥ ओकारे औकारे च परे अवर्ण और्भवति परश्च लोपमापद्यते। तवौदनम्। सौपगवी॥ "चकाराधिकारादुपसर्गावर्णलोपो धातोरेदोतोः। प्र एलयति प्रेलयति।

परा ओखति परोखति ॥ इणेधत्योर्न । उप एति । उपैति । उप एधते उपैधते ॥ नामधातोर्वा ॥ उप एलकीयति उपैलकीयति । प्र ओषधीयति प्रोषधीयति प्रौषधीयति" अद्य ओम् । सा ओम् । इति स्थिते ॥

ओमि च ॥ ४१ ॥ अवर्णस्य नित्यं लोपो भवति ओमि च परे। अद्योम् । सोमित्यवोचत् ॥ बिम्ब ओष्ठः । स्थूल ओतुः । इति स्थिते ।

ओष्ठौत्वोः समासे वा ॥ ४२ ॥ अवर्णस्य लोपो वा भवति ओष्ठौत्वोः परतः समासविषये । बिम्बमिव ओष्ठौ यस्यासौ बिम्बोष्ठः । बिम्बौष्ठः । स्थूलोतुः । स्थूलौतुः । असमासे तु हे पुत्रौष्ठं पश्य । अद्यौतुं पश्य ॥ अक्ष ऊहिनी । इति स्थिते ।

अक्षस्य ऊहिन्याम् ॥ ४३ ॥ अक्षस्यौत्वं भवति ऊहिन्यां परतः परश्च लोपमापद्यते । अक्षौहिणी सेना ॥ प्रस्योढोढ्योश्च ॥ प्र ऊढः प्रौढः । प्र ऊढिः प्रौढिः ॥ एषैष्ययोरैत्वं । प्र एषः प्रैषः । प्र एष्यः प्रैष्यः । दधि अत्र । नदी एषा । इति स्थिते ।

इवर्णो यमसवर्णे न च परो लोप्यः ॥ ४४ ॥ इवर्णो यमापद्यते असवर्णे परे न च परो लोप्यः । दध्यत्र । नद्येषा ॥ मधु-अत्र । वधू आसनम् । इति स्थिते ।

वमुवर्णः ॥ ४५ ॥ उवर्णो वमापद्यते असवर्णे परे न च परो लोप्यः । मध्वत्र । वध्वासनम् ॥ पितृ अर्थः । मातृ अर्थः । इति स्थिते ।

रमृवर्णः ॥ ४६ ॥ ऋवर्णो रमापद्यते असवर्णे परे न च परो लोप्यः । पित्रर्थः । मात्रर्थः ॥ ऌ अनुबन्धः । ॡ आकृतिः । इति स्थिते ।

लम्लृवर्णः ॥ ४७ ॥ ऌवर्णो लमापद्यते असवर्णे परे न च परो लोप्यः । लनुबन्धः । लाकृतिः ॥ ने अनम् । चे अनम् । इति स्थिते ।

ए अय् ॥ ४८ ॥ एकारो अय् भवति असवर्णे परे न च परो लोप्यः । नयनम् । चयनम् ॥ नै अकः । चै अकः । इति स्थिते ।

ऐ आय् ॥ ४९ ॥ ऐकार आय् भवत्यसवर्णे परे न च परो लोप्यः । नायकः । चायकः ॥ लो अनम् । पो अनम् । इति स्थिते ।

ओ अव् ॥ ५० ॥ ओकारो अव् भवति असवर्णे परे न च परो लोप्यः । लवनम् । पवनम् ॥ लौ अकः । पौ अकः । इति स्थिते ।

औ आव् ॥ ५१ ॥ औकार आव् भवत्यसवर्णे परे न च परो लोप्यः । लावकः पावकः ॥ गो अजिनम् इति स्थिते ।

गोर इति वा प्रकृतिः ॥ ५२ ॥ गोशब्दस्य वा प्रकृतिर्भवत्यकारे परे । गो अजिनम् । गोऽजिनम् । गवाजिनम् ॥ गोअश्वौ । गोईहा । गो उष्ट्रौ । गो एलकौ । इति स्थिते ॥

अवः स्वरे ॥ ५३ ॥ गोशब्दस्य अवादेशो वा भवति स्वरे परे । गो अश्वौ । गवाश्वौ गोश्वौ । गवेहा । गवीहा । गवोष्ट्रौ । गवुष्ट्रौ । गवैलकौ । गवेलकौ ॥ गो अक्षः । गोइन्द्रः । इति स्थिते ।

अक्षेन्द्रयोर्नित्यम् ॥ ५४ ॥ गोशब्दस्य नित्यमवादेशो भवति अक्षेन्द्रयोः परतः । गवाक्षः । गवेन्द्रः ॥ ते आहुः । तस्मै आसनम् । पटो इह । असौ इन्दुः । इति स्थिते ।

अयादीनां यवलोपः पदान्ते न वा लोपे तु प्रकृतिः ॥ ५५ ॥ पदान्ते वर्तमानानां अयृइत्येवमादीनां यवयोर्लोपो भवति न वा लोपे तु प्रकृतिश्च भवति । त आहुः । तयाहुः । तस्माआसनम् । तस्मायासनम् । पट इह । पटविह । असा इन्दुः । असाविन्दुः ॥ नै ऋ अदः । रै उ अणः । मै ॠ उतः । ओ उ इन्दुः । रिपु इ उदयः । इति स्थिते ।

स्वरजौ यवकारावनादिस्थौ लोप्यौ व्यञ्जने ५६ अनादिस्थौ स्वरजौ यवकारौ लोप्यौ भवतो व्यञ्जने परे । नारदः ।

रावणः । मारुतः । अविन्दुः । रिप्युदयः ॥ ते अत्र । पटो अत्र । इति स्थिते ।

एदोत्परः पदान्ते लोपमकारः ॥ ५७ ॥ एदोद्भ्यां पदान्ते वर्तमानाभ्यां परोऽकारो लोपमापद्यते । तेऽत्र । पटोऽत्र ॥ देवी गृहम् । पटु हस्तः । मातृ मुखम् । जले पद्मम् । रै धृतिः । गो गतिः । नौ यानम् ।

न व्यञ्जने स्वराः सन्धेयाः ॥ ५८ ॥ व्यञ्जने परे स्वराः सन्धानीया न भवन्ति ॥ पितृ यम् । भ्रातृ यम् । मातृ यम् इति स्थिते ॥

र ऋतस्तद्धिते ये ॥ ५९ ॥ ऋतो रो भवति तद्धिते ये परे । पितुरिदम् पित्र्यम् । एवं भ्रात्र्यम् । मात्र्यम् ॥ गोयूतिः इति स्थिते ॥

गव्यूतिरध्वमाने ॥ ६० ॥ अध्वमाने गव्यूतिरिति निपात्यते । गवां यूतिः गव्यूतिः ॥

इति स्वरसन्धिः ।

अथ तेषां स्वराणामेव सन्धिकार्य्येप्राप्ते क्वचित्पूर्ववत्

प्रकृतिभाव उच्यते । अहो आश्चर्य्यम् । नो एहि । अ अपेहि । इ इन्द्रं पश्य । उ उत्तिष्ठ । आ एवम् । इति स्थिते ॥

ओदन्ता अइउआ निपाताः स्वरे प्रकृत्या ॥६१॥

ओदन्ता निपाता अ इ उ आश्च केवला निपाताः स्वरे परे प्रकृत्या तिष्ठन्ति । यल्लक्षणेनानुत्पन्नं तत्सर्वं निपातनात्सिद्धं ।

श्लोकः ।

ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः ॥
आङनुबन्धो विज्ञेयो वाक्यस्मरणयोर्नतु ॥ १ ॥

---

१ अहो आहोउताहो च भोहोहंहो अथोइमे । भानोयुक्ताश्च ओदन्ता निपाता अष्टधास्मृताः ॥ २ लोकप्रसिद्धशब्दमादाय स्वरूपेण कथनं निपाताः निश्चयेनपतन्त्यनेकेष्वर्थेष्विति निपाताः ॥ ३ पूर्वापरिभूतासाध्यमानरूपा प्रवृत्तिः क्रिया ॥

ईषदर्थे- आउष्णं- ओष्णं। क्रियायोगे आइहि- एहि । मर्यादायां आ उदकान्तात् । ओदकान्तात् । अभिविधौ आ आर्येभ्यः आर्येभ्यो यशोगतमकलङ्कस्वामिनः । वाक्ये- आएवं किल मन्यसे । स्मरणे आएवं किल तत् । अन्तग्रहणमकारादीनां केवलार्थम् ॥ कवी एतौ । माले इमे। इति स्थिते ।

द्विवचनमनौ ॥ ६२ ॥ अनौभूतं द्विवचनं स्वरे परे प्रकृत्या तिष्ठति । औकाररूपं परित्यज्य रूपान्तरं प्राप्तमित्यर्थः ।

मणीवादीनां वा ॥ ६३ ॥ मणीवादीनां वा सन्धिर्भवति। मणी इव मणीव। जम्पती इव जम्पतीव। अमुके अत्र तिष्ठतः इति स्थिते।

न साकोऽदसः ॥ ६४ ॥ साकोदसः परमनौभूतं द्विवचनं स्वरे परे प्रकृत्या न तिष्ठति । अमुकेऽत्र तिष्ठतः ॥ अमी अश्वाः । अमी एडकाः । अमी उष्ट्राः । अमी आदित्यरश्मय इति स्थिते।

बहुवचनममी ॥ ६५ ॥ बहुवचनान्तममी रूपं स्वरे परे प्रकृत्या तिष्ठति । आगच्छ भो देवदत्त३अत्र । उत्तिष्ठ भो यज्ञदत्त ३इह । आयाहि भो विष्णुमित्र३इह । इति स्थिते ।

अनुपदिष्टाश्च ॥ ६६ ॥ अक्षरसमाम्नायेऽनुपदिष्टाः प्लुताः स्वरे परे प्रकृत्या तिष्ठन्ति ॥ सुश्लोक ३ इति । इति स्थिते ।

नेतौ ॥ ६७ ॥ प्लुतस्य इतिशब्दे परे सन्धिकार्य्यनिषेधो न भवति । अहो सुश्लोकेति । दूरादाह्वाने गाने रोदने च प्लुतास्ते लोकतः सिद्धाः ॥

श्लोकः ।

एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते ।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्द्धमात्रकम् ॥ १ ॥

इति प्रकृतिभावसन्धिः ।

---

१ वाक्यपूर्णे ॥

अथ व्यञ्जनसन्धिरुच्यते ।

वाक् अत्र । वाक् जयति । अच् अत्र । अच् गच्छति । षट् अत्र । षट् गच्छन्ति । तत् अत्र । तत् गच्छति । ककुप् आस्ते । ककुप् जयति । इति द्विः स्थिते ।

वर्गप्रथमाः पदान्ताः स्वरघोषवत्सु तृतीयान् ॥ ६८ ॥ पदान्ता वर्गप्रथमाः स्वरेषु घोषवत्सु च परेषु स्ववर्गतृतीयानापद्यन्ते ।

वर्गप्रथमातिक्रमे कारणाभावात् । वागत्र । वाग्जयति । अजत्र । अज्गच्छति । षडत्र । षड्गच्छन्ति । तदत्र । तद्गच्छन्ति । ककुबास्ते । ककुब्जयति । प्रकृतिप्रत्यययोः पदयोर्विभागे सन्धिस्वरात्प्रतिषेधश्च प्रकृतिप्रत्यययोर्विभागो यत्र तत्र नित्यं सन्धिकार्यं भवति । यत्र पदयोर्विभागस्तत्र विकल्पेन सन्धिकार्यं भवति । इति सिद्धम् ॥ वाक् मती । अच् मात्रम् । षट् मुखानि । तत् नयनम् । त्रिष्टुप् मिनोति । इति स्थिते ।

पञ्चमे पञ्चमांस्तृतीयान्नवा ॥ ६९ ॥ पदान्ता वर्गप्रथमाः पञ्चमे परे सवर्गपञ्चमानापद्यन्ते तृतीयान्न वा । वाङ्मती । वाग्मती । अञ्मात्रम् । अज्मात्रम् । षण्मुखानि । षड्मुखानि । तन्नयनम् । तद्नयनम् । त्रिष्टुम्मिनोति । त्रिष्टुब्मिनोति ॥

प्रत्यये पञ्चमे पञ्चमान्नित्यम् ॥ ७० ॥ पदान्ता वर्गप्रथमा नित्यं स्ववर्गपञ्चमानापद्यन्ते प्रत्ययपञ्चमे परे । वाङ्मात्रम् । अञ्मात्रम् । षण्मात्रम् । तन्मयम् । ककुम्मात्रम् ॥ वाक् शूरः । अच् शेषः । षट् श्यामाः । तत् श्वेतम् । त्रिष्टुप्श्रुतम् इति स्थिते ।

वर्गप्रथमेभ्यः शकारः स्वरयवरपरश्छकारं न वा ॥ ७१ ॥ पदान्तेभ्यो वर्गप्रथमेभ्यः शकारः स्वरयवरपरश्छकारमापद्यते नवा । वाक्छूरः । वाक् शूरः । अच्छेषः । अच्शेषः । षट्छ्यामाः ।

षट् श्यामाः । तच्छ्वेतम् । तच्श्वेतम् । त्रिष्टुपछ्रुतम् । त्रिष्टुप् श्रुतम् ॥ तत् श्लक्ष्णम् । तत् स्मशानम् । इति स्थिते ।

[illegible] लानुनासिकेष्वपीच्छन्त्यन्ये॥७२॥ लानुनासिकेषु परतः शकारश्छकारमापद्यते न वा । तच्छ्लक्ष्णं तच्श्लक्ष्णं। तच्स्मशानं- तश्मशानं- इति सिद्धम् ॥ वाक् हीनः । अच् हलौ । षट् हलानि । तत् हितम् । ककुप् हासः । इति स्थिते ।

तेभ्य एव हकारः पूर्वचतुर्थं न वा ॥ ७३ ॥ तेभ्यः पदान्तेभ्यो वर्गप्रथमेभ्यः परो हकारः पूर्वचतुर्थमापद्यते न वा । वाग्घीनः । वाग्हीनः । अज्झलौ । अज्हलौ । षड्ढलानि । षड्हलानि । तद्धितम् । तद् हितम् । ककुब्भासः । ककुब् हासः । तेभ्योग्रहणं स्वरयवरनिवृत्त्यर्थम् । तेन वाग्ह्लादयति । एवेति ग्रहणं तृतीयमतव्यवच्छेदार्थम् । पुनरपि न वा ग्रहणमुत्तरत्रयविकल्पनिवृत्त्यर्थम् ॥ तत् लुनानि । तत् चरति । तत् छादयति । तत् जयति । तत् झषयति । तत् ञकारेण । तत् टीकते । तत् ठकारेण । तत् डीनम् । तत् ढौकते । तत् णकारेण । इति स्थिते ।

पररूपं तकारो लचटवर्गेषु ॥ ७४ ॥ पदान्तस्तकारो लचटवर्गेषु परेषु पररूपमापद्यते । तल्लुनाति । तच्चरति ।

धुड्व्यञ्जनमनन्तस्थानुनासिकम् ॥७५॥ अन्तस्थानुनासिकवर्जितं व्यञ्जनं धुट्संज्ञं भवति ।

पदान्ते धुटां प्रथमः ॥७६॥ पदान्ते वर्त्तमानानां धुटामन्तरतमः प्रथमो भवति ॥

धुटां तृतीयश्चतुर्थेषु ॥ ७७ ॥ धुटां तृतीयो भवति चतुर्थेषु परेषु । तच्छादयति । तज्जयति । तज्झषयति । तञ्ञकारेण । तट्टीक-

---

श्लोकः । १ पररूपं हि कर्त्तव्यं व्यञ्जनं स्वरवर्जितम् ॥ सस्वरं तु परं दृष्ट्वा विस्वरं क्रियते बुधैः ॥

ते । तट्ठकारेण । तड्डीनम् । तड्ढौकते । तण्णकारेण ॥ तत् शेते । तत् शयनम् । इति स्थिते ॥

चं शे ॥ ७८ ॥ पदान्तस्तकारश्चकारमापद्यते शकारे परे ॥

श्लोकौ ।

चंशे व्यर्थमिदं सूत्रं यदुक्तं शर्ववर्मणा ।
तस्योत्तरपदं ब्रूहि यदि वेत्सि कलापकम् ॥ १ ॥
मूढधीस्त्वं न जानासि छत्वं किल विभाषया ।
अच्छत्वपक्षे वचनं नूनं चंशे व्यवस्थितम् ॥ २ ॥

तच् शेते । तच् शयनम् ॥ क्रुङ् आस्ते । सुगण् अत्र । पचन् इह । कृषन् आस्ते । इति स्थिते ।

अन्त्यात्पूर्व उपधा ॥ ७९ ॥ धातुलिङ्गयोरन्त्यवर्णात्पूर्वो वर्ण उपधासंज्ञो भवति ।

ङणना ह्रस्वोपधाः स्वरे द्विः ॥ ८० ॥ ह्रस्वोपधाः । पदान्ता ङणनाः स्वरे परे द्विर्भवन्ति । क्रुङ्ङास्ते । सुगण्णत्र । पचन्निह । कृषन्नास्ते । अत्र रषृवर्णेभ्य इत्यादिना णत्वे प्राप्ते (असिद्धं बहिरङ्गमन्तरङ्गे) अन्तरङ्गे कार्य्ये कृते सति बहिरङ्गं कार्य्यमसिद्धं भवति । इति णत्वे सति द्वित्वनिषेधः । पूर्वं णत्वे कृते पश्चाद्द्वित्वे प्राप्ते सति । सकृद्बाधितो विधिर्बाधित एवासत्पुरुषवत् ॥ भवान् चरति । भवान् छादयति । इति स्थिते ।

नोऽन्तश्चछयोः शकारमनुस्वारपूर्वम् ॥ ८१ ॥ पदान्तो नकारश्चछयोः परयोः शंकारमापद्यते अनुस्वारपूर्वम् । भवांश्चरति । भवांश्छादयति ॥ भवान् टीकते । भवान् ठकारेण । इति स्थिते ।

टठयोः षकारम् ॥ ८२ ॥ पदान्तो नकारः टठयोः परयोः षकारमापद्यते अनुस्वारपूर्वम् । भवांष्टीकते । भवांष्ठकारेण ॥ भवान् तरति । भवान् थुडति । इति स्थिते ।

तथयोः सकारम् ॥ ८३ ॥ पदान्तो नकारस्तथयोः परयोः सकारमापद्यतेऽनुस्वारपूर्वम् । भवांस्तरति । भवांस्थुडति ॥ नॄन् पाहि । इति स्थिते ।

नॄनः पे वा ॥ ८४ ॥ नॄन्शब्दस्य पदान्तो नकारोऽनुस्वारपूर्वं सकारं वाऽऽपद्यते । नॄंस्पाहि । नॄन्पाहि ॥

प्रशानः शादीन् ॥ ८५ ॥ प्रशानो नकारः शादीन्न प्राप्नोति । प्रशान् चरति । प्रशान्छादयति । प्रशान्टीकते । प्रशान्ठकारेण । प्रशान् तरति । प्रशान् थुडति ॥ भवान् लुनाति । भवान् लिखति इति स्थिते ।

ले लम् ॥ ८६ ॥ पदान्तो नकारो लकारमापद्यते लकारे परे ।

अनुस्वारहीनम् ॥ ८७ ॥ अधिकारस्येष्टत्वात् शकारादीनां हीनत्वादनुस्वारो नास्ति । भवाल्लुनाति । भवाल्लिखति ॥ भवान् जयति । भवान् झषयति । भवान् ञकारेण । भवान् शेते इति स्थिते ।

जझञशकारेषु ञकारम् ॥८८॥ पदान्तो नकारो जझञशकारेषु परेषु ञकारमापद्यते । भवाञ्जयति । भवाञ्झषयति । भवाञ्ञकारेण । भवाञ्शेते ॥ कुर्वन् शूरः । उभयविकल्पे त्रैरूप्यम् । इति स्थिते ।

शि न्चौ वा ॥८९॥ पदान्तो नकारो न्चौ वा प्राप्नोति शकारे परे । तवर्गश्चटवर्गयोगे चटवर्गौ । इति पञ्चमः स्यात् । कुर्वञ्छूरः कुर्वञ्छ्छूरः कुर्वञ्शूरः ॥ भवान् डीनः । भवान् ढौकते । भवान् णकारेण । इति स्थिते ।

डढणेषु णम् ॥९०॥ अत्र वा स्मर्य्यते । पदान्तो नकारो णकारमापद्यते डढणेषु परतः । भवाण्डीनः । भवाण्ढौकते । भवाण्णकारेण ॥ त्वम् लुनासि । त्वम् रमसे । त्वम् यासि । त्वम् वससि । इति स्थिते ।

मोऽनुस्वारं व्यञ्जने ॥ ९१ ॥ पदान्तो मकारोऽनुस्वारमापद्यते व्यञ्जने परे । त्वं लुनासि । त्वं रमसि । त्वं यासि । त्वं वससि ।

(सम्राट् संज्ञायाम्)। सम्पूर्वात् राजतेश्च क्विप्यनुस्वाराभावो निपात्यते। सं राजते सम्राट् ॥

विरामे वा ॥ ९२ ॥ पदान्तो मकारोऽनुस्वारमापद्यते न वा विरामे । देवानां । देवानाम् । पुरुषाणां । पुरुषाणाम् । देवं। देवम् ॥ त्वम् करोषि । त्वम् चरसि । त्वम् टीकसे । त्वम् तरसि । त्वम् पचसि । इति स्थिते ।

वर्गे तद्वर्गपञ्चमं वा ॥ ९३ ॥ पदान्तो मकारो वर्गे परे तद्वर्गपञ्चममापद्यते न वा । त्वङ्करोषि । त्वं करोषि । त्वञ्चरसि । त्वं चरसि । त्वण्टीकसे । त्वं टीकसे । त्वन्तरसि । त्वं तरसि । त्वम्पचसि । त्वं पचसि ॥ त्वम् यासि । त्वम् वरसि । त्वम् लोकसे । इति स्थिते ।

यवलेषु वा ॥ ९४ ॥ पदान्तो मकारः पररूपमापद्यते वा यवलेषु परतः । त्वय्यासि । त्वं यासि। त्वव्वरसि। त्वं वरसि । त्वल्लोकसे । त्वं लोकसे ॥

इति व्यञ्जनसन्धिः ।

अथ विसर्जनीयसन्धिरुच्यते ।

कः चरति । कः छादयति । इति स्थिते ।

विसर्जनीयश्चे छे वा शम् ॥९५॥ चे वा छे वा परे विसर्जनीयः शमापद्यते । कश्चरति। कश्छादयति। इति सिद्धम्॥ कः टीकते । कः ठकारेण । इति स्थिते ।

टे ठे वा षम् ॥९६॥ टे वा ठे वा परे विसर्जनीयः षकारमापद्यते । कष्टीकते । कष्ठकारेण ॥ कः तरति । कः थुडति । इति स्थिते ।

ते थे वा सम् ॥९७॥ ते वा थे वा परे विसर्जनीयः समापद्यते । कस्तरति । कस्थुडति ॥ कः करोति । कः खनति । इति द्विः-स्थिते ।

कखयोर्जिह्वामूलीयं न वा ॥ ९८ ॥ कखयोः परयो-र्विसर्जनीयो जिह्वामूलीयमापद्यते न वा ।

जिह्वामूलीयोपध्मानीयौ च ॥९९॥ जिह्वामूलीयमुपध्मानीयं च परं वर्णं नयेत् । क ᳵकरोति । कः करोति । क ᳵखनति । कः खनति ॥ कः पचति । कः फलति । इति स्थिते ।

पफयोरुपध्मानीयं न वा ॥ १०० ॥ पफयोः परयोर्वि-सर्जनीय उपध्मानीयमापद्यते न वा । क ᳶपचति । कः पचति । क ᳶफलति कः फलति ॥ कः च्शावित्याचष्टे । कः ट्षावित्याचष्टे । पुरुषः त्सरुकः । यतः क्षमः । ततः प्साति । इति स्थिते ।

न शादीन् शषसस्थे ॥ १०१ ॥ विसर्जनीयः शादीन् न प्राप्नोति शषसस्थे निमित्ते परे ॥ कः श्च्योतति । कः ष्ठीवति । कः स्तौति । इति स्थिते ।

अघोषस्थेषु शषसेषु वा लोपम् ॥१०२॥ अघोषस्थे-षु शषसेषु परतो विसर्जनीयो लोपमापद्यते वा । उभयविकल्पे त्रिरू-पम् । कश्च्योतति । कश्श्च्योतति । कःश्च्योतति । कष्ठीवति । कष्ष्ठीवति । कःष्ठीवति । कस्तौति । कस्स्तौति । कः स्तौति ॥ कः शेते । कः ष-ण्डे । कः साधुः । इति स्थिते ।

शे षे से वा वा पररूपम् ॥ १०३ ॥ शे वा षे वा से वा परे विसर्जनीयः पररूपमापद्यते न वा । कश्शेते । कः शेते । कष्षण्डे । कः षण्डे । कस्साधुः । कः साधुः ॥ कः अर्थः । कः अत्र । इति स्थिते ।

उमकारयोर्मध्ये ॥ १०४ ॥ द्वयोरकारयोर्मध्ये विसर्जनीय उमापद्यते । कोऽर्थः । कोऽत्र ॥ कः गच्छति । कः धावति । इति स्थिते ।

अघोषवतोश्च ॥ १०५ ॥ अकारघोषवतोर्मध्ये विसर्जनीय उमापद्यते । कोगच्छति । कोधावति ॥ कः इह । कः उपरि । कः एषः । इति स्थिते ।

अपरो लोप्योऽन्यस्वरे यं वा ॥ १०६ ॥ अकारात्परो

विसर्जनीयो लोप्यो भवति यं वाऽऽपद्यते अन्यस्वरे परे। वाशब्दोऽत्र समुच्चयार्थः । न च विकल्पार्थः ॥

न[1] विसर्जनीयलोपे पुनः सन्धिः ॥१०७॥ विसर्जनीयलोपे कृते पुनः सन्धिर्न भवति । क इह । कयिह । क उपरि । कयुपरि । क एषः । कयेषः ॥ देवाः आहुः । भोः अत्र । इति स्थिते ।

आभोभ्यामेवमेव स्वरे ॥ १०८ ॥ आकारभोशब्दाभ्यां परो विसर्जनीय एवमेव भवति यं वाऽपद्यते स्वरे परे । देवा आहुः । देवायाहुः । भो अत्र । भोयत्र ॥ भगोः अत्र । अघोः अत्र । इति स्थिते ।

भगोअघोभ्यां वा ॥१०९॥ भगोअघोभ्यां विसर्जनीय एवमेव भवति यं वाऽपद्यते स्वरे परे । भगो अत्र । भगोयत्र । अघोअत्र । अघोयत्र ॥ देवाः गताः । भोः यासि । भगोः व्रज । अघोः यज । इति स्थिते ।

घोषवति लोपम् ॥ ११० ॥ आकारभोशब्दाभ्यां परो विसर्जनीयो लोपमापद्यते घोषवति परे । देवागताः । भोयासि । भगोव्रज । अघोयज ॥ लोपग्रहणं यवेति निवृत्त्यर्थम्[2] ॥ सुपिः । सुतुः । इति स्थिते ।

नामिपरो रम् ॥ १११ ॥ नामिनः परो विसर्जनीयो रमापद्यते निरपेक्षः । ईरूरर्थं वचनम् ।

इरुरोरीरूरौ ॥११२॥ अत्र धातोरिरुरोरीरौ भवतः । विरामे व्यञ्जनादौ च । रेफसोर्विसर्जनीयः । सुपीः सुतूः ॥ अग्निः गच्छति । अग्निः अत्र । रविः गच्छति । रविः अत्र । मुनिः आयाति । मुनिः गच्छति । पटुः वदति । पटुः अत्र । इति स्थिते ।

घोषवत्स्वरेषु ॥ ११३ ॥ नामिनः परो विसर्जनीयो रमाऽ

---

१ नतदः पादपूर्णं चेत् तदो विसर्जनीयलोपे पुनस्सन्धिकार्यनिषेधो न भवति पादपूर्णंचेत् ॥ श्लोकः । सैषदाशरथीरामः सैषराजा युधिष्ठिरः ॥ सैषकर्णो महात्यागी सैष पार्थो धनुर्धरः ॥ (२) लोपग्रहणं एवमेवेतिनिवृत्त्यर्थम् ।

पद्यते घोषवत्स्वरेषु । अग्निर्गच्छति । अग्निरत्र । रविर्गच्छति । रवि-रत्र । मुनिरायाति । मुनिर्गच्छति । पटुर्वदति । पटुरत्र ॥ पितः याहि । पितः अत्र । पुनः गच्छति । पुनः अत्र । इति स्थिते ।

रप्रकृतिरनामिपरोऽपि ॥ ११४ ॥ रेफप्रकृतिर्विसर्जनीयो नामिपरोऽप्यनामिपरोऽपि रमापद्यते घोषवत्स्वरेषु परतः । पितर्याहि । पितरत्र । पुनर्गच्छति । पुनरत्र ॥ अहः गणः । अहः अत्र । अहः जयति । अहः आयाति । अहः हसति । अहः अपि । इति स्थिते ।

अह्नोऽरेफे ॥ ११५ ॥ अह्नो विसर्जनीयो रमापद्यते अरेफे घोषवति च स्वरे परे । अहर्गणः । अहरत्र । अहर्जयति । अहराया-ति । अहर्हसति । अहरपि । रेफे तु अहोराजते । अहोरात्रम् । अहोरूपम् ॥ अहः भ्याम् । अहः भिः । इति स्थिते ॥

न स्यादिभे ॥ ११६ ॥ अह्नो विसर्जनीयो न रमापद्यते स्यादिभे परे । अहोभ्याम् । अहोभिः । स्यादिभे इति किम् । अहर्भुक्तिः । अहर्भवति ॥ अहः पतिः । इति स्थिते ।

अहरादीनां पत्यादिषु ॥ ११७ ॥ अहरादीनां विसर्जनीयो वा रमापद्यते पत्यादिषु परतः । अहर्पतिः । अहः पतिः । इत्यादिः ॥ एषः करोति । सः गच्छति । इति स्थिते ।

एषसपरो व्यञ्जने लोप्यः ॥ ११८ ॥ एषसाभ्याम् परो विसर्जनीयो लोप्यो भवति व्यञ्जने परे । एष करोति । स गच्छति ॥ अग्निः रथेन । पुनः रात्रिः । इति स्थिते ।

रो रे लोपं स्वरश्च पूर्वो दीर्घः ॥ ११९ ॥ रे परे रो लोपमापद्यते पूर्वस्वरश्च दीर्घो भवति । अग्नीरथेन । पुनारात्रिः ॥ वट छाया । कवि छन्दः । तनु छविः । इति स्थिते ।

द्विर्भावं स्वरपरश्छकारः ॥ १२० ॥ स्वरात्परश्छकारो द्विर्भावमापद्यते ।

अघोषे प्रथमः ॥ १२१ ॥ अघोषे परे धुटां प्रथमो भवति ।

वटच्छाया । कविच्छन्दः । तनुच्छविः ॥ बाला छादयति । वेला छादयति। इति स्थिते ।

दीर्घात्पदान्ताद्वा॥१२२॥पदान्ताद्दीर्घात्परश्छाकारो वा द्विर्भावमापद्यते । बालाच्छादयति। बालाछादयति । वेलाच्छादयति। वेलाछादयति । इति सिद्धम् ॥ आ छादयति । मा छिदत् । इति स्थिते ।

आङ्माङ्भ्यां नित्यम्॥ १२३ ॥ आङ्माङ्भ्यां परश्छकारो नित्यं द्विर्भावमापद्यते। आच्छादयति । माच्छिदत्। इतिसिद्धम्। दध्यत्र इति स्थिते ।

अस्वरे ॥ १२४ ॥ व्यञ्जनं द्विर्भवति व्यञ्जने परे । दध्यत्र ॥

इति विसर्जनीयसन्धिः ॥

अथ लिङ्गाद्विभक्तय उच्यन्ते ॥

श्लोकः ।

सर्वज्ञं तमहं वन्दे परं ज्योतिस्तमोपहम् ।
प्रवृत्ता यन्मुखाद्देवी सर्वभाषासरस्वती ॥ १ ॥

किं लिङ्गम् ?

धातुविभक्तिवर्जमर्थवल्लिङ्गम् ॥ १२५ ॥ अर्थोभिधेयः ॥ धातुविभक्तिवर्जमर्थवच्छब्दरूपं लिङ्गसंज्ञं भवति । तच्च लिङ्गं द्विविधम् । स्वरान्तं व्यञ्जनान्तं चेति। तत्पुनः प्रत्येकं त्रिविधम्। पुल्लिङ्गं स्त्रीलिङ्गं नपुंसकलिङ्गं चेति । तत्रादावकारान्तात्पुल्लिङ्गात्पुरुषशब्दाद्विभक्तयो योज्यन्ते । लोकोपचारात्स्यादीनां विभक्तिसंज्ञायां पुरुष इति स्थिते ॥

तस्मात्परा विभक्तयः ॥१२६॥ सि औ जस् । अम् औ शस् । टा भ्याम् भिस् । ङे भ्याम् भ्यस् । ङसि भ्याम् भ्यस् । ङस् ओस् आम् । ङि ओस् सुप् । तस्मादर्थवतो लिङ्गात्पराः स्यादयो विभक्तयो भवन्ति । ताः पुनः सप्त । सि औ जस् इति प्रथमा । अम् औ शस् इति

द्वितीया। टा भ्याम् भिस् इति तृतीया। ङे भ्याम् भ्यस् इति चतुर्थी । ङसि भ्याम् भ्यस् इति पञ्चमी। ङस् ओस् आम्। इति षष्ठी । ङि ओस् सुप् इति सप्तमी। एवं युगपत् सर्व-प्रत्ययप्रसङ्गे वक्तुर्विवक्षया शब्दार्थ-प्रतिपत्तिरिति । लिङ्गार्थविवक्षायाम् ।

प्रथमाविभक्तिर्लिङ्गार्थवचने ॥ १२७ ॥ लिङ्गार्थवचने प्रथमाविभक्तिर्भवति । इति लिङ्गार्थप्रथमा । तत्रापि युगपदेकवचनादि प्राप्तौ ।

एकं द्वौ बहून् ॥ १२८ ॥ अर्थान् वक्तीत्येकस्मिन्नर्थे एकवचनम् । द्वयोरर्थयोर्द्विवचनम् । बहुष्वर्थेषु बहुवचनम् भवति । इति लिङ्गार्थैकत्वविवक्षायां प्रथमैकवचनं सि । पुरुष सि इति स्थिते ।

योऽनुबन्धोऽप्रयोगी ॥ १२९ ॥ यः अनुबन्धः स अप्रयोगी भवति । अनुबन्धः कः? इजशटङपा विभक्तिष्वनुबन्धाः । वा विरामे इति वर्तमाने ।

रेफसोर्विसर्जनीयः ॥ १३० ॥ विरामे व्यञ्जनादौ च रेफसकारयोर्विसर्जनीयो भवति । परवर्णाभावो विरामः । अथवा यदनन्तरं वर्णान्तरं नोच्यते स विरामः। पुरुषः इति सिद्धं पदम् । तथैव लिङ्गार्थे द्वित्वविवक्षायां द्विवचनम् औ । सन्धिः । पुरुषौ ॥ तथैव लिङ्गार्थे बहुत्वविवक्षायां बहुवचनं जस् । अनुबन्धलोपः । पुरुष अस् इति स्थिते । अकारे लोपमिति प्राप्ते तत्प्रतिषेधः। अकारो दीर्घं घोषवतीति वर्तते । सर्वविधिभ्यो लोपविधिर्बलवान्। लोपस्वरादेशयोः स्वरादेशो विधिर्बलवान् ।

जसि ॥ १३१ ॥ लिङ्गान्तोऽकारो दीर्घमापद्यते जसि परे । (एकदेशविकृतमनन्यवत्)। यथाश्वाकर्णपुच्छादिस्वाङ्गेषु भिन्नेषु सत्सु श्वा न गर्दभः किंतु श्वा श्वैव। पुनः सवर्णे दीर्घः । सस्य विसर्जनीयः। पुरुषाः ॥ तथैवामन्त्रणार्थविवक्षायाम् ।

आमन्त्रणे च ॥ १३२ ॥ दूरस्थानामभिमुखीकरणमामन्त्रणम् । तत्र प्रथमाविभक्तिर्भवति ।

आमन्त्रणे सिः सम्बुद्धिः ॥१३३॥ आमन्त्रणार्थे विहितः सिः सम्बुद्धिसंज्ञो भवति ॥

ह्रस्वनदीश्रद्धाभ्यःसिर्लोपम् ॥ १३४ ॥ ह्रस्वनदीश्रद्धाभ्यः परः संबुद्धिसंज्ञकः सिर्लोपमाद्यते । कैश्चिदामन्त्रणाभिव्यक्तये अहो हे भो शब्दाः प्राक्प्रयुज्यन्ते । हे पुरुष । द्विवचनबहुवचनयोः पूर्ववत् । हे पुरुषौ । हे पुरुषाः । तथैव कर्म्मविवक्षायाम् ॥

शेषाः कर्मकरणसंप्रदानापादानस्वाम्याद्यधिकरणेषु ॥ १३५ ॥ शेषा द्वितीयाद्याः षड्विभक्तयः कर्मादिषु षट्सु कारकेषु यथासंख्यं भवन्ति । इति कर्म्मणि द्वितीया । पुरुष अम् इति स्थिते ।

अकारे लोपम् ॥ १३६ ॥ लिङ्गान्तोऽकारो लोपमापद्यते सामान्ये अकारे परे । पुरुषम् । द्विवचने सन्धिः । पुरुषौ । बहुत्वे पुरुष अस् इति स्थिते ।

शसि सस्य च नः ॥ १३७ ॥ शसि परे लिङ्गान्तोऽकारो दीर्घमापद्यते सस्य च नो भवति । पुनः सवर्णे दीर्घः । पुरुषान् । तथैव करणविवक्षायाम् ॥ शेषाः कर्मेत्यादिना करणे तृतीया । पुरुष टा इति स्थिते ।

इन टा ॥ १३८ ॥ अकारान्ताल्लिङ्गात्परष्टा इनो भवति । सन्धिः ।

न **रषृवर्णेभ्यो नो णमनन्त्यः स्वरहयवकवर्गपवर्गान्तरोऽपि ॥ १३९ ॥** रेफ षकारऋवर्णेभ्यः परोऽनन्त्यो नकारः णमापद्यते स्वरहयवकवर्गपवर्गान्तरोऽपि शब्दानन्तरोऽपि । स्वरान्तरस्तावत् । पुरुषेण । द्विवचने ।

अकारो दीर्घं घोषवति ॥ १४० ॥ लिङ्गान्तोऽकारो

दीर्घमापद्यते घोषवति परे । पुरुषाभ्याम् । बहुत्वे ।

भिसैस्वा ॥ १४१ ॥ अकारान्ताल्लिङ्गात्परो भिस् ऐस् वा भवति । सन्धिः । पुरुषैः । तथैव सम्प्रदानविवक्षायाम् । शेषाः कर्म्मे-त्यादिना सम्प्रदाने चतुर्थी ।

ङेर्य्यः ॥ १४२ ॥ अकारान्ताल्लिङ्गात्परो ङेर्यो भवति । घोष-वति दीर्घः । पुरुषाय । द्वित्वे पूर्ववत् । पुरुषाभ्याम् । बहुत्वे ।

*** धुड् व्यञ्जनमनन्तस्थानुनासिकाम् ॥ ७९ ॥**

अन्तस्थानुनासिकवर्जितं व्यञ्जनं धुट्संज्ञं भवति । क ख ग घ । च छ ज झ । ट ठ ड ढ । त थ द ध।प फ ब भ।श ष स ह इति ।

धुटि बहुत्वे त्वे ॥ १४३ ॥ लिङ्गान्तोऽकार ए भवति बहु-त्वे धुटि परे । पुरुषेभ्यः । तथैव अपादानविवक्षायां शेषाः कर्म्मेत्या-दिना अपादाने पञ्चमी ।

ङसिरात् ॥ १४४ ॥ अकारान्ताल्लिङ्गात्परो ङसिराद्भवति। पुरुषात् । द्वित्वबहुत्वयोः पूर्ववत् । दीर्घोच्चारणं किमर्थम् । अकारे लो-पे प्राप्ते सति तन्निमित्तम् । पुरुषाभ्यां पुरुषेभ्यः । तथैव स्वाम्यादिविव-क्षायां शेषाः कर्म्मेत्यादिना स्वाम्यादौ षष्ठी ।

ङस् स्यः ॥ १४५ ॥ अकारान्ताल्लिङ्गात्परो ङस् स्यो भवति । पुरुषस्य । द्वित्वे धुटि बहुत्वे त्वे इति वर्त्तते ।

ओसि च ॥१४६॥ लिङ्गान्तोऽकार ए भवति ओसि च परे । सन्धिः । एअय् । रेफसोर्विसर्जनीयः । पुरुषयोः । बहुत्वे पुरुष आम् इति स्थिते । ह्रस्वनदीश्रद्धाभ्य इति वर्त्तते ।

आमि च नुः ॥ १४७ ॥ ह्रस्वनदीश्रद्धाशब्देभ्यः परो नुरागमो भवति आमि परे ।

तृतीयादौ तु परादिः ॥१४८॥ उदनुबन्ध आगमः परा-दिर्भवति तृतीयादौ विभक्तौ ।

दीर्घमामिसनौ ॥ १४९ ॥ ह्रस्वान्तं लिङ्गं दीर्घमाप-

द्यते सनावामिपरे । रषृवर्णेत्यादिना णत्वं घोषवति दीर्घः । पुरुषाणाम् ॥ तथैव अधिकरणे सप्तमी । अनुबन्धलोपः । सन्धिः । पुरुषे । द्विवचने पूर्ववत् । पुरुषयोः । बहुत्वे धुटि एत्वं च ।

नामिकरपरः प्रत्ययविकारागमस्थः सिः षं नुविसर्जनीयषान्तरोऽपि ॥ १५० ॥ नामिपरेभ्यः प्रत्ययविकारागमस्थः सिः षमापद्यते नुविसर्जनीयषान्तरोऽपि । पुरुषेषु । नीतकः । पुरुषः, पुरुषौ, पुरुषाः । हेपुरुष, हेपुरुषौ, हे पुरुषाः । पुरुषम्, पुरुषौ, पुरुषान् । पुरुषेण, पुरुषाभ्याम्, पुरुषैः । पुरुषाय, पुरुषाभ्याम्, पुरुषेभ्यः । पुरुषात्, पुरुषाभ्याम्, पुरुषेभ्यः । पुरुषस्य, पुरुषयोः, पुरुषाणाम् । पुरुषे, पुरुषयोः, पुरुषेषु ॥ एवं धर्म वीर वेद वृक्ष सूर्य सागर स्तम्भ बाण मृग दन्त राघव मास पक्ष शिव शैल गुह्यक व्रात गण्ड कट पाट नाग शङ्कर घट पटादयः ॥

पूर्वपरयोरर्थोपलब्धौ पदम् ॥ १५१ ॥ पूर्वपरयोरिति कोऽर्थः । प्रकृतिविभक्त्योरित्यर्थः । प्रकृतयः काः । वृक्षादिशब्दाः । भूप्रभृतयो धातवश्च प्रकृतयो भवन्ति । विभक्तयः काः । स्यादिस्त्यादिश्च । तयोः प्रकृतिविभक्त्योः अर्थोपलब्धौ सत्यां समुदायस्य पदसंज्ञा भवति । एवं विभक्त्यन्तानां सर्वत्र पदसंज्ञा भवन्ति । सर्वशब्दस्य कश्चिद्विशेषः । सर्वः सर्वौ । जसि सर्वनाम्न इति वर्तते ।

जः[1] सर्व इः ॥१५२॥ अकारान्तात्सर्वनाम्नः परो जस् सर्व इः भवति । सर्वे । हे सर्व हे सर्वौ हे सर्वे । सर्वं सर्वौ सर्वान् । सर्वेण सर्वाभ्यां सर्वैः ॥ ङयि ।

स्मै सर्वनाम्नः ॥ १५३ ॥ आकारान्तात्सर्वनाम्नः परो ङे स्मै भवति । सर्वस्मै सर्वाभ्यां सर्वेभ्यः ॥ ङसौ ।

ङसिः स्मात् ॥१५४॥ अकारान्तात्सर्वनाम्नः परो ङसि स्माद् भवति । सर्वस्मात् सर्वाभ्याम् सर्वेभ्यः । सर्वस्य सर्वयोः ।

---

१ जस् शब्दस्य प्रथमैकवचनम् ।

सुरामि सर्वतः ॥ १५५ ॥ सर्वनाम्नः परः सुरागमो भवत्यामि परे । धुटि एत्वम् । नामिकरपरेत्यादिना षत्वम् । सर्वेषाम् । ङौ ।

ङिः स्मिन् ॥ १५६ ॥ अकारान्तात्सर्वनाम्नः परो ङिः स्मिन् भवति । सर्वस्मिन् । सर्वयोः । सर्वेषु ॥ नीतकः । सर्वः सर्वौ सर्वे । हे सर्व हे सर्वौ हे सर्वे । सर्वम् सर्वौ सर्वान् । सर्वेण सर्वाभ्याम् सर्वैः । सर्वस्मै सर्वाभ्याम् सर्वेभ्यः । सर्वस्मात् सर्वाभ्याम् सर्वेभ्यः । सर्वस्य सर्वयोः सर्वेषाम् । सर्वस्मिन् सर्वयोः सर्वेषु । किं तत्सर्वनाम । सर्व विश्व उभ उभय अन्य अन्यतर इतर इतम कतर कतम यतर यतम ततर ततम एकतर एकतम एते डतरडतमप्रत्ययान्ताः । वृत्[1] । त्व नेम सम सिम पूर्व पर अवर दक्षिण उत्तर अपर अधर स्व अन्तर । वृत् । त्यद् तद् यद् अदस् इदम् एतद् किम् एक द्वि । वृत् । युष्मद् अस्मद् भवत् इति सर्वादि । अल्पशब्दस्य तु भेदः । अल्पः अल्पौ । जसि ।

अल्पादेर्वा ॥ १५७ ॥ अल्पादेर्गणात्परो जस् सर्व इर्भवति वा । अल्पे अल्पाः । अन्यत्र पुरुषशब्दवत् । कोऽल्पादिर्गणः । अल्प प्रथम चरम त्रितय द्वितय द्वय त्रय एते तयअयप्रत्ययान्ताः । कतिपय नेम अर्द्ध पूर्व पर अवर दक्षिण उत्तर अपर अधर स्व अन्तर । वृत् । इति अल्पादिः । पूर्वशब्दस्य तु भेदः । पूर्वः पूर्वौ पूर्वे पूर्वाः । हे पूर्व हे पूर्वौ हे पूर्वे हे पूर्वाः । पूर्वम् पूर्वौ पूर्वान् । पूर्वेण पूर्वाभ्याम् पूर्वैः । पूर्वस्मै पूर्वाभ्याम् पूर्वेभ्यः । ङसिङ्योः ।

विभाष्येते पूर्वादेः ॥ १५८ ॥ पूर्वादेर्गणात्परयोर्ङसिङ्योः[2] स्मात्स्मिनौ विभाष्येते । पूर्वस्मात् पूर्वात् पूर्वाभ्याम् पूर्वेभ्यः । पूर्वस्य पूर्वयोः पूर्वेषाम् । ङौ तथैव विकल्पः । पूर्वस्मिन् पूर्वे पूर्वयोः पूर्वेषु । कः पूर्वादिः । प्रागेवोक्तः । इत्यकारान्ताः । आकारान्तः पुल्लिङ्गः क्षीरपाशब्दः । ततः स्याद्युत्पत्तिः । सौ । क्षीरपाः । क्षीरपौ

---

[1] समाप्तिद्योतको वृच्छब्द इति ॥ [2] 'ङसिः स्मात्' 'ङिः स्मिन्' इति सूत्रद्वयमनुवर्त्तते ॥

क्षीरपाः । सम्बुद्धावविशेषः । क्षीरपाम् क्षीरपौ । शसादौ तु विशेषः ।

पञ्चादौ घुट् ॥ १५९ ॥ स्यादीनामादौ पञ्चवचनानि घुट्संज्ञानि भवन्ति ।

आधातोरघुट्स्वरे ॥ १६० ॥ धातोराकारस्य लोपो भवति अघुट्स्वरे परे । धातोरिति किम् । शन्तृङन्तक्विबन्तौ धातुत्वं न त्यजतः । इत्येतदुपलक्षणम् । उपलक्षणं किं । स्वस्य स्वसदृशस्य च ग्राहकमुपलक्षणं । तेन विजन्तमपि धातुत्वं न जहाति । क्षीरपः । क्षीरपा क्षीरपाभ्याम् क्षीरपाभिः । क्षीरपे क्षीरपाभ्याम् क्षीरपाभ्यः । क्षीरपः क्षीरपाभ्याम् क्षीरपाभ्यः । क्षीरपः क्षीरपोः क्षीरपाम् । क्षीरपि क्षीरपोः क्षीरपासु । एवं सोमपा सीधुपा कीलालपा सौवीरपा मण्डपा अग्रेगा विषस्वा अब्जजा उदधिक्रा हाहा[1] पुरोगादयः । इत्याकारान्ताः । इकारान्तः पुल्लिङ्गो मुनिशब्दः । ततः स्याद्युत्पत्तिः । सौ । मुनिः । द्वित्वे ।

इदुदग्निः ॥ १६१ ॥ इकारान्तमुकारान्तञ्च लिङ्गं अग्निसंज्ञं भवति । तपरकरणमसन्देहार्थं ।

औकारः पूर्वं ॥ १६२ ॥ अग्निसंज्ञकात्पर औकारः पूर्वस्वररूपमापद्यते । सन्धिः । मुनी । जसि ।

इरेदुरोज्जसि ॥ १६३ ॥ अग्निसंज्ञकस्य इः एद्भवति उः ओद्भवति जसि परे । मुनयः ।

सम्बुद्धौ च ॥ १६४ ॥ अग्निसंज्ञकस्य इः एद्भवति उः ओद्भवति सम्बुद्धौ परतः । प्रत्ययलोपे प्रत्ययलक्षणमिति न्यायात् । हे मुने हे मुनी हे मुनयः ।

अग्नेरमोकारः ॥ १६५ ॥ अग्निसंज्ञकात्परस्य अमोऽकारो लोपमापद्यते । मुनिम् मुनी । शसादौ ।

---

1 जहातीति हाहा इति व्युत्पत्तिपक्षे न तु गन्धर्ववाची ।

शसोऽकारः सश्च नोऽस्त्रियाम् ॥ १६६ ॥ अग्निसंज्ञकात्परस्य शसोऽकारः पूर्वस्वररूपमापद्यते सस्य च नो भवत्यस्त्रियाम् । मुनीन् ।

अस्त्रियां टा ना ॥ १६७ ॥ अग्निसंज्ञकात्परस्य टा ना भवत्यस्त्रियाम् । मुनिना मुनिभ्यां मुनिभिः । ङयि ।

ङे ॥ १६८ ॥ अग्निसंज्ञकस्य इः एद्भवति उः ओद्भवति ङयि परे । मुनये मुनिभ्यां मुनिभ्यः ।

ङसिङसोरलोपश्च ॥ १६९ ॥ अग्निसंज्ञकस्य इः एद्भवति उः ओद्भवति ङसिङसोः परतः तयोरकारश्च लोप्यो भवति । मुनेः मुनिभ्याम् मुनिभ्यः । मुनेः मुन्योः । आमि नुरागमः ।

दीर्घमामिसनौ ॥ १७० ॥ नाम्यन्तं लिङ्गं दीर्घमापद्यते सनावामि परे । मुनीनाम् ।

ङिरौ सपूर्वः ॥ १७१ ॥ अग्निसंज्ञकात्परो ङिः पूर्वस्वरेण सह और्भवति । मुनौ मुन्योः मुनिषु । एवमग्नि गिरि रवि ऋषि यति कवि विधि राशि शीतरश्मि शालि दानवारि दैत्यारि सौरि सूरि विघ्नारि हेमाद्रि अद्रि हरि सारि वह्नि शकुनि पाकशासनि धूमयोनि पद्मयोनि अपांपति अतिथि ग्रन्थि पदाति मैत्रि बलि ध्वनि पाणि कपि अलि मणि जलधि अब्धि पयोधि निधि उपाधि नीरधि व्याधि शेवध्यादयः ॥ द्विशब्दस्य तु भेदः । तस्य द्व्यर्थवाचित्वात् द्विवचनमेव भवति । द्वि औ इति स्थिते ।

त्यदादीनामविभक्तौ ॥ १७२ ॥ त्यदादीनामन्तः अकारो भवति विभक्तौ परतः । सन्धिः । द्वौ । हे द्वौ । द्वाभ्याम् । द्वाभ्याम् । द्वाभ्याम् । द्वयोः । द्वयोः ॥ त्रिशब्दस्य तु भेदः । तस्य बह्वर्थवाचित्वात् बहुवचनमेव भवति । त्रयः । हे त्रयः । त्रीन् । त्रिभिः । त्रिभ्यः । त्रिभ्यः ।

आमि त्रेस्त्रयश्च ॥ १७३ ॥ त्रिशब्दस्य त्रयादेशो भवति

नुरागमश्चामि परे । त्रयाणाम् त्रिषु । कतिशब्दस्य तु भेदः । तस्यापि बहुवचनमेव भवति ।

कतेश्च जसूशसोर्लुक् ॥ १७४ ॥ संख्यायाः ष्णान्तायाः कतेश्च परयोर्जसूशसोर्लुग्भवति । (सर्वविधिभ्यो लोपविधिर्बलवान्) प्रत्ययलोपे प्रत्ययलक्षणमिति प्राप्ते सति ।

लुग्लोपे न प्रत्ययकृतम् ॥ १७५ ॥ लुगिति लोपे सति प्रत्ययलोपे परे यत्कृतं कार्य्यं प्रकृतेस्तन्न भवति । इरेदुरोज्जसीत्येत्वं न भवति । कति । कति । कतिभिः । कतिभ्यः । कतिभ्यः । कतीनाम् । कतिषु । सखिशब्दस्य तु भेदः । सावनन्त इति वर्त्तते ।

सख्युश्च ॥ १७६ ॥ सख्युरन्तोऽनुर्भवति असम्बुद्धौ सौ परे ।

घुटि चासम्बुद्धौ ॥ १७७ ॥ नान्तस्य चोपधाया दीर्घो भवति असम्बुद्धौ घुटि परे ।

व्यञ्जनाच्च ॥ १७८ ॥ व्यञ्जनाच्च परः सिर्लोपमापद्यते ।

लिङ्गान्तनकारस्य ॥ १७९ ॥ लिङ्गान्तनकारस्य लोपो भवति विरामे व्यञ्जनादौ च । सखा ।

घुटि त्वैः ॥ १८० ॥ सख्युरन्तः ऐर्भवति असंबुद्धौ घुटि परे । सखायौ सखायः । संबुद्धौ मुनिशब्दवत् । हे सखे हे सखायौ हे सखायः । सखायम् सखायौ । शसि मुनिशब्दवत् । सखीन् । टादौ ।

न सखिष्टादावग्निः ॥ १८१ ॥ सखिशब्दष्टादौ स्वरे परे नाग्निर्भवति । सख्या सखिभ्याम् सखिभिः । सख्ये सखिभ्याम् सखिभ्यः ॥

ङसिङसोरुमः ॥ १८२ ॥ सखिपतिभ्यां परयोर्ङसिङसोरकार उमापद्यते । सख्युः सखिभ्याम् सखिभ्यः । सख्युः सख्योः सखीनाम् ॥

सखिपत्योर्डिः ॥ १८३ ॥ सखिपतिभ्यां परो ङिरेव और्भवति । पुनर्ङिग्रहणं किमर्थं सपूर्वस्वरनिवृत्त्यर्थं ॥ सख्यौ सख्योः स-

खिषु। एवं सुसखि अतिसखि असखि प्रभृतयः । पतिशब्दस्य तु भेदः। पतिः पती पतयः । हे पते हे पती हे पतयः। पतिम् पती पतीन्। टादौ।

पतिरसमासे ॥ १८४ ॥ पतिशब्दोऽसमासे टादौ स्वरे परे नाग्निर्भवति । पत्या पतिभ्याम् पतिभिः । पत्ये पतिभ्याम् पतिभ्यः । पत्युः पतिभ्याम् पतिभ्यः । पत्युः पत्योः पतीनाम्। पत्यौ पत्योः पतिषु । भूपत्यादिशब्दानां समासत्वान्मुनिशब्दवत् । पन्थिशब्दस्य तु भेदः । पन्थि स् इति स्थिते । अमूशसोरा इति वर्त्तते ।

पन्थिमन्थिऋभुक्षीणां सौ ॥१८५॥ पन्थ्यादीनामन्तः आकारो भवति सौ परे । पन्थाः ।

अनन्तो घुटि ॥ १८६ ॥ पन्थ्यादीनामन्तोऽन् भवति घुटि परे । पन्थानौ । पन्थानः । सम्बोधनेऽपि तद्वत् । हे पन्थाः हे पन्थानौ हे पन्थानः। अग्नेरमोकार इति प्राप्ते (अन्तरङ्गबहिरङ्गयोरन्तरङ्गो विधिर्बलवान्) अल्पाश्रितमन्तरङ्गम् । बह्वाश्रितं बहिरङ्गम् । पन्थानम् पन्थानौ ।

अघुट् स्वरे लोपम् ॥१८७॥ पन्थ्यादीनामन्तो लोपमापद्यते अघुट् स्वरे परे ।

व्यञ्जने चैषां निः ॥१८८॥ पन्थ्यादीनां नकारो लोपमापद्यते व्यञ्जने चाघुट् स्वरे परे। पथः। पथा पथिभ्याम् पथिभिः । पथे पथिभ्याम् पथिभ्यः। पथः पथिभ्याम् पथिभ्यः । पथः पथोः पथाम् । पथि पथोः पथिषु । एवं मन्थि ऋभुक्षि शब्दौ । इति इकारान्ताः । ईकारान्तःपुल्लिङ्गो यवक्री शब्दः । ततः स्याद्युत्पत्तिः ॥ सौ यवक्रीः स्वरादौ । आधातोरिति वर्तमाने ।

ईदूतोरियुवौ स्वरे ॥ १८९ ॥ धातोरीदूतोरियुवौ भवतः विभक्तिस्वरे परे। पुनः स्वरग्रहणं किमर्थमघुट्स्वरनिवृत्त्यर्थम् । यवक्रियौ यवक्रियः । सम्बोधनेऽपि तद्वत् । यवक्रियम् यवक्रियौ यवक्रियः । यवक्रिया यवक्रीभ्याम् यवक्रीभिः । इत्यादि एवं सुश्री नी प्रभृतयः।

सेनानीशब्दस्य तु भेदः । सौ । सेनानीः । स्वरादावीदूतोरिति प्राप्ते ।

अनेकाक्षरयोस्त्वसंयोगाद्य्वौ ॥ १९० ॥ अनेकाक्षरयोर्लिङ्गयोरसंयोगात्परावीदूतोर्य्वौ भवतः विभक्तिस्वरे परे । सेनान्यौ सेनान्यः । सम्बोधनेऽपि तद्वत् । सेनान्यम् सेनान्यौ सेनान्यः । सेनान्या सेनानीभ्याम् सेनानीभिः । सेनान्ये सेनानीभ्याम् सेनानीभ्यः । सेनान्यः सेनानीभ्याम् सेनानीभ्यः । सेनान्यः सेनान्योः सेनान्याम् ॥ अनेकाक्षरयोरिति किं । नियौ नियः । लुवौ लुवः । असंयोगादिति किं । यवक्रियौ कटप्रुवौ । ङौ ।

नियो ङिराम् ॥१९१॥ नियः परो ङिराम् भवति । सेनान्याम् सेनान्योः सेनानीषु । एवमग्रणीग्रामणिप्रभृतयः । सुधीशब्दस्य तु भेदः । सौ । सुधीः । स्वरादावनेकाक्षरयोरिति यत्वे प्राप्ते । ईदूतोरियुवौ स्वरे इति वर्त्तते ।

सुधीः ॥ १९२ ॥ सुधीशब्द इयं प्राप्नोति विभक्तिस्वरे परे । सुधियौ सुधियः । सम्बोधनेऽपि तद्वत् । सुधियम् सुधियौ सुधियः । सुधिया सुधीभ्याम् सुधीभिः । सुधिये सुधीभ्याम् सुधीभ्यः । सुधियः सुधीभ्याम् सुधीभ्यः । सुधियः सुधियोः सुधियाम् । सुधियि सुधियोः सुधीषु ॥ इति ईकारान्ताः । उकारान्तः पुल्लिङ्गो भानुशब्दः ॥ स च मुनिशब्दवत् । अयं भेदः । उत ओत्वमवादेशश्च । भानुः भानू भानवः । भानुम् भानू भानून् । भानुना भानुभ्याम् भानुभिः । भानवे भानुभ्याम् भानुभ्यः । भानोः भानुभ्याम् भानुभ्यः । भानोः भान्वोः भानूनाम् । भानौ भान्वोः भानुषु । एवमृतु मेरु गुरु तरु धातु सेतु बाहु वायु बहुप्रभृतयः । इत्युकारान्ताः । ऊकारान्तः पुल्लिङ्गः कटप्रू शब्दः । स च यवक्रीशब्दवत् । उवादेशोऽत्र भेदः । कटप्रूः कटप्रुवौ कटप्रुवः । सम्बोधनेऽपि तद्वत् । कटप्रुवम् कटप्रुवौ कटप्रुवः । कटप्रुवा कटप्रूभ्याम् कटप्रूभिः । इत्यादि । खलपू शरलू काण्डलू

प्रभृतीनां सेनानीशब्दवत् । वत्वं भेदः । प्रतिभूशब्दस्य तु भेदः । सौ । प्रतिभूः । स्वरादौ ।

भूरवर्षाभूरपुनर्भूः ॥ १९३ ॥ भूरुवं प्राप्नोति विभक्तिस्वरे परे वर्षाभूपुनर्भ्वौ वर्जयित्वा । प्रतिभुवौ प्रतिभुवः । सम्बोधनेऽपि तद्वत् । एवं स्वयंभू मित्रभू आत्मभू अग्निभू मनोभू प्रभृतयः । वर्षाभू पुनर्भू सेनानीवत् वत्वं भेदः । इत्यूकारान्ताः । ऋकारान्तः पुल्लिङ्गः पितृशब्दः । सौ ।

आ सौ सिलोपश्च ॥ १९४ ॥ ऋदन्तस्य लिङ्गस्य आ भवति सौ परे सिलोपश्च । पिता ।

घुटि च ॥ १९५ ॥ ऋदन्तस्य अर् भवति घुटि परे । पितरौ पितरः । सम्बुद्धौ च ।

आ च न सम्बुद्धौ ॥ १९६ ॥ ऋदन्तस्य आर् आ च न भवति सम्बुद्धौ परतः । अपि तु घुटि चेत्यर्भवति । हे पितः हे पितरौ हे पितरः । पितरम् पितरौ ।

अग्निवच्छसि ॥ १९७ ॥ ऋदन्तस्य अग्निवत्कार्य्यं भवति शसि परे । पितॄन् । पित्रा पितृभ्याम् पितृभिः । पित्रे पितृभ्याम् पितृभ्यः । ङसि ङसोः ।

ऋदन्तात्सपूर्वः ॥ १९८ ॥ ऋदन्तात्परयोर्ङसिङसोरकारः पूर्वस्वरेण सह उमापद्यते । पितुः पितृभ्याम् पितृभ्यः । पितुः पित्रोः पितॄणाम् ।

अर्ङौ ॥ १९९ ॥ ऋदन्तस्य अर् भवति ङौ परे । पितरि पित्रोः पितृषु । एवं भ्रातृ जामातृ सवितृ प्रभृतयः । कर्तृशब्दस्य तु भेदः । सौ । कर्त्ता । घुटि ।

धातोस्तृशब्दस्यार् ॥ २०० ॥ धातोर्विहितस्य तृशब्दस्य ऋत आर्भवति घुटि परे । कर्त्तारौ कर्त्तारः । हे कर्त्तः हेकर्त्तारौ हे कर्त्तारः । कर्त्तारम् कर्त्तारौ कर्तॄन् । अन्यत्र पितृशब्दवत् । धातोर्विहि-

तस्य किं? । यातरौ यातरः । यती प्रयत्ने । यतेः ऋत् दीर्घश्च उणादिप्रत्ययः। तृशब्दस्येति किं । ननान्दरौ ननान्दरः । एवं धातृ भर्तृ ज्ञातृ वेतृ श्रोतृ नेतृ वक्तृ भोक्तृ वप्तृ प्रभृतयः । क्रोष्टृशब्दस्य तु भेदः । क्रोष्टा क्रोष्टारौ क्रोष्टारः । सम्बुद्धौ ।

क्रोष्टुः ऋत उत्सम्बुद्धौ शसि व्यञ्जने नपुंसके च ॥ २०१ ॥ क्रोष्टुशब्दस्य ऋत उर्भवति सम्बुद्धौ शसि व्यञ्जने नपुंसके च परे । अग्निसंज्ञां विधाय भानुवत्कुर्यात् । हे क्रोष्टा हे क्रोष्टारौ हे क्रोष्टारः । क्रौष्टारम् क्रोष्टारौ क्रोष्टून् ।

टादौ स्वरे वा ॥ २०२ ॥ क्रोष्टुशब्दस्य ऋत उर्वा भवति टादौ स्वरे परे । क्रोष्ट्रा क्रोष्टुना क्रोष्टुभ्याम् क्रोष्टुभिः । क्रोष्ट्रे क्रोष्टवे क्रोष्टुभ्याम् क्रोष्टुभ्यः । क्रोष्टुः क्रोष्टोः क्रोष्टुभ्याम् क्रोष्टुभ्यः । क्रोष्टुः क्रोष्टोः क्रोष्ट्रोः क्रोष्ट्वोः क्रोष्टूणाम् क्रोष्टूनाम् । क्रोष्टरि क्रोष्टौ क्रोष्ट्रोः क्रोष्ट्वोः क्रोष्टुषु । स्वसृशब्दस्य तु भेदः । सौ । स्वसा । घुटि ।

स्वस्रादीनां च ॥ २०३ ॥ स्वस्रादीनां च ऋत आर्भवति घुटि परे । स्वसारौ स्वसारः । हे स्वसः । इत्यादि । अन्यत्र पितृशब्दवत् । के स्वस्रादयः ।

श्लोकः ।

स्वसा नप्ता च नेष्टा च त्वष्टा क्षत्ता तथैव च ।
होता पोता प्रशास्ता चेत्यष्टौ स्वस्रादयः स्मृताः ॥ १ ॥

नृशब्दस्य तु भेदः ॥ नृशब्दस्यामि विशेषः । ना नरौ नरः । हे नः हे नरौ हे नरः । नरम् नरौ नृन् । त्रा नृभ्याम् नृभिः । त्रे नृभ्याम् नृभ्यः । नुः नृभ्याम् नृभ्यः । नुः त्रोः । न नामि दीर्घमिति वर्तते ।

नृ वा ॥ २०४ ॥ नृशब्दो वा दीर्घं प्राप्नोति सनावामि परे । नृणाम् नॄणाम् । नरि त्रोः नृषु ॥ इति ऋदन्ताः । ॠकारऌकारॡकारान्ताश्चाप्रसिद्धाः । ऐकारान्तः पुल्लिङ्गः रैशब्दः । आत्वं व्यञ्जनादौ इति वर्तते ।

रैः ॥ २०५ ॥ रैशब्दस्य आत् भवति व्यञ्जनादौ परतः । राः रायौ रायः । हे राः हे रायौ हे रायः । रायम् रायौ रायः । राया राभ्याम् राभिः । राये राभ्याम् राभ्यः । रायः राभ्याम् राभ्यः । रायः रायोः रायाम् । रायि रायोः रासु । इत्यैकारान्तः ॥ ओकारान्तः पुल्लिङ्गो गोशब्दः ।

गोरौ घुटि ॥ २०६ ॥ गोशब्दस्यान्त औभवति घुटि परे । गौः गावौ गावः । हे गौः हे गावौ हे गावः ।

अम्शसोरा: ॥२०७॥ गोशब्दस्यान्त आ भवति अम्शसोः परतः । गाम् गावौ गाः । गवा गोभ्याम् गोभिः । गवे गोभ्याम् गोभ्यः । ङसिङसोरलोपश्चेति वर्तते ।

गोश्च ॥ २०८ ॥ गोशब्दात्परयोर्ङसिङसोरकारो लोपमापद्यते । गोः गोभ्याम् गोभ्यः । गोः गवोः गवाम् । गवि गवोः गोषु । इत्योकारान्तः । औकारान्तः पुल्लिङ्गो ग्लौशब्दः । ग्लौः ग्लावौ ग्लावः । सम्बोधनेऽपि तद्वत् । ग्लावम् ग्लावौ ग्लावः । ग्लावा ग्लौभ्याम् ग्लौभिः । इत्यादि ॥ इत्यौकारान्तः ।

इति स्वरान्ताः पुल्लिङ्गाः ।

अथ स्वरान्ताः स्त्रीलिङ्गा उच्यन्ते ।

अकारान्तः स्त्रीलिङ्गोऽप्रसिद्धः । आकारान्तः स्त्रीलिङ्गो रम्भाशब्दः । सौ ।

आ श्रद्धा ॥ २०९ ॥ आकारान्तः स्त्र्याख्यः श्रद्धासंज्ञो भवति ।

श्रद्धायाः सिर्लोपम् ॥ २१० ॥ श्रद्धायाः परः सिर्लोपमापद्यते । रम्भा ।

औरिम् ॥ २११ ॥ श्रद्धायाः परे औरिमापद्यते । रम्भे रम्भाः ।

सम्बुद्धौ च ॥ २१२ ॥ श्रद्धायाः एत्वं भवति सम्बुद्धौ परे । हे रम्भे हे रम्भे हे रम्भाः ।

टौसोरे ॥ २१३ ॥ श्रद्धायाः एत्वं भवति टौसोः परतः । रम्भया रम्भाभ्याम् रम्भाभिः । ङवत्सु ।

ङवन्ति यैयास्यास्याम् ॥ २१४ ॥ श्रद्धायाः पराणि ङवन्ति वचनानि यै यास् यास् याम् भवन्ति यथासंख्यम् । रम्भायै रम्भाभ्याम् रम्भाभ्यः । रम्भायाः रम्भाभ्याम् रम्भाभ्यः । रम्भायाः रम्भयोः रम्भाणाम् । रम्भायाम् रम्भयोः रम्भासु । एवं शाला माला दोला भार्या कान्ता अङ्गना वनिता जाया माया प्रभृतयः । सर्वनाम्न-स्त्रिलिङ्गत्वात्स्त्रीलिङ्गे ।

स्त्रियामादा ॥ २१५ ॥ स्त्रियां वर्तमानादकारान्तादाप्रत्ययो भवति विभक्तिपरे । सर्वा सर्वे सर्वाः । हे सर्वे हे सर्वे हे सर्वाः । सर्वाम् सर्वे सर्वाः । सर्वया सर्वाभ्याम् सर्वाभिः । ङवत्सु ।

सर्वनाम्नस्तु ससवो ह्रस्वपूर्वाश्च ॥ २१६ ॥ सर्वनाम्नः श्रद्धायाः पराणि ङवन्ति वचनानि यै यास् यास् याम् भवन्ति यथासंख्यं सह सुना ह्रस्वपूर्वाश्च । सर्वस्यै सर्वाभ्याम् सर्वाभ्यः । सर्वस्याः सर्वाभ्याम् सर्वाभ्यः । सर्वस्याः सर्वयोः । आमि । सुरामि सर्वतः । सर्वासाम् । सर्वस्याम् सर्वयोः सर्वासु । एवं विश्वादीनामेकशब्दपर्यन्तानां रूपं ज्ञेयम् । अल्पादीनान्तु सप्तानां रम्भाशब्दवत् । अल्प प्रथम चरम तय अय कतिपय अर्ध एते सप्त ॥ द्वितीयाशब्दस्य तु भेदः । द्वितीया द्वितीये द्वितीयाः । हे द्वितीये हे द्वितीये हे द्वितीयाः । द्वितीयाम् द्वितीये द्वितीयाः । द्वितीयया द्वितीयाभ्याम् द्वितीयाभिः । ङवत्सु ।

द्वितीयातृतीयाभ्यां वा ॥ २१७ ॥ द्वितीयातृतीयाभ्यां पराणि ङवन्ति वचनानि यै यास् यास् याम् भवन्ति यथासंख्यं सह सुना ह्रस्वपूर्वाश्च वा । द्वितीयस्यै द्वितीयायै द्वितीयाभ्याम् द्वितीयाभ्यः । द्वितीयस्याः द्वितीयायाः द्वितीयाभ्याम् द्वितीयाभ्यः । द्वितीयस्याः द्वितीयायाः द्वितीययोः । सर्वादौ अपठितत्वात् न सुरागमः ।

द्वितीयानाम् । द्वितीयस्याम् द्वितीयायाम् द्वितीययोः द्वितीयासु ॥ एवं तृतीयाशब्दोऽपि । अन्यत्र रम्भाशब्दवत् । जराशब्दस्य तु भेदः । व्यञ्जने रम्भाशब्दवत् ।

जरा जरः स्वरे वा ॥ २१८ ॥ जराशब्दो जरस् वा भवति विभक्तिस्वरे परे । जरे जरसौ जराः जरसः । हे जरे हे जरे हे जरसौ हे जराः हे जरसः । जरां जरसं जरे जरसौ जराः जरसः । जरसा जरया जराभ्याम् जराभिः । जरायै जरसे जराभ्याम् जराभ्यः । जरायाः जरसः जराभ्यां जराभ्यः । जरायाः जरसः जरयोः जरसोः जराणाम् जरसाम् । जरायां जरसि जरयोः जरसोः जरासु ।

ह्रस्वोऽम्बार्थानाम् ॥ २१९ ॥ अम्बार्थानां द्विस्वराणां श्रद्धासंज्ञकानां सम्बुद्धौ ह्रस्वो भवति । हे अम्ब । हे अक्क । हे अल्ल । हे अत्त । एवमादयोऽम्बार्थाः । अन्यत्र रम्भाशब्दवत् ।

न बहुस्वराणाम् ॥ २२० ॥ बहुस्वराणामम्बार्थानां श्रद्धासंज्ञकानां ह्रस्वो न भवति सम्बुद्धौ सौ परे । हे अम्बाडे । हे अम्बाले । हे अम्बिके । इत्याकारान्ताः । इकारान्तः स्त्रीलिङ्गो रुचिशब्दः । रुचिः रुची रुचयः । हे रुचे हे रुची हे रुचयः । रुचिम् रुची । स्त्रीलिङ्गत्वात्तस्य नत्वाभावः । रुचीः । तृतीयैकवचनेऽपि तस्मान्नत्वाभावः । रुच्या रुचिभ्याम् रुचिभिः । ङवत्सु ।

ह्रस्वश्च ङवति ॥ २२१ ॥ स्त्र्याख्यावियुवौ स्थानिनौ ह्रस्वश्च ङवति परे नदीसंज्ञौ वा भवतः । यत्र नदीसंज्ञा तत्र ।

नद्या ऐ आसासाम् ॥ २२२ ॥ नदीसंज्ञकात्पराणि ङवन्ति वचनानि ऐ आस् आस् आम् भवन्ति । यथासंख्यम् । नदीसंज्ञाभावे मुनिशब्दवत् । रुच्यै रुचये रुचिभ्याम् रुचिभ्यः । रुच्याः रुचेः रुचिभ्याम् रुचिभ्यः । रुच्याः रुचेः रुच्योः रुचीनाम् । रुच्याम् रुचौ रुच्योः रुचिषु । एवं बुद्धि वृद्धि कीर्ति कान्ति कृति युक्ति श्रेणि पङ्क्ति प्रभृतयः । द्विशब्दस्य तु भेदः । त्यदादित्वात् अ आदे-

शः आ प्रत्ययश्च । द्वे । हे द्वे । द्वे । द्वाभ्याम् । द्वाभ्याम् द्वाभ्याम् । द्वयोः । द्वयोः ॥ त्रिशब्दस्य तु भेदः ।

त्रिचतुरोः स्त्रियां तिसृचतसृ विभक्तौ ॥ २२३ ॥ स्त्रियां वर्तमानयोस्त्रिचत्वारशब्दयोः तिसृ चतसृ आदेशौ भवतः विभक्तौ परतः । घुटि चेत्यरि प्राप्ते बाधकबाधनार्थोऽयं योगः ।

तौ रं स्वरे ॥ २२४ ॥ तौ तिसृ चतसृ आदेशौ रं प्राप्नुतो विभक्तौ स्वरे परे । तिस्रः । हे तिस्रः । तिस्रः । तिसृभिः । तिसृभ्यः । तिसृभ्यः ।

न नामि दीर्घम् ॥ २२५ ॥ तौ तिसृ चतसृ आदेशौ दीर्घत्वं न प्राप्नुतः सनावामि परे । तिसृणाम् । तिसृषु । इति इकारान्तः ॥ ईकारान्तः स्त्रीलिङ्गो नदीशब्दः ।

ईदूतौ स्त्र्याख्यौ नदी ॥ २२६ ॥ स्त्र्याख्यावीदूतौ नदीसंज्ञौ भवतः ॥

ईकारान्तात्सिः ॥ २२७ ॥ नदीसंज्ञकादीकारान्तात्परः सिर्लोपमापद्यते ॥ नदीसंज्ञादन्तग्रहणाधिक्यान्नदाद्यञ्चीत्यादिना विहितादीकारात्परः सिर्लोपमापद्यते । नदी नद्यौ नद्यः ॥

संबुद्धौ ह्रस्वः ॥ २२८ ॥ नद्याः संबुद्धौ ह्रस्वो भवति । हे नदि हे नद्यौ हे नद्यः ।

अम्शसोरादिर्लोपम् ॥ २२९ ॥ नदीसंज्ञकात्परयोः अम्शसोरादिर्लोपमापद्यते । नदीम् नद्यौ नदीः । नद्या नदीभ्याम् नदीभिः । ङवत्सु । नद्या ऐ आसासामित्यादयः ॥ नद्यै नदीभ्याम् नदीभ्यः । नद्याः नदीभ्याम् नदीभ्यः । नद्याः नद्योः नदीनाम् । नद्याम् नद्योः नदीषु । एवं गौरी गान्धारी वाणी भारती गायत्री सावित्री सरस्वती गोमती गोमिनी भामिनी क्रोष्ट्री महिषी मही प्लवी सौरभेयी प्रभृतयः ॥

श्लोकौ ।

मही मन्दाकिनी गौरी सखी भागीरथी नदी॥
पुरी नारी पुरन्ध्री च सैरन्ध्री सुरसुन्दरी ॥ १ ॥
मृगी वनचरी देवी शर्वरी वरवर्णिनी ॥
सिंही हैमवती धात्री धरित्रीत्येवमादयः ॥ २ ॥

स्त्रीशब्दस्य तु भेदः । सौ ।

स्त्री नदीवत् ॥ २३० ॥ स्त्रीशब्दो नदीवद्भवति विभक्तौ परतः । स्त्रीशब्दस्य पृथक्नदीसंज्ञाकरणं किमर्थं । ह्रस्वश्च ङवति वा इति सूत्रोक्तविकल्पनिषेधार्थम् । स्त्री ।

स्त्री च ॥ २३१ ॥ स्त्रीशब्दो धातुवद्भवति विभक्तिस्वरे परे । स्त्रियौ स्त्रियः । हे स्त्रि हे स्त्रियौ हे स्त्रियः । संबोधनेप्येवं ।

वामशसोः ॥ २३२ ॥ स्त्रीशब्दो वा धातुवद्भवति अम्शसोः परतः । स्त्रीम् स्त्रियम् स्त्रियौ स्त्रीः स्त्रियः । स्त्रिया स्त्रीभ्याम् स्त्रीभिः । स्त्रियै स्त्रीभ्याम् स्त्रीभ्यः । स्त्रियाः स्त्रीभ्याम् स्त्रीभ्यः ।स्त्रियाः स्त्रियोः स्त्रीणाम् । स्त्रियां स्त्रियोः स्त्रीषु ॥ श्रीशब्दस्य तु भेदः । श्रीः । ईदूतोरियुवौ स्वरे इति स्वरादावियादेशः । श्रियौ श्रियः । अनित्यनदीत्वात्संबुद्धौ ह्रस्वो नास्ति । हे श्रीः हे श्रियौ हे श्रियः । श्रियम् श्रियौ श्रियः । श्रिया श्रीभ्याम् श्रीभिः । ङवत्सु । नद्या ऐ आसासाम् । पश्चादीदूतोरियुवौ स्वरे । नदीपक्षे ऐ आसादयः । श्रियै श्रिये श्रीभ्याम् श्रीभ्यः । श्रियाः श्रियः श्रीभ्याम् श्रीभ्यः । श्रियाः श्रियः श्रियोः । आमि ।

स्त्र्याख्यावियुवौ वामि ॥२३३॥ स्त्र्याख्यावियुवस्थानिनौ आमि परे वा नदीसंज्ञौ भवतः । सिद्धे सत्यारंभो नियमाय । किं नदीवत्कार्यं । आमि च नुः इति नुरागमः । अन्यत्र "ईदूतोरियुवौ स्वरे" इय् । उव् । श्रीणाम् श्रियाम् । श्रियाम् श्रियि श्रियोः श्रीषु ॥ लक्ष्मीशब्दस्य तु भेदः । लक्ष दर्शनाङ्कनयोः ।

लक्षेरीमोऽन्तश्च ॥ २३४ ॥ लक्षधातोरीप्रत्ययो भवति मोऽन्तश्च ॥ ईकारोऽन्ते यस्य लिङ्गस्येति वचनात् ईकारान्तात्सिरिति सेर्लोपो न भवति ।

श्लोकः ।

अवीलक्ष्मीतरीतन्त्रीह्रीधीश्रीणामुणादितः ।
अपि स्त्रीलिङ्गजातीनां सिलोपो न कदाचन ॥ १ ॥

लक्ष्मीः लक्ष्म्यौ लक्ष्म्यः । अन्यत्र नदीशब्दवत् । इति ईकारान्ताः॥ उकारान्तः स्त्रीलिङ्गश्चञ्चुशब्दः । स च रुचिशब्दवत् । विशेषस्तु उत ओत्वमवादेशश्च । चञ्चुः चञ्चू चञ्चवः । हे चञ्चो हे चञ्चू हे चञ्चवः । चञ्चुम् चञ्चू चञ्चूः । चञ्च्वा चञ्चुभ्याम् चञ्चुभिः । ह्रस्वश्च ङवतीति वा नदीवद्भावादैआसादयः । पक्षे भानुशब्दवत् । चञ्च्वै चञ्चवे चञ्चुभ्याम् चञ्चुभ्यः । चञ्च्वाः चञ्चोः चञ्चुभ्याम् चञ्चुभ्यः । चञ्च्वाः चञ्चोः चञ्च्वोः चञ्चूनाम् । चञ्च्वाम् चञ्चौ चञ्च्वोः चञ्चुषु । एवं उडु तनु प्रियङ्गु स्नायु ऊरु करेणु धेनुप्रभृतयः । इत्युकारान्ताः ॥ ऊकारान्तः स्त्रीलिङ्गो वधूशब्दः । सौ । अनीकारान्तत्वात् ईकारान्तात्सिरिति सेर्लोपो न भवति । वधूः वध्वौ वध्वः । संबुद्धौ ह्रस्वः । हे वधु हे वध्वौ हे वध्वः । अन्यत्र नदीवत् ॥ एवं अलाबू कच्छू यवागू चमू तण्डू कमण्डलू कद्रू कण्डू कासूप्रभृतयः । भ्रूशब्दस्य तु भेदः । सौ । भ्रूः ।

भ्रूर्धातुवत् ॥ २३५ ॥ भ्रूशब्दो धातुवद्भवति विभक्तिस्वरे परे । भ्रुवौ भ्रुवः । सम्बोधनेऽप्यनित्यनदीत्वात् संबुद्धौ ह्रस्वो नास्ति । अन्यत्र नदीवत् । हे भ्रूः हे भ्रुवौ हे भ्रुवः । भ्रुवम् भ्रुवौ भ्रुवः । भ्रुवा भ्रूभ्याम् भ्रूभिः । भ्रुवे भ्रुवै भ्रूभ्याम् भ्रूभ्यः । भ्रुवाः भ्रुवः भ्रूभ्याम् भ्रूभ्यः । भ्रुवाः भ्रुवः भ्रुवोः भ्रूणाम् भ्रुवाम् । भ्रुवि भ्रुवाम् भ्रुवोः भ्रूषु ॥ इत्यूकारान्ताः ॥ ऋकारान्तः स्त्रीलिङ्गो मातृशब्दः । माता *मातरौ मातरः । हे मातः हे मातरौ हे मातरः । मातरम् मातरौ मातॄः ।* स्त्रीलिङ्गत्वात्सस्य नत्वाभावः । इत्यादि । अन्यत्र पितृशब्दवत् । एवं दु-

हितृ ननान्दृप्रभृतयः । स्वस्रादीनां च पूर्ववत् । स्वस्रादयः के ?

श्लोकः ।

स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा ।
याता मातेति सप्तैते स्वस्रादिष्वभ्यगीषत ॥ १ ॥

शसादौ मातृशब्दवत् । इति ऋकारान्ताः ॥ ॠकार ऌकार ॡकार एकारान्ता अप्रसिद्धाः। ऐकारान्तः स्त्रीलिङ्गो सुरैशब्दः। स च रैशब्दवत्। सुराः सुरायौ सुरायः । सम्बोधनेपि तद्वत् । सुरायम् सुरायौ सुरायः । सुराया सुराभ्याम् सुराभिः । सुराये सुराभ्याम् सुराभ्यः । सुरायः सुराभ्याम् सुराभ्यः । सुरायः सुरायोः सुरायाम् । सुरायि सुरायोः सुरासु। इत्यैकारान्ताः। ओकारान्तः स्त्रीलिङ्गो गोशब्दः। स च पूर्ववत्। औकारान्तः स्त्रीलिङ्गो नौशब्दः । स च ग्लौशब्दवत्। इत्यौकारान्ताः ।

इति स्वरान्ताः स्त्रीलिङ्गाः ।

अथ स्वरान्ता नपुंसकलिङ्गा उच्यन्ते ।

अकारान्तो नपुंसकलिङ्गः कुलशब्दः । सौ ।

अकारादसम्बुद्धौ मुश्च ॥२३६॥ अकारान्तान्नपुंसकलिङ्गात्परयोः स्यमोर्लोपो भवति मुरागमश्चासम्बुद्धौ । कुलं ।

औरीम् ॥ २३७ ॥ नपुंसकलिङ्गात्परः औरीमापद्यते । कुले ।

जश्शसौ नपुंसके ॥ २३८ ॥ जश्शसौ नपुंसकलिङ्गे घुट्संज्ञौ भवतः ।

जश्शसोः शिः ॥२३९॥ सर्वनपुंसकलिङ्गात्परयोर्जश्शसोः शिर्भवति । शकारः सर्वादेशार्थः ।

धुट्स्वराद्धुटि नुः ॥ २४० ॥ धुटः पूर्वात्स्वरात्परो नपुंसकलिङ्गे घुटि परे नुरागमो भवति। घुटि चासम्बुद्धौ इति दीर्घः। कुलानि। हे कुल हे कुले हे कुलानि । पुनरपि । कुलम् कुले कुलानि । कुलेन कुलाभ्याम् कुलैः । अतः परं पुरुषशब्दवत् ॥ एवं दान धन धान्य मित्र वस्त्र वसन वेदन नयन पुष्प पाप सुख दुःखादयः । सर्वनाम्नः

प्रथमाद्वितीययोः कुलशब्दवत् । अन्यत्र । पुल्लिङ्गवत् । सर्वम् सर्वे सर्वाणि । पुनरपि । अन्यत्र पुल्लिङ्गवत् । अन्यशब्दस्य तु भेदः ।

अन्यादेस्तु तुः ॥ २४१ ॥ अन्यादेर्नपुंसकलिङ्गात्परयोः स्यमोर्लोपो भवति तुरागमश्च । द्वितीयस्तुशब्दः किमर्थम् । असम्बुद्ध्यधिकारनिवृत्त्यर्थम् ।

वा विरामे ॥ २४२ ॥ विरामे धुटां त्रितीयो वा भवति । अन्यत् अन्यद् अन्ये अन्यानि । हे अन्यद् हे अन्यत् हे अन्ये हे अन्यानि । पुनरपि । अन्यत् अन्यद् अन्ये अन्यानि ॥ शेषं पुंवत् । एवमेकतरं वर्जयित्वान्यतरप्रभृतयः ।

नैकतरस्य ॥ २४३ ॥ एकतरशब्दस्य नपुंसकलिङ्गे तुरागमो न भवति । एकतरम् एकतरे एकतराणि । हे एकतर हे एकतरे हे एकतराणि । पुनरपि । अन्यत्र सर्वशब्दवत् । इत्यकारान्ताः । आकारान्तो नपुंसकलिङ्गः सोमपाशब्दः ।

स्वरो ह्रस्वो नपुंसके ॥ २४४ ॥ नपुंसकलिङ्गे वर्तमानः स्वरो ह्रस्वो भवति । सोमपम् सोमपे सोमपानि । हे सोमप हे सोमपे हे सोमपानि । पुनरपि । सोमपं सोमपे सोमपानि । शेषं पुल्लिङ्गवत् । इत्याकारान्ताः । इकारान्तो नपुंसकलिङ्गो वारिशब्दः । सौ ।

नपुंसकात्स्यमोर्लोपो न च तदुक्तं ॥२४५॥ नपुंसकात्परयोः स्यमोर्लोपो भवति तदुक्तं कार्यं न भवति । वारि ।

नामिनः स्वरे ॥ २४६ ॥ नाम्यन्तान्नपुंसकलिङ्गात् नुरागमो भवति स्वरे परे । औरीमिति ईत्वणत्वञ्च । वारिणी । जसि पूर्ववत् । नुरागमः । सामान्यविशेषयोर्विशेषो विधिर्बलवान् इति न्यायात् । उक्तञ्च ।

---

१ पर्जन्यवल्लक्षणप्रवृत्त्या ह्रस्वस्यापि ह्रस्वः । काण्डे कुड्ये काण्डीभूतं कुलमित्यत्र नपुंसके इति लिङ्गोपादानान्न भवति । युगवरत्राय युगवरत्रार्थमित्यत्रासिद्धं बहिरङ्गमन्तरङ्गे इति न भवति ॥

श्लोकः।

सामान्यशास्त्रतो नूनं विशेषो बलवान् भवेत्।
परेण पूर्वबाधो वा प्रायशो दृश्यतामिह ॥ १ ॥

धुट् स्वराद्धुटि नुः इत्यनेन सूत्रेण नुरागमो भवतीत्यर्थः ॥

इन्हन्पूषार्यम्णां शौ च ॥ २४७ ॥ इन् हन् पूषन् अर्यमन् इत्येतेषामुपधाया दीर्घो भवति नपुंसकलिङ्गे जश्शसोरादेशे शौ चासम्बुद्धौ सौ च परे। वारीणि।

नाम्यन्तचतुरां वा ॥ २४८ ॥ नाम्यन्तस्य नपुंसकलिङ्गस्य चत्वार्शब्दस्य च यदुक्तं कार्यं तदुक्तं वा भवति [१] सम्बुद्धौ परे। प्रत्ययलोपे प्रत्ययलक्षणं न याति इति न्यायात्। हे वारि हे वारे हे वारिणी हे वारीणि। पुनरपि वारि वारिणी वारीणि। वारिणा वारिभ्याम् वारिभिः। वारिणे वारिभ्याम् वारिभ्यः। वारिणः इत्यादि। आमि। नामिनः स्वरे प्राप्ते सति सामान्यविशेषयोर्विशेषो विधिर्बलवान् इतिन्यायात् आमि च नुरिति नुरागमो भवति। दीर्घमामि सनौ। वारीणाम्। वारिणि वारिणोः वारिषु ॥ अस्थि दधि सक्थि अक्षिशब्दानां प्रथमाद्वितीययोर्वारिशब्दवत्। अस्थि अस्थिनी अस्थीनि। पुनरपि अस्थि अस्थिनी अस्थीनि। टादौ–

अस्थिदधिसक्थ्यक्ष्णामनन्तष्टादौ ॥ २४९ ॥ नपुंसकलिङ्गानामस्थ्यादीनामन्तोऽन् भवति टादौ स्वरे परे।

अवमसंयोगादनोऽलोपोऽलुप्तवच्च पूर्वविधौ २५० अवमसंयोगात्परस्य अनोऽकारस्य लोपो भवति अघुटि स्वरे परे स[२]चालुप्तवद्भवति पूर्वस्य वर्णस्य विधौ कर्तव्ये। अस्थ्ना अस्थिभ्याम् अस्थिभिः। अस्थ्ने अस्थिभ्याम् अस्थिभ्यः। अस्थ्नः अस्थिभ्याम् अस्थिभ्यः। अस्थ्नः अस्थ्नोः अस्थ्नाम्।

---

१ तदुक्तं च कार्यं किं? हेवारे इत्यत्र "संबुद्धौ च" इति सूत्रेण एत्वं विकल्पेन भवति ॥ २ संयोगादेर्धुट इति सस्य लोपो भवति तस्मात्कारणात् अलुप्तवदिति वचनं।

ईङ्‌स्योर्वा ॥ २५१ ॥ अवमसंयोगात्परस्य अनोऽकारस्य लोपो भवति वा ईङ्‌च्योः नपुंसकलिङ्गे औकारादेशे ईकारे सप्तम्येकवचने परतः स चालुप्तवद्भवति पूर्वस्य वर्णस्य विधौ कर्तव्ये । अस्थ्नि अस्थनि अस्थ्नोः अस्थिषु । एवं दधि सक्थि अक्षिशब्दाः । शुचिशब्दस्य प्रथमाद्वितीययोर्वारिशब्दवत् । शुचि शुचिनी शुचीनि । सम्बुद्धावविशेषः । पुनरपि शुचि शुचिनी शुचीनि ।

टादौ भाषितपुंस्कं पुंवद्वा ॥ २५२ ॥ नाम्यन्तं भाषितपुंस्कं नपुंसकलिङ्गं टादौ स्वरे वा पुंवद्भवति ।

श्लोकौ ।

यन्निमित्तमुपादाय पुंसि[१] लिङ्गे प्रवर्त्तते ।
क्लीबवृत्तौ तदेव स्यात्तद्धि भाषितपुंसकम् ॥ १ ॥
शुचि भूमिगतं तोयं शुचिर्नारी पतिव्रता ।
शुचिर्धर्मपरो राजा ब्रह्मचारी सदा शुचिः ॥ २ ॥

शुच्या शुचिना शुचिभ्यां शुचिभिः । शुचिने शुचये शुचिभ्याम् शुचिभ्यः । इत्यादि ॥ द्विशब्दस्य तु भेदः । त्यदाद्यत्वं औरीमिति ईत्वं च । द्वे । हे द्वे । द्वे । द्वाभ्याम् । द्वाभ्याम् । द्वाभ्याम् । द्वयोः । द्वयोः । त्रिशब्दस्य जश्शासोर्वारिशब्दवत् । त्रीणि । त्रीणि । त्रिभिः । अन्यत्र पुल्लिङ्गवत् । इति इकारान्ताः । ईकारान्तो नपुंसकलिङ्गो ग्रामणीशब्दः । तस्य स्वरो ह्रस्वो नपुंसके इति ह्रस्वत्वे शुचिशब्दवत् । टादौ भाषितपुंस्कं पुंवद्भावो भवति विकल्पेन । ग्रामणि ग्रामणिनी ग्रामणीनि । पुनरपि ग्रामणि ग्रामणिनी ग्रामणीनि । ग्रामणिना । अनेकाक्षरयोस्त्वसंयोगाद्य्वौ इति यत्वम् । ग्रामण्या ग्रामणिभ्याम् ग्रामणिभिः । ग्रामणिने ग्रामणिभ्याम् । ग्रामणिभ्यः । इत्यादि । आमि नुरागमः । दीर्घमामिसनौ इति दीर्घः । ग्रामणीनाम् ।

---

१ एक एव हि यः शब्दः त्रिषु लिङ्गेषु वर्त्तते । एकमेवार्थमाख्याति तद्धि भाषितपुंसकं । २ अत्र । त्रिषु लिङ्गेषु वर्तते । एकमेवार्थमाख्याति तद्धि भाषितपुसकं । इति पाठोस्ति । उत्तरपद्यस्थोदाहरणैरयमेव समीचीनो भाति ।

पुंवद्भावे । ग्रामण्याम् । ग्रामणिनि । पुलिङ्गे । नियोङिराम् इति आम् । यत्वं पूर्ववत् । ग्रामण्याम् ग्रामणिनोः ग्रामण्योः ग्रामणिषु । सम्बोधने । नाम्यन्तचतुरां वा । हे ग्रामणिनी हे ग्रामणि हे ग्रामणीनि । एवमग्रणी सेनानी प्रभृतयः ॥ इति ईकारान्ताः । उकारान्तो नपुंसकलिङ्गो वस्तुशब्दः । स च वारिशब्दवत् । वस्तु वस्तुनी वस्तूनि । सम्बोधने । हे वस्तु हे वस्तो हे वस्तुनी हे वस्तूनि । पुनरपि । टादौ स्वरे परे नित्यनपुंसकं । आमि परे । आमि च नुः । दीर्घमामि सनौ इति दीर्घः । वस्तूनां । वस्तुनि वस्तुनोः वस्तुषु । मृदुशब्दस्य प्रथमाद्वितीययोर्वारिशब्दवत् । मृदु मृदुनी मृदूनि । पुनरपि । टादौ स्वरे परे भाषितपुंस्कं पुंवद्वा इति विकल्पेन । पुंवद्भावः शुचिवत् । मृदुना मृदुभ्यां मृदुभिः । इत्यादि । एवं पटु लघु गुरु प्रभृतयः । इत्युकारान्ताः । ऊकारान्तो नपुंसकलिङ्गः खलपूशब्दः । तस्य स्वरो ह्रस्वो नपुंसके इति ह्रस्वत्वे सेनानीशब्दवत् । खलपु खलपुनी खलपूनि । पुनरपि । टादौ भाषितपुंस्कमिति विकल्पेन यत्र पुंवद्भावः । तत्र सेनानीशब्दवत् । खलपुना खलप्वा खलपूभ्यां खलपूभिः । इत्यादि । एवं सरलू काण्डलू प्रभृतयः । इत्यूकारन्ताः । ऋकारान्तो नपुंसकलिङ्गः कर्तृशब्दः । तस्य प्रथमाद्वितीययोर्वारिशब्दवत् । कर्तृ कर्तृणी कर्तॄणि । पुनरपि । टादौ पुंवद्भावात्पुलिङ्गवत् । कर्त्रा कर्तृणा कर्तृभ्यां कर्तृभिः । कर्त्रे कर्तृणे कर्तृभ्यां कर्तृभ्यः । कर्तुः कर्तृणः कर्तृभ्यां कर्तृभ्यः । कर्तुः कर्तृणः कर्त्रोः कर्तृणोः । आमि परे नुरागमः । कर्तॄणाम् । कर्तृणि कर्तरि कर्त्रोः कर्तृणोः कर्तृषु । सम्बोधने । हे कर्तृ हे कर्तः हे कर्तृणी हे कर्तॄणि ॥ बहुक्रोष्टृशब्दस्य तु भेदः । क्रोष्टुः ऋत उत्सम्बुद्धौ इत्यादिना उर्भवति । शसि व्यञ्जने नपुंसके च इति ऋत उकारः । बहुक्रोष्टु बहुक्रोष्टुनी बहुक्रोष्टूनि । पुनरपि । टादौ स्वरे भाषितपुंस्कं पुंवद्वा इति विकल्पेन पुंवद्भावः । अयमेकविकल्पः ।

*** टादौ स्वरे वा ॥२९३॥** क्रोष्टुशब्दस्य ऋत उर्वा भवति

टादौ स्वरे परे । इति द्वितीयविकल्पः । इति उभयविकल्पे त्रैरूप्यं । बहुक्रोष्टुना बहुक्रोष्ट्रा बहुक्रोष्ट्रा बहुक्रोष्टुभ्यां बहुक्रोष्टुभिः । इत्यादि। सम्बोधने। हे बहुक्रोष्टु हे बहुक्रोष्टो हे बहुक्रोष्टुनी हेबहुक्रोष्टूनि । इत्यादि । ॠकार ऌकार ॡकारान्ता एकारान्ताश्चाप्रसिद्धाः ॥ ऐकारान्तो नपुंसकलिङ्गो अतिरैशब्दः । तस्य ह्रस्वत्वे—

सन्ध्यक्षराणामिदुतौ ह्रस्वादेशे ॥ २५४ ॥ सन्ध्यक्षराणां ह्रस्वादेशे क्रियमाणे सति इदुतौ भवतः । तपरकरणमसन्देहार्थं । इति एकारैकारस्य च ह्रस्व इकारः । ओकारौकारस्य ह्रस्व उकारः । अतिरि । नामिनः स्वरे इति नुरागमः । अतिरिणी अतिरीणि । पुनरपि । टादौ स्वरे भाषितपुंस्कं पुंवद्वा इति विकल्पेन पुंवद्भावः । यत्र पुंवद्भावस्तत्र सुरैशब्दवत् । अतिरिणा अतिराया । व्यञ्जनादौ प्रत्यये परे रैरिति आत्वं कुतः । एकदेशविकृतमनन्यवत् इति न्यायात् । अतिराभ्यां अतिराभिः । अतिरिणे अतिराये अतिराभ्यां अतिराभ्यः।इत्यादि । इति ऐकारान्ताः। ओकारान्तो नपुंसकलिङ्गश्चित्रगोशब्दः । तत्र ओकारस्य ह्रस्व उकारः । मृदुशब्दवत् । चित्रगु चित्रगुणी चित्रगूणि। पुनरपि । टादौ स्वरे भाषितपुंस्कं पुंवद्वा इति विकल्पः । चित्रगुणा चित्रगवा इत्यादि । इति ओकारान्ताः। औकारान्तो नपुंसकलिङ्गोऽतिनौशब्दः। तत्रापि औकारस्य ह्रस्वउकारः । तस्य प्रथमाद्वितीययोर्वारिशब्दवत् । अतिनु अतिनुनी अतिनूनि। पुनरपि । टादौ स्वरे भाषितपुंस्कं पुंवद्वा इति विकल्पः । अतिनुना अतिनावा इत्यादि । इत्यौकारान्तः ॥

इति स्वरान्ता नपुंसकलिङ्गाः ।

अथ व्यञ्जनान्ताः पुल्लिङ्गशब्दा यथाक्रमेणोच्यन्ते ।

कवर्गान्ताः पुल्लिङ्गशब्दा अप्रसिद्धाः । चकारान्तः पुल्लिङ्गः सुवाच्शब्दः । सौ । व्यञ्जनाच्चेति सिलोपः । दादेर्हस्य ग इत्यनुवर्तते ।

चवर्गदृगादीनां च ॥ २५५ ॥ चवर्गान्तस्य दृश् इत्येवमादीनां च गो भवति विरामे व्यञ्जनादौ च ।

*** पदान्ते धुटां प्रथमः ॥२५६॥** पदान्ते वर्तमानानां धुटां वर्णानां प्रथमो भवति । अघोषे प्रथम इत्यनुवर्तते ।

*** वा विरामे ॥२५७॥** विरामे धुटां प्रथमस्तृतीयो वा भवति । सुवाक् सुवाग् सुवाचौ सुवाचः । एवं सम्बुद्धौ । सुवाचं सुवाचौ सुवाचः । सुवाचा सुवाग्भ्यां सुवाग्भिः । सुवाचे सुवाग्भ्यां सुवाग्भ्यः । सुवाचः सुवाग्भ्यां सुवाग्भ्यः । सुवाचः सुवाचोः सुवाचां । सुवाचि सुवाचोः । सुपि । गत्वं ।

अघोषे प्रथमः ॥ २५८ ॥ अघोषे परे धुटां प्रथमो भवति । इति कत्वं । नामि करेत्यादिना सस्य षत्वं ।

कषयोगे क्षः ॥२५९॥ ककारषकारयोर्योगे क्षो भवति। सुवाक्षु ।

कवर्गप्रथमः शषसेषु द्वितीयो वा ॥ २६० ॥ कवर्गप्रथमस्य द्वितीयो भवति शषसेषु परतो वा । सुवाख्सु । प्रत्यञ्च्शब्दस्य तु भेदः । चवर्गदृगादीनां चेत्यत्र चवर्गग्रहणबलादञ्च् युज् क्रुञ्चां प्रागेव गत्वं ।

मनोरनुस्वारो धुटि ॥ २६१ ॥ अनन्त्ययोर्मकारनकारयोरनुस्वारो भवति धुटि परे ।

वर्गे वर्गान्तः ॥२६२॥ अनुस्वारो वर्गे परे वर्गान्तो भवति।

संयोगान्तस्य लोपः ॥२६३॥ संयोगान्तस्य लोपो भवति विरामे व्यञ्जनादौ च । प्रत्यङ् प्रत्यञ्चौ प्रत्यञ्चः । प्रत्यञ्चं प्रत्यञ्चौ।

व्यञ्जनान्नोऽनुषङ्गः ॥ २६४ ॥ धातुलिङ्गयोरन्त्याद्व्यञ्जनाद्यः पूर्वो नकारः सोऽनुषङ्गसंज्ञो भवति । अघुट् स्वरे लोपमित्यनुवर्तते। व्यञ्जने चैषां निरिति च ।

अनुषङ्गश्चाक्रुञ्चेत् ॥ २६५ ॥ क्रुञ्चेरिदनुबन्धवर्जितस्यानुषङ्गो लोपमापद्यते अघुट् स्वरे व्यञ्जने च परे ।

अञ्चेरलोपः पूर्वस्य च दीर्घः ॥ २६६ ॥ अञ्चेरलोपो[1] भवति पूर्वस्य च दीर्घो भवति अघुट्स्वरादौ । प्रतीचः । प्रतीचा प्रत्यग्भ्यां प्रत्यग्भिः। इत्यादि । एवं प्राञ्च् सम्यञ्च् प्रभृतयः । अक्रुञ्चेरिति किं। क्रुङ् क्रुञ्चौ क्रुञ्चः। क्रुञ्चं क्रुञ्चौ क्रुञ्चः। क्रुञ्चा क्रुङ्भ्यां क्रुङ्भिः । सप्तम्यां तु ।

ङात् ॥२६७॥ ङात्परस्य सस्य षो भवति। क्रुङ्षु इत्यादिः। इदनुबन्धवर्जितस्येति किं । सुकन्स्शब्दः । कसि गतिशासनयोः । अत एव वर्जनादिदनुबन्धानां धातूनां नुरागमोऽस्तीति । सुपूर्वकः सुष्ठु कंस्ते क्विप्। क्विप् सर्वापहारिलोपः । कृत्तद्धितसमासाश्चेति लिङ्गसंज्ञा । प्रथमैकवचनं । सि। व्यञ्जनाच्चेति सेर्लोपः । मनोरनुस्वारो धुटि इति नकारस्यानुस्वारे प्राप्ते सर्वविधिभ्यो लोपविधिर्बलवानिति न्यायात् संयोगान्तस्य लोप इति नित्यं सकारलोपः स्वरे परे मनोरनुस्वारो धुटि इति अनुस्वारः। सुकन्। महत्साहचर्याद्धातोर्दीर्घो न स्यात्। सुकंसौ सुकंसः। सुकंसं सुकंसौ सुकंसः । सुकंसा सुकन्भ्यां सुकन्भिः । इत्यादि । सम्बोधनेऽपि तद्वत् ।

नाञ्चेः पूजायां ॥ २६८ ॥ पूजार्थे वर्तमानस्य अञ्चेरनुषङ्गस्य लोपो भवति अघुट् स्वरे व्यञ्जने च परे। प्राङ् प्राञ्चौ प्राञ्चः। हे प्राङ् हे प्राञ्चौ हे प्राञ्चः। प्राञ्चं प्राञ्चौ प्राञ्चः । प्राञ्चा प्राङ्भ्याम् प्राङ्भिः। इत्यादि । सुपि विशेषः । ङात्परस्य सस्य षो भवति । प्राङ्षु । अञ्चु गति पूजनयोः । प्रपूर्वकः प्राञ्चतीति क्विप् सर्वापहारिलोपः । कृत्तद्धितसमासाश्चेति लिङ्गसंज्ञा । यत्र गत्यर्थस्तत्र अनुषङ्गश्चाक्रुञ्चेत् इत्यनुषङ्गलोपः। यत्र पूजार्थस्तत्र नाञ्चेः पूजायामिति अघुट् स्वरे व्यञ्जने अनुषङ्गलोपो न भवति । अदस्यञ्च्शब्दस्य तु भेदः। अञ्चुगतिपूजनयोः। अञ्चु अदस्पूर्वः अमुमञ्चतीति क्विप् चेति क्विप् प्रत्ययः । क्विपि सति।

विष्वग्देवयोश्चान्त्यस्वरादेरद्र्यञ्चतौ क्वौ ॥२६९॥ विष्वग्देवयोः सर्वनाम्नश्चान्त्यस्वरादेरवयवश्चाञ्चतौ क्विबन्ते परेऽद्रिरादे-

---

१ अस्य लोपः अलोपः ।

शो भवति । इति सकारसहितस्य अकारस्य अद्रिआदेशः इवर्णो यत्वं। अदद्यञ्च् इति स्थिते सति ।

अदद्र्यञ्चो दस्य बहुलं ॥ २७० ॥ अदद्र्यञ्चो दकारस्य बहुलं मकारो भवति मात् परस्य रस्य उत्वं । अदमुयङ् अदमुयञ्चौ अदमुयञ्चः । एवं सम्बुद्धौ । अदमुयञ्चं अदमुयञ्चौ ।

नोतो वः ॥ २७१ ॥ अदद्र्यञ्च् इत्येतस्य उतो वत्वं न भवति । अनुषङ्गश्चाक्रुञ्चेत् इति नलोपः । अञ्चेरलोपः पूर्वस्य च दीर्घः इति अकारलोपः पूर्वस्य च दीर्घो भवति । अदमुईचः । अदमुईचा । अनुषङ्गश्चाक्रुञ्चेत् नलोपः । चवर्गदृगादीनां च गत्वं । अदमुयग्भ्यां अदमुयग्भिः । पूर्ववत् अनुषङ्गलोपो गत्वं च । अघोषे प्रथमः । क् । नामिकरेत्यादिना षत्वं । अदमुयक्षु । अमुद्र्यङ् अमुद्र्यञ्चौ अमुद्र्यञ्चः । अमुद्र्यञ्चं अमुद्र्यञ्चौ अमुद्रीचः । अमुद्रीचा अमुद्र्यग्भ्यां अमुद्र्यग्भिः । अमुद्र्यक्षु ॥ अमुमुयङ् अमुमुयञ्चौ अमुमुयञ्चः । अमुमुयञ्चं अमुमुयञ्चौ अमुमुईचः । अमुमुईचा अमुमुयग्भ्यां अमुमुयग्भिः । अमुमुयक्षु । अदद्र्यङ् अदद्र्यञ्चौ अदद्र्यञ्चः । अदद्र्यञ्चं अदद्र्यञ्चौ अदद्रीचः । अदद्रीचा अदद्र्यग्भ्यां अदद्र्यग्भिः । अदद्र्यक्षु ॥

श्लोकः ।

परतः केचिदिच्छन्ति केचिदिच्छन्ति पूर्वतः ।
उभयोः केचिदिच्छन्ति केचिन्नेच्छन्ति चोभयोः ॥१॥

उदञ्च्शब्दस्य तु भेदः । उदङ् उदञ्चौ उदञ्चः । उदञ्चं उदञ्चौ । शसादौ ।

उदङ् उदीचिः ॥२७२॥ उदङ् उदीचिर्भवति अघुट् स्वरादौ । उदीचः । उदीचा उदग्भ्यां उदग्भिः । इत्यादिः । तिर्यङ् शब्दस्य तु भेदः। तिर्यङ् तिर्यञ्चौ तिर्यञ्चः । तिर्यञ्चं तिर्यञ्चौ। शसादौ—

तिर्यङ् तिरश्चिः ॥ २७३ ॥ तिर्यङ्शब्दः तिरश्चिर्भवति अघुट् स्वरादौ । तिरश्चः । तिरश्चा तिर्यग्भ्यां तिर्यग्भिः । इत्यादि ।

छकारान्तः पुल्लिङ्गः प्राच्छ्शब्दः । सौ । विरामे व्यञ्जनादिष्विति वर्तते ।

हसषछान्तेजादीनां डः ॥ २७४ ॥ हसषछान्तानां यजादीनां च डो भवति विरामे व्यञ्जनादौ च । प्राट् प्राड् द्विर्भावं स्वरपरश्छकारः । प्राच्छौ प्राच्छः । संबोधनेऽपि तद्वत् । प्राच्छं प्राच्छौ प्राच्छः । प्राच्छा प्राड्भ्यां प्राड्भिः । इत्यादि । इति छकारान्ताः । जकारान्तः पुल्लिङ्गो युज्शब्दः ।

युजेरसमासे नुर्घुटि ॥ २७५ ॥ युज्शब्दस्य असमासे नुरागमो भवति घुटि परे ।

आगम उदनुबन्धः स्वरादन्त्यात्परः ॥२७६॥ उदनुबन्ध आगमोऽन्त्यात्स्वरात् परो भवति । मित्रवदागमः । अथवा प्रकृतिप्रत्यययोरनुपघाती आगम उच्यते । शत्रुवदादेशः । युङ् युञ्जौ युञ्जः । संबोधनेपि तद्वत् । युञ्जं युञ्जौ युजः । युजा युग्भ्यां युग्भिः इत्यादि ॥ अश्वयुजादीनां समासत्वान्नुरागमो नास्ति । अश्वयुग् अश्वयुक् अश्वयुजौ अश्वयुजः । संबोधनेपि तद्वत् । इत्यादि एवं ऋत्विज् गुणभाज् प्रभृतयः । माधुमस्ज् शब्दस्य तु भेदः ।

संयोगादेर्धुटः ॥२७७॥ संयोगादेर्धुटो लोपो भवति विरामे व्यञ्जनादौ च । व्यञ्जनाच्च सिलोपश्चवर्गदृगादीनां च गकारककारौ । साधुमक् साधुमग् ।

*** धुटां तृतीयः ॥२७८॥** धुटां तृतीयो भवति घोषवति सामान्ये इति सस्य तृतीयत्वे प्राप्ते लृवर्णतवर्गलसादन्त्या इति न्यायात् । सकारस्य दकारः । तवर्गश्चटवर्गयोगे चटवर्गौ इति दकारस्य जकारः साधुमज्जौ इत्यादि । देवेज्शब्दस्य तु भेदः । सौ । हशषछान्ते इत्यादिना डत्वं । देवेट् देवेज् देवेजौ देवेजः । संबोधनेपि तद्वत् । देवेजम् देवेजौ देवेजः । देवेजा देवेड्भ्यां देवेड्भिः ।

टात् सुसादिर्वा ॥ २७९ ॥ टकारात्परः सुसादिर्वा भवति । तेन देवेट्त्सु देवेट्सु । एवंसंम्राज्प्रभृतयः । ञन्तटवर्गान्ता अप्रसिद्धाः ।

तकारान्तः पुल्लिङ्गो मरुत्शब्दः । मरुत् मरुद् मरुतौ मरुतः । संबोधनेऽपि तद्वत् । मरुतं मरुतौ मरुतः । मरुता । धुटां तृतीयः इत्यनेन दत्वे मरुद्भ्यामित्यादि । उदनुबन्धस्य भवन्त्शब्दस्य तु भेदः । दीर्घमामि सनौ इति वर्तते ।

अन्त्वसन्तस्य चाधातोस्सौ ॥२८०॥ अन्तु अस् इत्येवमन्तस्य धातोरस्य दीर्घो भवति सौ असम्बुद्धौ । लिङ्गान्तनकारस्य इति नकारस्य लोपे प्राप्ते ।

नसंयोगान्तावलुप्तवच्च पूर्वविधौ ॥२८१॥ नकारसंयोगान्तौ लुप्तावप्यलुप्तवद्भवतः पूर्वविधौ दीर्घादिके कर्त्तव्ये । नकारग्रहणं राजन्शब्दार्थम् । भवान् भवन्तौ भवन्तः ।

भवतो वादेरुत्वं सम्बुद्धौ ॥ २८२ ॥ उदनुबन्धस्य भवन्त्शब्दस्य वादेरुत्वं भवति वा सम्बुद्धौ । हे भोः । सन्निपातलक्षणविधिरनिमित्तं तद्विघातस्य । योयमाश्रित्य समुत्पन्नः स तं प्रति सन्निपातः । हे भवन् हे भवन्तौ हे भवन्तः । भवन्तं भवन्तौ भवतः । भवता भवद्भ्यां भवद्भिः । इत्यादि । एवं भगवन्त् अघवन्त् शब्दौ । सम्बुद्धिं विना गोमन्त् धनवन्त् यावन्त् तावन्त् एतावन्त् इयन्त् कियन्त् प्रभृतयः । एते शब्दाः केन प्रकारेण सिद्धाः । भगं ज्ञानं भगमस्यास्तीति भगवान् । अघं पापमस्यास्तीति अघवान् । गावोऽस्य सन्तीति गोमान् । धनमस्यास्तीति धनवान् । तदस्यास्तीति मत्वंत्विन् इति वन्तुप्रत्ययः ।

यत्तदेतेभ्यो डावन्तुः ॥२८३॥ यद् तद् एतद् इत्येतेभ्यः परतः डावन्तुः प्रत्ययो भवति परिमाणेऽर्थे । डकारः ।

डानुबन्धेऽन्त्यस्वरादेर्लोपः ॥ २८४ ॥ डकार इति अन्त्यस्वरादेर्लोपार्थः । उकार उच्चारणार्थः । यत्परिमाणमस्य यावान् । तत्परिमाणमस्य तावान् । एतत्परिमाणमस्य एतावान् ।

---

१ यः संबुद्धेः सकारमाश्रित्योत्पन्नः स उकारस्तं संबुद्धेः सकारं प्रति सन्निपातः अयं सन्निपातलक्षणविधिः । तद्विघातस्य संबुद्धिसिलोपस्य अनिमित्तं हेतुर्न भवतीत्यर्थः । वाम्शसोरिति सूत्राद्वा इति वर्त्तते ॥

इदमो डियन्तुः ॥२८५॥ इदमः परो डियन्तुः प्रत्ययो भवति परिमाणेऽर्थे । डकारउकारौ पूर्ववत् । इदं परिमाणमस्य इयान् ।

किमो डियन्तुः ॥२८६॥ किमः शब्दात्परो डियन्तुः प्रत्ययो भवति परिमाणेऽर्थे । डकारउकारौ पूर्ववत् । किम्परिमाणमस्य कियान् पूर्वमन्त्यस्वरादेर्लोपं कृत्वा पश्चादेकदेशविकृतमनन्यवदिति न्यायात् । तत्रेदमिरिति इ आदेशः । इवर्णावर्णयोर्लोप इत्यादिना इकारलोपः । अनेन प्रकारेण सिद्धा भवन्ति । नीतकम् । भगवान् भगवन्तौ भगवन्तः । भगवन्तं भगवन्तौ भगवतः । भगवता भगवद्भ्यां भगवद्भिः । सुपि । भगवत्सु । एवं सर्वत्र । सम्बोधने ।

भगवदघवतोश्च॥२८७॥ भगवदघवतोश्च वादेरवयवस्य उत्वं वा भवति सम्बुद्धौ सौ परे । एवं संबुद्धिं विना गोमन्त् धनवन्त् यावन्त् तावन्त् एतावन्त् इयन्त् कियन्त् प्रभृतयः । यत्प्रमाणमस्य यावन्त् । हे भगो हे भगवन् । हे अघो हे अघवन् । अन्यत्र हे गोमन् । हे धनवन् । हे यावन् । हे तावन् । हे एतावन् । हे इयन् । हे कियन् । शन्तृङन्तक्विबन्तानां धातुत्वं न त्यजति । शन्तृङन्तस्य क्विबन्तानां च । भवन्तृशब्दस्य धातुत्वात् सौ दीर्घो न भवति । भवन् भवन्तौ भवन्तः । इत्यादि । एवं पचन् पठन् प्रभृतयः । ददन्तृशब्दस्य तु भेदः । युजेरसमासे नुर्घुटि इत्यनुवर्त्तते ।

अभ्यस्तादन्तिरनकारः ॥ २८८ ॥ अभ्यस्तात्परोऽन्तिरनकारो भवति घुटि परे । ददत् ददद् ददतौ ददतः । इत्यादि । एवं दधन्त् जक्षन्त् जाग्रन्त् प्रभृतयः । महन्तृशब्दस्य तु भेदः । दीर्घमामि सनौ घुटि चासम्बुद्धौ इति वर्त्तते ।

सान्तमहतोर्नोपधायाः ॥ २८९ ॥ सान्त् महन्त् इत्येतयोर्नकारस्योपधाया दीर्घो भवति असम्बुद्धौ घुटि परे । महान् म-

हान्तौ महान्तः । हे महन् हे महान्तौ हे महान्तः । महान्तं महान्तौ महतः । महता महद्भ्यां महद्भिः इत्यादि ॥ इति तकारान्ताः ॥ थकारान्तोऽग्निमथ् शब्दः । अग्निमत् अग्निमद्[1] अग्निमथौ अग्निमथः । संबोधनेऽपि तद्वत् । अग्निमथं अग्निमथौ अग्निमथः । अग्निमथा अग्निमद्भ्यां अग्निमद्भिः इत्यादि ॥ इति थकारान्तः ॥ दकारान्तः पुलिङ्गस्तत्वविद्शब्दः । तत्ववित् तत्वविद् तत्वविदौ तत्वविदः । इत्यादि । द्विपाद्शब्दस्य तु भेदः । द्विपात् द्विपाद् द्विपादौ द्विपादः । संबोधनेऽपि तद्वत् । द्विपादं द्विपादौ । सशादौ ।

पात्पदं समासान्तः ॥२९०॥ समासान्तः पाच्छब्दः पदमापद्यते अघुटि स्वरे व्यञ्जने च परे । द्विपदः । द्विपदा द्विपाद्भ्यामित्यादि । एवं चतुष्पाद् व्याघ्रपाद् प्रभृतयः । त्यद्शब्दस्य तु भेदः । सौ ।

तस्य च ॥ २९१ ॥ तस्य त्यदादीनां तकारस्य सकारो भवति सौ परे । स्यः त्यौ त्ये । अन्यत्र सर्वशब्दवत् । एवं यत् तद् शब्दौ । यः यौ ये । एषः एतौ एते इत्यादि । सः तौ ते इत्यादि ।

एतस्य चान्वादेशे द्वितीयायां चैनः ॥ २९२ ॥ एतस्य इदमश्च टौसोर्द्वितीयायां च एनादेशो भवति कथितस्यानुकथनविषये । एनं एनौ एनान् । एनेन एनयोः । इति दकारान्ताः ॥ धकारान्तः पुलिङ्गस्तत्वबुध्शब्दः । विरामव्यञ्जनादिष्विति वर्त्तते ।

हचतुर्थान्तस्य धातोस्तृतीयादेरादि चतुर्थत्वमकृतवत् ॥ २९३ ॥ हचतुर्थान्तस्य तृतीयादेर्धातोरादि चतुर्थत्वं भवति विरामे व्यञ्जनादौ च सचाकृतवत् । तत्वभुत् तत्वभुद् तत्वबुधौ तत्वबुधः । संबोधनेऽपि तद्वत् । तत्वबुधा तत्वभुद्भ्यां तत्वभुद्भिः इत्यादि । इति धकारान्ताः ॥ नकाराऽन्तः पुलिङ्गः राजन् शब्दः । घुटि च

---

[1] वाविरामे धुटां तृतीय इति थकारस्य दकारः ।

सम्बुद्धाविति दीर्घः । लिङ्गान्तनकारस्येति नकारलोपः। राजा राजानौ राजानः ।

न सम्बुद्धौ ॥ २०४ ॥ लिङ्गान्तनकारस्य लोपो न भवति सम्बुद्धौ । हे राजन् । राजानं राजानौ (अघुट्स्वरे अवमसंयोगादनो इत्यादिना लोपः)

तवर्गश्चटवर्गयोगे चटवर्गौ ॥ २०५ ॥ अनन्त्यस्तवर्गश्चटवर्गयोगे चटवर्गौ प्राप्नोति आन्तरतम्यात् । राज्ञः । राज्ञा । व्यञ्जनादौ नलोपः । अकारो दीर्घं घोषवतीति दीर्घे प्राप्ते नसंयोगान्तावलुप्तवच्च पूर्वविधौ इति नकारो लुप्तवद्भवति । राजभ्यां राजभिः। राज्ञे राजभ्यां राजभ्यः । ङौ । ईङ्योर्वेति अलोपो वा भवति । राज्ञि राजनि राज्ञोः राजसु। एवं तक्षन् मूर्धन् प्रभृतयः । आत्मन्शब्दस्य तु भेदः । आत्मा आत्मानौ आत्मानः। हे आत्मन् इत्यादि । आत्मानं आत्मानौ । अघुट्स्वरे । अवमसंयोगादिति प्रतिषेधादनोऽलोपो नास्ति। आत्मनः । आत्मना । इत्यादि। एवं सुपर्वन् सुशर्मन् ब्रह्मन् कृतवर्मन् प्रभृतयः ॥ करिन् शब्दस्य तु भेदः । सौ। इन्हन् इत्यादिना दीर्घः। करी करिणौ करिणः। हे करिन् इत्यादि । एवं दण्डिन् हस्तिन् गोमन् तपस्विन् प्रभृतयः ॥ वृत्रहन् शब्दस्य तु भेदः ॥ वृत्रहा वृत्रहणौ वृत्रहणः । हे वृत्रहन् । वृत्रहणं वृत्रहणौ । अघुट्स्वरे लोपे कृते । इन्हन् इत्यादिना दीर्घः । अस्मादेव हन उपधायाः सावेव दीर्घः क्विपि न दीर्घः ॥

हनेर्हेर्घिरुपधालोपे॥२०६॥ हनेरुपधाया लोपे कृते हेः स्थाने घिर्भवति। घत्वे नस्य णत्वाभावः। वृत्रघ्नः । वृत्रघ्ना वृत्रहभ्यां वृत्रहभिः इत्यादि। एवं ब्रह्महन् भ्रूणहन् ऋणहन् एते शब्दाः । पूषन् शब्दस्य तु भेदः । सौ दीर्घः। पूषा पूषणौ पूषणः। हे पूषन् । पूषणं पूषणौ ।

हन्मासदोषपूषां शसादौ स्वरे वा ॥ २०७ ॥ हन् मास दोष पूषन् इत्येतेषां उपधायाः उत्तरस्य लोपो वा भवति। पूष्णः ।

पूष्णा पूषभ्यां पूषभिः । इत्यादि । एवं अर्यमन् शब्दः । अर्वन्शब्द-स्य तु भेदः । सौ ।

अर्वन्नर्वन्तिरसावनञ् ॥ २९८ ॥ अर्वन्शब्दोऽर्वन्तिर्भवति असावनञ् परश्चेति । अर्वा अर्वन्तौ अर्वन्तः । हे अर्वन् हे अर्वन्तौ हे अर्वन्तः । अर्वन्तम् अर्वन्तौ अर्वन्तः । अर्वता अर्वद्भ्याम् अर्वद्भिः। इत्यादि । नञ्परश्चेत् आत्मन्शब्दवत् । अनर्वा अनर्वाणौ अनर्वाणः। इत्यादि । श्वन् शब्दस्य तु भेदः । सौ । श्वा श्वानौ श्वानः । हे श्वन् । श्वानं श्वानौ । अघुट्स्वरादौ सेट्कस्याप्यनुवर्त्तते ।

श्वयुवमघोनां च ॥ २९९ ॥ श्वन् युवन् मघवन् एषां वशब्दस्योत्वं भवति अघुट् स्वरे परे । शुनः । श्वना श्वभ्यां श्वभिः । इत्यादि । एवं युवन्शब्दः । युवा । युवानौ युवानः । हे युवन् । युवानं युवानौ यूनः । यूना युवभ्यां युवभिः । इत्यादि ॥ मघवन्शब्द-स्य तु भेदः । सौ । अर्वन्नर्वन्तिरित्यनुवर्तते ।

सौ च मघवान्मघवा वा ॥ ३०० ॥ विभक्तौ सौ च परे मघवन् शब्दो मघवन्त् भवति वा ॥ अन्त्वसन्तस्येति दीर्घे प्राप्ते नि-पातनाद्दीर्घः । मघवान् मघवन्तौ मघवन्तः । संबोधनेऽपि तद्वत् । मघवन्तं मघवन्तौ मघवतः । मघवता मघवद्भ्यां मघवद्भिः । इत्यादि । पक्षे । मघ-वा मघवानौ मघवानः । मघवानं मघवानौ मघोनः । मघोना मघवभ्यां मघवभिः । इत्यादि । श्वानमाचष्टे । तत्करोति तदाचष्टे इन् । इनि लिङ्गस्यानेकाक्षरस्येत्यादिना अन्त्यस्वरादेर्लोपे प्राप्ते ।

न शुनः ॥ ३०१ ॥ श्वन् इत्येतस्य अन्त्यस्वरादेर्लोपो न भवति इनि परे । श्वानयति । मघवानमाचष्टे मघवयति ।

स्थूलदूरयुवक्षिप्रक्षुद्राणामन्तस्थादेर्लोपो गुणश्च नामिनाम् ॥ ३०२ ॥ स्थूलदूरयुवक्षिप्रक्षुद्र इत्येतेषामन्तस्थादेर्लो-पो भवति नामिनां गुणश्च इनि परे । स्थूलमाचष्टे स्थवयति । दूरमा-चष्टे दवयति । युवानमाचष्टे यवयति । क्षिप्रमाचष्टे क्षेपयति । क्षुद्र-

माचष्टे क्षोदयति । इनि लिङ्गस्यानेकाक्षरस्येत्यादिना अन्त्यस्वरादेर्लोपः । अनि च विकरणे गुणः सर्वत्र ॥ पञ्चन् शब्दस्य तु भेदः । तस्य बहुवचनमेव । कतेश्च जश्शसोर्लुक् । पञ्च । पञ्च । पञ्चभिः । पञ्चभ्यः । पञ्चभ्यः । आमि च नुरित्यनुवर्त्तते ।

संख्यायाः ष्णान्तायाः ॥ ३०३ ॥ षकारनकारान्तायाः संख्यायाः नुरागमो भवति आमि परे । दीर्घमामि सनौ इति अनुवर्तते ।

नान्तस्य चोपधायाः ॥ ३०४ ॥ नान्तस्य चोपधाया दीर्घो भवति सनावामि परे । पञ्चानाम् । पञ्चसु । एवं सप्तन् नवन् दशन् प्रभृतयः ॥ अष्टन्शब्दस्य तु भेदः । तस्यापि बहुवचनमेव ।

अष्टनः सर्वासु ॥ ३०५ ॥ अष्टन्शब्दान्तस्य आ भवति सर्वासु विभक्तिषु । येन विधिस्तदन्तस्य इति नकारस्य आकारः । सवर्णे दीर्घः ।

औ तस्माज्जश्शसोः ॥ ३०६ ॥ तस्मादष्टनः कृताकारात्परयोर्जश्शसोः स्थाने और्भवति । अष्टौ । अष्टौ । तस्माद्ग्रहणं किमर्थम् । आत्वस्यानित्यार्थं । तेन औत्वाभावे जश्शसोर्लुक् इत्यनेन जश्शसोर्लोपः । अष्ट । अष्ट । अष्टाभिः अष्टभिः । अष्टाभ्यः अष्टभ्यः । अष्टाभ्यः अष्टभ्यः । आमि आत्वं संख्यायाः ष्णान्ताया इति अत्र अन्तग्रहणाधिक्यात् । भूतपूर्वनान्ताया अपि आमि नुरागमः । अष्टानाम् । अष्टसु अष्टासु । इति नकारान्तः ॥ पफबभान्ता अप्रसिद्धाः । मकारान्तः पुलिङ्गः किम् शब्दः ।

किं कः ॥ ३०७ ॥ किंशब्दः को भवति विभक्तौ परतः । कः कौ के । कं कौ कान् । केन काभ्यां कैः । इत्यादि । इदम् शब्दस्य तु भेदः ।

इदमियमयं पुंसि ॥ ३०८ ॥ इदम्शब्दस्य इयं भवति स्त्रियामयं च पुंसि इदं नपुंसके सौ परे । अयम् । अन्यत्र त्यदाद्यत्वम् ।

दोऽद्वेर्मः ॥ ३०९ ॥ त्यदादीनां दकारस्य मो भवति अद्वेर्विभक्तौ । इमौ इमे । इमं इमौ इमान् ।

टौसोरनः ॥ ३१० ॥ अग्वर्जितस्य इदंशब्दस्य अनादेशो भवति टौसोः परतः । अनेन ।

अद् व्यञ्जनेऽनक् ॥ ३११ ॥ अग्वर्जितस्य इदंशब्दस्य अद्भवति व्यञ्जनादौ विभक्तौ परतः । आभ्याम् ।

तस्माद्भिस्भिर्[1] ॥ ३१२ ॥ तस्मात्कृताकारादिदमः परो भिस् भिर् भवति । एभिः । अस्मै आभ्याम् एभ्यः । अस्मात् आभ्याम् एभ्यः । अस्य अनयोः एषाम् । अस्मिन् अनयोः एषु । अन्वादेशे पूर्ववत् । इति मकारान्तः ॥ यकारान्तोऽप्रसिद्धः । रेफान्तः पुल्लिङ्गश्चत्वार्शब्दः । तस्य बहुवचनमेव । चत्वारः ।

चतुरो वा शब्दस्योत्वम् ॥ ३१३ ॥ चत्वार् इत्येतस्य वाशब्दस्य उत्वं भवति अघुट्स्वरे व्यञ्जने च परे । चतुरः ।

न रेफस्य घोषवति ॥ ३१४ ॥ रेफस्य घोषवति परे विसर्जनीयो न भवति । चतुर्भिः । चतुर्भ्यः । चतुर्भ्यः ।

आमि चतुरः ॥ ३१५ ॥ चत्वार्शब्दस्य नुरागमो भवति आमि परे । चतुर्णां । विसर्जनीये प्राप्ते ।

रः सुपि ॥ ३१६ ॥ रो रकारस्य विसर्जनीयः सुपि परे न भवति । इति निषेधः । चतुर्षु । इति रेफान्तः ॥ लकारान्तोऽप्रसिद्धः । वकारान्तः पुल्लिङ्गः सुदिव्शब्दः । सौ ।

औ सौ ॥ ३१७ ॥ दिवो वकारस्य औ भवति सौ परे । सुद्यौः सुदिवौ सुदिवः ।

वाम्याः ॥ ३१८ ॥ दिवो वकारस्य वा आकारो भवति अमि परे । सुद्यां सुदिवं सुदिवौ सुदिवः । सुदिवा ।

दिव उद्व्यञ्जने ॥ ३१९ ॥ दिवो वकारस्य उत् भवति व्य-

---

[1] इदं सूत्रमैस्बाधनार्थं ।

झने परे । सुद्युभ्यां सुद्युभिः । इत्यादि । इति वकारान्तः ॥ शकारान्तः पुल्लिङ्गो विश् शब्दः । हशषछान्ते इत्यादिना डत्वम् । विट् विड् विशौ विशः । संबोधनेऽपि तद्वत् इत्यादि । तादृश् शब्दस्य तु भेदः । चवर्गदृगादीनां चेति गत्वम् । तादृक् तादृग् तादृशौ तादृशः । एवं सदृश् यादृश् एतादृश् कीदृश् ईदृश् अमूदृश् प्रभृतयः । इति शकारान्ताः ॥ षकारान्तः पुल्लिङ्गो रत्नमुष् शब्दः । रत्नमुट् रत्नमुड् रत्नमुषौ रत्नमुषः । रत्नमुषं रत्नमुषौ रत्नमुषः । रत्नमुषा रत्नमुड्भ्यां रत्नमुड्भिः इत्यादि । साधुतक्ष् शब्दस्य तु भेदः ।

*** संयोगादेर्धुटः** ॥३२०॥ संयोगादेर्धुटो लोपो भवति विरामे व्यञ्जनादौ च । व्यञ्जनाच्च सेर्लोपः ।

*** हशषछान्तेजादीनां डः** ॥ ३२१ ॥ हशषछान्तानां यजादीनां च डो भवति विरामे व्यञ्जनादौ च । इति डत्वं साधुतट् साधुतड् साधुतक्षौ साधुतक्षः । संबोधनेऽपि तद्वत् । साधुतक्षं साधुतक्षौ साधुतक्षः । साधुतक्षा साधुतड्भ्यां साधुतड्भिः इत्यादि । शष्शब्दस्य तु भेदः । तस्य बहुवचनमेव । जश्शसोर्लुक् । षट् षड् षड्भिः । षड्भ्यः । आमि नुरागमो डत्वं च ।

षडो णो ने ॥३२२॥ संख्यायाः ष्णान्तायाः षडो णो भवति विभक्तौ ने परे । षण्णां । षट्सु षट्त्सु इत्यादि ॥ सकारान्तः पुल्लिङ्गः सुवचस् शब्दः । सौ । अन्त्वसन्तस्येत्यादिना दीर्घः । सुवचाः सुवचसौ सुवचसः । हे सुवचः हे सुवचसौ हे सुवचसः । सुवचसं सुवचसौ सुवचसः । सुवचसा सुवचोभ्यां सुवचोभिः । इत्यादि । एवं चन्द्रमस् । पीतवासस् । स्थूलशिरस् । हिरण्यरेतस् । सुश्रोतस् । प्रभृतयः । उशनस् शब्दस्य तु भेदः ।

उशनस्पुरुदंसोऽनेहसां सावनन्तः ॥ ३२३ ॥ उश-

---

१ सैवदृश्यत इति तादृक् ॥ २ ते-केयजादयः यज्-सृज्-मृज्-भाज्-राज् परिव्राज् इति यजादयः ॥ ३ अकारः किमर्थः उत्तरार्थः सख्युरंतः अन्भवतीत्यत्र अनूप्रयोजनम् ॥

नस् पुरुदंसस् अनेहस् इत्येतेषामन्तोऽन् भवति सौ परे असम्बुद्धौ । उशना उशनसौ उशनसः । नञा निर्दिष्टमनित्यम् ।

श्लोकः ।

सम्बोधने तूशनसस्त्रिरूपं सान्तं तथा नान्तमथाप्यदन्तम् ।
श्रीव्याघ्रभूतिप्रतिपन्नमेतं नञापि निर्दिष्टमनित्यमेव ॥ १ ॥

हे उशनः हे उशनन् हे उशन हे उशनसौ हे उशनसः । उशनसं उशनसौ उशनसः । उशनसा उशनोभ्यां उशनोभिः । इत्यादि । एवं पुरुदंसस् अनेहस् शब्दौ सम्बुद्धिं विना । विद्वन्स् शब्दस्य तु भेदः । सौ । सान्तमहतोर्नोपधाया इति दीर्घः । विद्वान् विद्वांसौ विद्वांसः । हे विद्वन् हे विद्वांसौ हे विद्वांसः । विद्वांसं विद्वांसौ ।

अघुट्स्वरादौ सेट्[1]कस्यापि वन्से[2]र्वशब्दस्योत्वम् ॥ ३२४ ॥ सेट्कस्याप्यसेट्कस्यापि वन्से[3]र्वशब्दस्योत्वं भवति अघुट् स्वरादौ । विदुषः विदुषा ।

विरामव्यञ्जनादिष्वनडुन्नहिवन्सीनां च ॥३२५॥ विरामे व्यञ्जनादौ च अनड्वाहन्, हिवन्सीनामन्तस्य दो भवति । विद्वद्भ्यां विद्वद्भिः । इत्यादि । पेचिवान् पेचिवांसौ पेचिवांसः । पेचिवांसं पेचिवांसौ । निमित्ताभावे नैमित्तिकस्याप्यभावः । इतीडभावः । अघुट्स्वरादौ सेट्कस्येति उत्वम् । पेचुषः पेचुषा पेचिवद्भ्यां पेचिवद्भिः । पेचुषे पेचिवद्भ्यां पेचिवद्भ्यः । एवं तेनिवन्स् प्रभृतयः । इत्यादि । उखाश्रस् शब्दस्य तु भेदः । सौ ।

स्रसिध्वसोश्च ॥ ३२६ ॥ स्रसिध्वसोर्लिङ्गयोरन्तस्य दो भवति विरामे व्यञ्जनादौ च । उखाश्रत् उखाश्रद् ।

घुट् स्वरे नुः ॥ ३२७ ॥ स्रसिध्वसोर्लिङ्गयोर्नुरागमो भवति घुट् स्वरे परे । उखा[3]श्रंसौ उखाश्रंसः । संबोधनेऽपि तद्वत् । उखाश्रंसं

---

१ सेट्कस्य. इडागमेन सहितस्य ॥ २ वन्सीतिविद्वन्नित्यादिस्थले रूपम् ॥ ३ आगम उदनुबन्धः स्वरादन्त्यात्परः ॥

उखाश्रंसौ उखाश्रसः । उखाश्रसा उखाश्रद्भ्याम् उखाश्रद्भिः । उखाश्रत्सु । एवं पर्णध्वस् शब्दः । अदस् शब्दस्य तु भेदः । तदाद्यत्वम् ।

सौ सः ॥ ३२८ ॥ त्यदादीनां दकारस्य सकारो भवति सौ परे ।

सावौ सिलोपश्च ॥ ३२९ ॥ अदसोऽन्तस्य और्भवति स्वरे परे सिलोपश्च । असौ । द्वित्वे ॥

अदसः पदे मः ॥ ३३० ॥ अदसः पदे सति दस्य मो भवति ।

उत्वं मात् ॥ ३३१ ॥ अदसो मात्परो वर्णमात्रस्योत्वं भवति आन्तरतम्यात् । अमू । जसि ॥

एद्बहुत्वे त्वी ॥ ३३२ ॥ अदसो मात्परो बहुत्वे निष्पन्ने एदीर्भवति । अमी । अमुं अमू अमून्[1] ।

अदो मुश्च ॥ ३३३ ॥ अदसो मुरादेशो भवति टावचनस्य च नादेशो अस्त्रियाम् । अमुना अमूभ्याम् ।

अदसश्च ॥ ३३४ ॥ अदसोऽगृवर्जितात्परो भिस् भिर् भवति । धुट्येत्वम् अमीभिः । अमुष्मै अमूभ्याम् अमीभ्यः । अमुष्मात् अमूभ्यां अमीभ्यः । अमुष्य अमुयोः अमीषाम् । अमुष्मिन् अमुयोः अमीषु ॥ श्रेयन्स् शब्दस्य तु भेदः ॥ श्रेयान् श्रेयांसौ सेयांसः ॥ हे श्रेयान् । हे श्रेयांसौ हे श्रेयांसः । श्रेयांसं श्रेयांसो श्रेयांसः । श्रेयसा श्रेयोभ्यां श्रेयोभिः । इत्यादि । पुमन्स्शब्दस्य तु भेदः । पुमान् पुमांसौ पुमांसः । हे पुमन् । पुमांसं पुमांसौ ।

पुंसोऽन्शब्दलोपः ॥ ३३५ ॥ पुमान्स् इत्येतस्य अन्शब्दस्य लोपो भवति अधुट् स्वरे व्यञ्जने च परे । पुंसः । पुंसा ।

स्यादिधुटि पदान्तवत् ॥ ३३६ ॥ स्यादिधुटि परे पदान्तवत्कार्यं[2] भवति । इति न्यायात् । मोऽनुस्वारव्यञ्जने । पुंभ्यां पुंभिः । इत्यादि । इति सकारान्ताः ॥ हकारान्तः पुल्लिङ्गो मधुलिह् शब्दः । मधुलिट् मधुलिड् मधुलिहौ मधुलिहः । संबोधनेऽपि तद्वत् । मधुलिट्सु ।

---

१ शसि सस्य च नः ॥ २ पदान्तवत्कार्येकिं वर्ग्ये तद्वर्गपञ्चममिति विकल्पः ॥

एवं पुष्पलिह् इत्यादि । गोदुह् शब्दस्य तु भेदः । हचतुर्थान्तस्य धातोरित्यादिना चतुर्थत्वम् ।

दादेर्हस्य गः ॥ ३३७ ॥ दादेर्हकारस्य गकारो भवति विरामे व्यञ्जनादौ च । गोधुक् गोधुग् गोदुहौ गोदुहः । संबोधनेऽपि तद्वत् । गोदुहं गोदुहौ गोदुहः । गोदुहा गोधुग्भ्यां गोधुग्भिः इत्यादि । मुह्शब्दस्य तु भेदः ।

मुहादीनां वा ॥ ३३८ ॥ मुहादीनां हकारस्य गकारो भवति वा विरामे व्यञ्जनादौ च । मुक् मुग् मुट् मुड् मुहौ मुहः । मुहं मुहौ मुहः । मुहा मुग्भ्यां मुड्भ्यां मुग्भिः मुड्भिः । इत्यादि । एवं द्रुह् स्नुह् स्निह् प्रभृतयः । प्रष्ठवाह्शब्दस्य तु भेदः । प्रष्ठवाट् प्रष्ठवाड् प्रष्ठवाहौ प्रष्ठवाहः । प्रष्ठवाहं प्रष्ठवाहौ ।

वाहेर्वाशब्दस्यौत्वं ॥ ३३९ ॥ वाहेर्वाशब्दस्यौत्वं भवति अघुट् स्वरे परे । प्रष्ठौहः । प्रष्ठौहा प्रष्ठवाड्भ्यां । प्रष्ठवाड्भिः । प्रष्ठवाट्सु । इत्यादि । अनड्वाह् शब्दस्य तु भेदः । सौ ।

सौ नुः ॥ ३४० ॥ अनड्वाह् इत्येतस्य नुरागमो भवति सौ परे । अनड्वान् अनड्वाहौ अनड्वाहः ।

सम्बुद्धावुभयोर्ह्रस्वः ॥ ३४१ ॥ चतुरनडुहोरुभयोः सम्बुद्धौ ह्रस्वो भवति । हे अनड्वन् । अनड्वाहं अनड्वाहौ ।

अनडुहश्च ॥ ३४२ ॥ अनड्वाह् इत्येतस्य वाशब्दस्योत्वं भवति अघुट् स्वरे परे व्यञ्जने च परे । अनडुहः । अनडुहा । विरामव्यञ्जनेत्यादिना दत्वं । अनडुद्भ्यां । अनडुद्भिः ॥ अनडुत्सु । इत्यादि इति हकारान्तः ॥ प्रियाश्चत्वारो यस्यासौ प्रियचत्वाः प्रियचत्वारौ प्रियचत्वारः । हे प्रियचत्वः ३ । प्रियचत्वारं प्रियचत्वारौ प्रियचतुरः । प्रियचतुरा प्रियचतुर्भ्यां प्रियचतुर्भिः । इत्यादि ।

इति व्यञ्जनान्ताः पुल्लिङ्गाः ।

॥ अथ व्यञ्जनान्ताः स्त्रीलिङ्गा उच्यन्ते ॥

कवर्गान्ताः स्त्रीलिङ्गा अप्रसिद्धाः । चकारान्तः स्त्रीलिङ्गस्त्वच् शब्दः। त्वक् त्वग् त्वचौ त्वचः । त्वक्षु । इत्यादि । एवं वाच् शब्दप्रभृतयः ॥ छकारान्तोऽप्रसिद्धः ॥ जकारान्तः स्त्रीलिङ्गः स्रज् शब्दः । स्रक् स्रज् स्रजौ स्रजः । स्रक्षु । इत्यादि । झञटवर्गान्ता अप्रसिद्धाः । तकारान्तः स्त्रीलिङ्गो विद्युच्छब्दः । विद्युत् । विद्युद् । विद्युतौ । विद्युतः । इत्यादि ॥ थकारान्तोऽप्रसिद्धः ॥ दकारान्तः स्त्रीलिङ्गः शरद् शब्दः । शरत् शरद् शरदौ शरदः । एवं संविद् विपद् परिषद् प्रभृतयः ॥ त्यद्शब्दस्य तु भेदः । त्यदाद्यत्वं । स्त्रियामादेत्यादिना आप्रत्ययः । सौ । तस्य चेति सकारः । स्या त्ये त्याः । त्यां त्ये त्याः । त्यया त्याभ्यां त्याभिः । त्यस्यै त्याभ्यां त्याभ्यः । त्यस्याः त्याभ्यां त्याभ्यः । त्यस्याः त्ययोः त्यासां । तस्यां त्ययोः त्यासु । एवं तद्शब्दः । सा ते ता इत्यादि त्यद् शब्दवद्रूपं । एवं यद् एतद् शब्दौ । धकारान्तः स्त्रीलिङ्गो वीरुध्शब्दः । वीरुत् वीरुद् वीरुधौ वीरुधः । इत्यादि ॥ एवं समिध् प्रभृतयः ॥ इति धकारान्ताः ॥ नकारान्तः स्त्रीलिङ्गः सीमन्शब्दः । सीमा सीमानौ सीमानः । अघुटि । अवमसंयोगेत्यादिना अलोपः । सीम्नः ॥ इत्यादि ॥ एवं पचन् शब्दादीनां पूर्ववत् । इति नकारान्ताः । पकारान्तः स्त्रीलिङ्गोऽप्शब्दः । तस्य बहुवचनमेव ।

अपश्च ॥ ३४३ ॥ अप् इत्येतस्य उपधायाः दीर्घो भवति असम्बुद्धौ घुटि परे । आपः । अपः ।

अपां भे दः ॥ ३४४ ॥ अपां दो भवति विभक्तौ भे परे । अद्भिः । अद्भ्यः । अद्भ्यः । अपां । अप्सु । इति पकारान्तः । फकारबकारान्तावप्रसिद्धौ । भकारान्तः स्त्रीलिङ्गः ककुभ्शब्दः । ककुप् ककुब् ककुभौ ककुभः । इत्यादि । इति भकारान्तः । मकारान्तः स्त्रीलिङ्गः किम्शब्दः । तस्य कादेशः । आप्रत्ययः का के काः । कां के काः । कया

काभ्यां काभिः । कस्यै काभ्यां काभ्यः । कस्याः काभ्यां काभ्यः । कस्याः कयोः कासाम् । कस्यां कयोः कासु । इत्यादि । इदंशब्दस्य तु भेदः । सौ । इयं । अन्यत्र त्यदाद्यत्वं । दादेर्मः इति दस्य मत्वं । स्त्रियामादे-त्याप्रत्ययः । इमे इमाः । इमां इमे इमाः । टौसोरन इति अनादेशः । अनया ॥ अद्व्यञ्जनेऽनक् इत्यत्वे । आभ्यां आभिः । भाविनि भूतवदुपचारः । अस्यै आभ्यां आभ्यः । अस्याः आभ्यां आभ्यः । अस्याः अनयोः आसाम् । अस्यां अनयोः आसु । अन्वादेशे पूर्ववत् । एनां एने एनाः । एनया । एनयोः ॥ यकारान्तोऽप्रसिद्धः । इत्यादि । रकारान्तः स्त्रीलिङ्गश्चत्वार्शब्दः । तस्य बहुवचनमेव । त्रिचतुरोरित्यादिना चतस्रादेशः । तौरं स्वरे इति रत्वं । चतस्रः । चतस्रः । चतसृभिः । चतसृभ्यः । चतसृभ्यः । न नामिदीर्घमिति दीर्घो न भवति । चतसृणां । चतसृषु । इत्यादि । गिर्शब्दस्य तु भेदः । सौ ।

* **इरुरोरीरूरौ ॥ ३४९ ॥** धातोरिरुरोरीरूरौ भवतः विरामे व्यञ्जनादौ च । गीः गिरौ गिरः । सम्बोधनेऽपि तद्वत् । गिरं गिरौ गिरः । गिरा गीर्भ्यां गीर्भिः । गिरे गीर्भ्यां गीर्भ्यः । गिरः गीर्भ्यां गीर्भ्यः । गिरः गिरोः गिरां । गिरि गिरोः । वाधिकाराद्विभक्तिव्यञ्जने रेफस्य विसर्गो न स्यात् । गीर्षु । एवं पुर् धुर् प्रभृतयः । इति रकारान्ताः ॥ लकारान्तोऽप्रसिद्धः । वकारान्तः स्त्रीलिङ्गो दिव्शब्दः । स च सुदिव्शब्दवत् । द्यौः दिवौ दिवः । दिवं दिवौ दिवः । दिवा । दिव उद्व्यञ्जने । द्युभ्यां द्युभिः । इत्यादि । इति वकारान्तः ॥ शकारान्तः स्त्रीलिङ्गो दृश् शब्दः । दृक् दृग् दृशौ दृशः । इत्यादि । इति शकारान्तः ॥ षकारान्तः स्त्रीलिङ्गो विप्रुष्शब्दः । विप्रुट् विप्रुड् विप्रुषौ विप्रुषः । इत्यादि । षकारान्तो दधृष्शब्दस्य तु भेदः । चवर्गदृगादीनां च गत्वं । दधृक् दधृग् । दधृक्षु । इत्यादि । सकारान्तः स्त्रीलिङ्गः सुवचस् शब्दः । स च पूर्ववत् । सुवचाः सुवचसौ सुवचसः । इत्यादि । अदस् शब्दस्य तु भेदः । त्यदाद्यत्वं । असौ । अन्यत्र आप्रत्ययः । अदसः पदे म इति मत्वं । उत्वमादीति पूर्ववत् । अमू अमूः । अमूं

अमू अमूः । अमुया अमूभ्यां अमूभिः । अमुष्यै अमूभ्यां अमूभ्यः । अमुष्याः अमूभ्यां अमूभ्यः । अमुष्याः अमुयोः अमूषां । अमुष्यां अमुयोः अमूषु । इत्यादि । हकारान्तः स्त्रीलिङ्ग उपानह् शब्दः । विरामव्यञ्जनादिषु हस्य दः । उपानत् उपानद् उपानहौ उपानहः । इत्यादि । अनड्वाह् शब्दस्य तु भेदः ।

वा स्त्रीकारे ॥ ३४६ ॥ अनड्वाह् इत्येतस्य वाशब्दस्य उत्वं वा भवति स्त्रीकारे परे । अनडुही अनड्वाही । नदाद्यं च इति ईप्रत्ययः । इत्यादि ।

इति व्यञ्जनान्ताः स्त्रीलिङ्गाः ।

अथ व्यञ्जनान्ता नपुंसकलिङ्गा उच्यन्ते ।

कवर्गान्ता अप्रसिद्धाः । चकारान्तो नपुंसकलिङ्गः प्राञ्चूशब्दः ।

विरामव्यञ्जनादावुक्तं नपुंसकात्स्यमोर्लोपेऽपि ॥ ३४७ ॥ विरामे व्यञ्जनादौ च यदुक्तं नपुंसकलिङ्गात्परयोः स्यमोर्लोपेऽपि तद्भवति । इति गत्वं । अनुषङ्गश्चाक्रुञ्चेत्सर्वत्र । प्राक् प्राग् प्राची प्राञ्चि । पुनरप्येवं । प्राचा प्राग्भ्यां प्राग्भिः । प्राक्षु । अन्यत्र पुंल्लिङ्गवत् । एवं प्रत्यञ्च् सम्यञ्च् उदञ्च् तिर्यञ्च् प्रभृतयः । छज झञटवर्गान्ता अप्रसिद्धाः । इत्यादि । तकारान्तो नपुंसकलिङ्गः सकृत् शब्दः । सकृत् सकृद् सकृती सकृन्ति । पुनरपि । इत्यादि । ददत् शब्दस्य तु भेदः । ददत् ददद् ददती ।

वा नपुंसके ॥ ३४८ ॥ अभ्यस्तात्परोऽन्तिरनकारको वा भवति नपुंसकलिङ्गे घुटि परे । ददति ददन्ति । पुनरपि । ददत् ददद् ददती ददति ददन्ति । ददता ददद्भ्यां ददद्भिः । इत्यादि । थकारान्तोऽप्रसिद्धः । दकारान्तो नपुंसकलिङ्गस्तद् शब्दः । नपुंसकात्स्यमोर्लोपो न च तदुक्तमिति वचनात् । त्यदाद्यत्वं न भवति । तत् तद् ते तानि । पुनरप्येवं । अन्यत्र पुंल्लिङ्गवत् । एवं यद् शब्दः । धकारान्तोऽप्रसिद्धः ।

इत्यादि । नकारान्तो नपुंसकलिङ्गः सामन् शब्दः । साम साम्नी सामनी सामानि । पृथक्करणान्नपुंसकस्य वा । हे साम हे सामन् हे साम्नी हे सामनी हे सामानि । पुनरप्येवं । इत्यादि । एवं मर्मन् लोमन् व्योमन् भूमन् प्रभृतयः । चर्मन् शब्दस्य तु भेदः । चर्म चर्मणी चर्माणि । अन्यत्र पुल्लिङ्गवत् । एवं वर्मन् कर्मन् शर्मन् प्रभृतयः । इत्यादि । अहन् शब्दस्य तु भेदः । सौ ।

अह्नः सः ॥ ३४९ ॥ अहन्नित्येतस्य नकारस्य सो भवति विरामे व्यञ्जनादौ च । अहः । ईङ्योर्वा । अह्नी अहनी अहानि । हे अहः ३ । पुनरपि । अह्ना अहोभ्यां अहोभिः । अहःसु । इत्यादि । पफब-भान्ता अप्रसिद्धाः । मकारान्तो नपुंसकलिङ्गः किम्शब्दः । किं के कानि । अन्यत्र । पुल्लिङ्गवत् ॥ इदं शब्दस्य तु भेदः । इदमियमयं पुंसि ।

इदं नपुंसकेऽपि च ॥ ३५० ॥ नपुंसकलिङ्गे स्यमि च परे इदम् शब्दस्य इदमादेशो भवति । इदं इमे इमानि । इदं इमे इमानि । पुनरप्येवं । इत्यादि ॥ यकारान्तोऽप्रसिद्धः । रकारान्तो नपुंसकलिङ्गो वार् शब्दः । वाः वारी वारि । पुनरप्येवं । इत्यादि ॥ चत्वार् शब्दस्य तु भेदः । जश्शसोः शिः । चत्वारि । चत्वारि । इत्यादि ॥ लवशकारान्ता अप्रसिद्धाः । षकारान्तस्य षष्शब्दस्य पूर्ववत् । सकारान्तो नपुंसकलिङ्गो यशस् शब्दः । यशः यशसी । सान्तमहतोरित्यादिना दीर्घः । यशांसि । पुनरपि । यशसा यशोभ्यां यशोभिः । एवं वचस् ओजस् पयस् तपस् वयस् प्रभृतयः । इत्यादि ॥ सर्पिस् शब्दस्य तु भेदः । सर्पिः सर्पिषी सर्पींषि । पुनरप्येवं । सर्पिषा ।

इसुस्दोषां घोषवति रः ॥३५१॥ इसुस् दोष् इत्येतेषामन्तो रो भवति घोषवति परे । सर्पिर्भ्यां सर्पिर्भिः । सर्पिःषु सर्पिष्षु । एवं धनुस् दोस् प्रभृतयः । इत्यादि । अदस् शब्दस्य तु भेदः ।

अदः अमू अमूनि । पुनरप्येवं अन्यत्र पुल्लिङ्गवत् ॥ हकारान्तोऽप्रसिद्धः । इत्यादि ॥

इति व्यञ्जनान्ता नपुंसकलिङ्गाः ।

अथ व्यञ्जनान्तेष्वलिङ्गेषु युष्मदस्मदौ उच्येते ।

युष्मद्सि अस्मद्सि इतिस्थिते ।

त्वन्मदोरेकत्वे ॥ ३५२ ॥ एकत्वे वर्तमानयोर्युष्मदस्मदोः स्थाने त्वन्मदौ भवतः ।

त्वमहं सौ सविभक्त्योः ॥ ३५३ ॥ युष्मदस्मदोः सविभक्त्योस्त्वमहमित्येतौ भवतः सौ परे । त्वं । अहं ।

युवावौ द्विवाचिषु ॥ ३५४ ॥ युष्मदस्मदोः युवावौ द्विवाचिषु भवतः । अन्तलोपे सति ।

अमौ चाम् ॥ ३५५ ॥ युष्मदादिभ्यः परः अम् औ च आम् भवति । सवर्णदीर्घः । युवां । आवां ।

यूयं वयं जसि ॥ ३५६ ॥ युष्मदस्मदोः सविभक्त्योर्यूयं वयमित्येतौ भवतः जसि परे । यूयं । वयं । त्वन्मदोरेकत्वे इति त्वत् अम् । मत् अम् इति स्थिते ।

एषां विभक्तावन्तलोपः ॥ ३५७ ॥ एषां युष्मदादीनां अन्तस्य लोपो भवति विभक्तौ परतः । सवर्णे दीर्घः । त्वां । मां । युवां आवां ।

आन् शसः ॥ ३५८ ॥ युष्मदादिभ्यः परस्य शसः आन् भवति । युष्मान् । अस्मान् ।

एत्वमस्थानिनि ॥ ३५९ ॥ युष्मदादीनामन्तस्य एत्वं भवत्यस्थानिनि अनादेशिनि प्रत्यये परे । त्वया । मया ।

आत्वं व्यञ्जनादौ ॥ ३६० ॥ युष्मदादीनामन्तस्य आत्वं

भवति व्यञ्जनादौ विभक्तौ आदेशवर्जिते प्रत्यये परे । युवाभ्यां । आवाभ्यां । युष्माभिः । अस्माभिः ।

तुभ्यं मह्यं ङयि ॥ ३६१ ॥ युष्मदस्मदोः सविभक्त्योः तुभ्यं मह्यमित्येतौ भवतो ङयि परे । तुभ्यं मह्यं । युवाभ्यां । आवाभ्यां ।

भ्यसभ्यम् ॥ ३६२ ॥ एभ्यो युष्मदादिभ्यः परो भ्यस् अभ्यं भवति । युष्मभ्यं । अस्मभ्यं ।

श्लोकः ।

आदिलोपोऽन्त्यलोपश्च मध्यलोपस्तथैव च ॥
विभक्तिपदवर्णानां दृश्यते शार्ववर्मिके ॥ १ ॥

अत् पञ्चम्यद्वित्वे ॥ ३६३ ॥ एभ्यो युष्मदादिभ्यः परा अद्वित्वे वर्तमाना पञ्चम्यद् भवति । त्वत् । मत् । युवाभ्यां । आवाभ्यां । युष्मत् । अस्मत् ।

तव मम ङसि ॥ ३६४ ॥ युष्मदस्मदोः सविभक्त्योस्तव मम इत्येतौ भवतो ङसि परे । तव मम । युवयोः । आवयोः ।

सामाकम् ॥ ३६५ ॥ एभ्यो युष्मदादिभ्यः परः सागमयुक्त आम् आकम् भवति । युष्माकं । अस्माकं । त्वयि मयि युवयोः आवयोः युष्मासु अस्मासु । एवं नीतकः । त्वं युवां यूयं । त्वां युवां युष्मान् । त्वया युवाभ्यां युष्माभिः । तुभ्यं युवाभ्यां युष्मभ्यं । त्वत् युवाभ्यां युष्मत् । तव युवयोः युष्माकं । त्वयि युवयोः युष्मासु ॥ अहं आवां वयं । मां आवां अस्मान् । मया आवाभ्यां अस्माभिः । मह्यं आवाभ्यां अस्मभ्यं । मत् आवाभ्यां अस्मत् । मम आवयोः अस्माकं । मयि आवयोः अस्मासु ॥ ग्रामो युष्माकं । ग्रामोऽस्माकं । स ग्रामो युष्मभ्यं दीयते । ग्रामोऽस्मभ्यं दीयते । ग्रामो युष्मान् रक्षति । ग्रामोऽस्मान् रक्षति । इति स्थिते ।

युष्मदस्मदोः पदं पदात्षष्ठीचतुर्थीद्वितीयासु वसनसौ ॥ ३६६ ॥ पदात्परं युष्मदस्मदोः पदं षष्ठीचतुर्थीद्वि-

तीयासु बहुत्वे निष्पन्नं वस्नसावापद्यते यथासंख्यं । ग्रामो वः स्वं । ग्रामो नः स्वं । ग्रामो वो दीयते । ग्रामो नो दीयते । ग्रामो वो रक्षति । ग्रामो नो रक्षति । इति सिद्धं ॥ ग्रामः युवयोः स्वं । ग्राम आवयोः स्वं । ग्रामो युवाभ्यां दीयते । ग्राम आवाभ्यां दीयते । ग्रामो युवां रक्षति । ग्राम आवां रक्षति । इति स्थिते ।

वान्नौ द्वित्वे ॥ ३६७ ॥ पदात्परं युष्मदस्मदोः पदं षष्ठीचतुर्थीद्वितीयासु द्वित्वे निष्पन्नं वान्नौ आपद्यते । यथासंख्यं । ग्रामो वां स्वं । ग्रामो नौ स्वं । ग्रामो वां दीयते । ग्रामो नौ दीयते । ग्रामो वां रक्षति । ग्रामो नौ रक्षति ॥ ग्रामस्तव स्वं । ग्रामो मम स्वं । ग्रामस्तुभ्यं दीयते । ग्रामो मह्यं दीयते । ग्रामस्त्वां रक्षति । ग्रामो मां रक्षति । इति स्थिते ।

त्वन्मदोरेकत्वे तेमे त्वामा तु द्वितीयायां ॥३६८॥ युष्मदस्मदोरेकत्वे त्वन्मदीभूतयोः पदं पदात्परं षष्ठीचतुर्थीद्वितीयासु एकत्वे निष्पन्नं ते मे आपद्यते त्वा मा तु द्वितीयायां । ग्रामस्ते स्वं । ग्रामो मे स्वं । ग्रामस्ते दीयते । ग्रामो मे दीयते । ग्रामस्त्वा रक्षति । ग्रामो मा रक्षति । इति सिद्धं ।

न पादादौ ॥ ३६९ ॥ पादस्यादौ वर्तमानानां युष्मदादीनां पदमेतानादेशान्न प्राप्नोति ।

श्लोकः ।

वीरो विश्वेश्वरो देवो युष्माकं कुलदेवता ।
स एव नाथो भगवानस्माकं पापनाशनः ॥ १ ॥
भगवानीश्वरो भूयाद्युष्माकं वरदः प्रभुः ।
सद्यो निराकृता दूरमस्माकं येन विद्विषः ॥ २ ॥

पादादाविति किं । पान्तु वः पार्वतीनाथमौलिचन्द्रमरीचयः ।

आमन्त्रणात् ॥ ३७० ॥ आमन्त्रणात्परं युष्मदादीनां पदमेतानादेशान्न प्राप्नोति । हे पुत्र तव स्वमिदं । हे पुत्र मम स्वमिदं ।

हे पुत्र तुभ्यं स्वमिदं दीयते । हे पुत्र मह्यं स्वमिदं दीयते । हे पुत्र त्वां रक्षति । हे पुत्र मां रक्षति ।

चादियोगे च ॥ ३७१ ॥ चादीनां योगे युष्मदादीनां पदमेतानादेशान्न प्राप्नोति । पुत्रो युष्माकं च । पुत्रोऽस्माकं च । पुत्रो युष्मभ्यं च दीयते । पुत्रोऽस्मभ्यं च दीयते । पुत्रो युष्मांश्च रक्षति । पुत्रोऽस्मांश्च रक्षति । चादयः कति । पञ्च । ते के । च वा ह अह एव इति चादयः ।

दृश्यार्थैश्चानालोचने ॥ ३७२ ॥ अचक्षुरालोचने वर्तमानैर्दृश्यार्थैर्धातुभिर्योगे युष्मदस्मत्त्वन्मदादीनां वसूनसादयो न भवन्ति । अनालोचनमिति किम् । आलोचनं चक्षुर्ज्ञानमनालोचनं मनसा ज्ञानं । ग्रामस्त्वां समीक्षते । ग्रामो मां समीक्षते । ग्रामो युष्मभ्यं दीयमानः समीक्षते । ग्रामोऽस्मभ्यं दीयमानः समीक्षते । ग्रामस्त्वां मनसा विलोकयति वाञ्छतीत्यर्थः । मनसेति किं । ग्रामो वः पश्यति । ग्रामो नः पश्यति चक्षुषेत्यर्थः ।

इत्यलिङ्गाः ।

अथाव्ययान्युच्यन्ते ॥

अव्ययमसंख्यं । तानि कानि । स्वर् प्रातर् पुनर् अन्तर् बहिर्, च, वा, ह, अह, एव, प्र, परा, अप, सम्, अनु, अव, निर्, दुर्, वि, आङ्, नि, अति, अपि, अधि, सु, उत्, अभि, प्रति, परि, उप, इत्यादि, प्रादयो विंशतिः । विना, नाना, अन्तर्, नो, अथ, अथो, अहो, पृथक्, यावत्, तावत्, मनाक्, वषट्, ईषत्, हि, यदि, खलु, ननु, तिर्यक्, मिथ्या, किल, हन्त, वै, तु ।

अव्ययाच्च ॥३७३॥ अव्ययाच्च परासां विभक्तीनां लुग्भवति ।

श्लोकः ।

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।

वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥ १ ॥

इत्यव्ययानि ।

अथ प्रत्यया उच्यन्ते ।

अव्ययसर्वनाम्नः स्वरादन्त्यात्पूर्वोऽक्कः ॥ ३७४ ॥ अव्ययानां सर्वनाम्नां चान्त्यात्स्वरात्पूर्वोऽक्प्रत्ययो वा भवति कप्रत्ययश्च बहुलं । बहुलमिति किं ।

श्लोकः ।

क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः
क्वचिद्विभाषा क्वचिदन्यदेव ।
विधेर्विधानं बहुधा समीक्ष्य
चतुर्विधं बाहुलकं वदन्ति ॥ १ ॥

उच्चकैः । उच्चैः । नीचकैः । नीचैः । सर्वः सर्वकः । विश्वः विश्वकः । युष्मकाभिः । अस्मकाभिः । एभिः । इमकैः । अमीभिः । अमुकैः । भवन्तः भवन्तकः ।

विभक्तेश्च पूर्व इष्यते ॥ ३७५ ॥ विभक्तेश्च पूर्वोऽक्प्रत्ययो वा इष्यते । त्वया त्वयका । मया मयका ।

आख्यातस्य चान्त्यस्वरात् ॥ ३७६ ॥ आख्यातस्य चान्त्यस्वरात्पूर्वोऽक्प्रत्ययो वा भवति । पचति पचतकि । भवन्ति भवन्तकि । गच्छन्ति गच्छन्तकि । इत्यादि । कप्रत्ययश्च । यावकः । यामकः । मणिकः । वत्सकः । पुत्रकः । अश्वकः । वृक्षकः । देवदत्तकः । इत्यादि ।

के प्रत्यये स्त्रीकृताकारपरे पूर्वोऽकार इकारम् ३७७ के प्रत्यये स्त्रीकृताकारे परे पूर्वोऽकार इकारमापद्यते । सर्विका । विश्विका । उष्ट्रिका । पूर्विका । पाचिका । मूषिका । कारिका । पाठिका । इत्यादि ।

नदाद्यञ्चु वाहूव्यंसन्तृसखिनान्तेभ्य ई ॥ ३७८ ॥ स्त्रियां वर्तमानेभ्यो नदादि अञ्चु वाह् उ इ अंस् अन्त् ऋ सखि नान्तेभ्य ई प्रत्ययो भवति ।

ईकारे स्त्रीकृतेऽलोप्यः ॥ ३७९ ॥ स्त्रियां वर्तमाने ई प्रत्यये परे पूर्वोऽकारो लोप्यो भवति । नदी मही भषी प्लवी कुमारी किन्नरी किशोरी प्रभृतयः । अञ्चु । प्राची प्रतीची समीची उदीची तिरश्चीत्यादि ।वाह् । अनडुही वास्त्रीकारे अनड्वाही प्रष्ठौही इत्यादि । उ । तन्वी । उर्वी । पृथ्वी । पट्वी । इ । दाक्षी । दैवदत्ती । धूली । अंस् । श्रेयन्स् श्रेयसी विदुषी प्रेयसी । अन्त् ।

तुदभादिभ्य ईकारे ॥ ३८० ॥ तुदादिभ्यो भादिभ्यश्च परो अन्तिरनकारको वा भवति ईप्रत्यये परे । तुदती तुदन्ती स्त्री । भाती भान्ती स्त्री ।

स्यात् ॥ ३८१ ॥ स्यात्परोऽन्तिरनकारको वा भवति ई प्रत्यये परे । भविष्यती । भविष्यन्ती ।

न यनन्भ्यां ॥ ३८२ ॥ यन् अन् विकरणाभ्यां परोऽन्तिरनकारको न भवति ईकारे परे । दीव्यन्ती सीव्यन्ती पचन्ती गच्छन्ती स्त्री इत्यादि । न यनन्भ्यामिति किं । सुन्वती तन्वती क्रीणती सती आयुष्मती धनवती इत्यादि । ऋ । कर्त्री हर्त्री भर्त्री क्रोष्ट्री इत्यादि । सखि । सखी । नान्तात् । दण्डिनी गोमिनी तपस्विनी यशस्विनी प्रभृतयः ।

स्त्रीकारे[1] नित्यमवमसंयोगादनोऽलोपोऽलुप्तवच्च पूर्वविधौ ॥ ३८३ ॥ अवमसंयोगादनोऽलोपो नित्यं भवति स्त्रीकारे परे । राज्ञी गोमिनी तपस्विनी यशस्विनी प्रभृतयः ।

वरुणेन्द्रमृडभवशर्वरुद्रादान् ॥ ३८४ ॥ एभ्यः परो आन्

१ स्त्रीकारे नित्यं ॥ ३८३ ॥ अवमसंयोगादनोऽलोपो नित्यं भवति स्त्रीकारे परे सचालुप्तवद्भवति पूर्वस्थवर्णस्य विधौ कर्तव्ये । राज्ञी । इति समीचीनं दृश्यते ।

प्रत्ययो भवति। तेभ्यश्च ई प्रत्ययः । वरुणानी शर्वाणी मृडानी इन्द्राणी इत्यादि ।

नान्तसंख्यास्वस्रादिभ्यो न ॥ ३८५ ॥ नान्तेभ्यः संख्यादिभ्यः स्वस्रादिभ्यश्च ईप्रत्ययो न भवति । पञ्चदश । तिस्रः । चतस्रः । आदिशब्दात् सीमा दामा । बहवो राजानो यस्यां पुर्यां सा बहुराजा । स्वसा माता दुहितेत्यादि ।

इति प्रत्ययान्ताः ॥

अथ कारकं किञ्चिदुच्यते ।

किं कारकं? करोति क्रियां निर्वर्तयतीति कारकं। कस्मिन्नर्थे प्रथमा विभक्तिः । कर्तरि प्रथमा । कः कर्ता ।

यः करोति स कर्ता ॥ ३८६ ॥ यः क्रियां करोति स कर्तृसंज्ञो भवति । देवदत्तः करोति । मुनिरधीते । यज्ञदत्तौ लुनीतः । यती पठतः । विष्णुमित्रा गच्छन्ति । साधवोऽनुतिष्ठन्ति । इत्यादि । कस्मिन्नर्थे द्वितीया? कर्मणि द्वितीया । किं कर्म?

यत्क्रियते तत्कर्म ॥ ३८७ ॥ कर्त्रा यत्क्रियते तत्कारकं कर्मसंज्ञं भवति। कुम्भं करोति । काष्ठं छिनत्ति । मार्गं रुणद्धि । स्तनौ पिबति । गुरून् वन्दते । इत्यादि ।

द्वितीयैनेन ॥ ३८८ ॥ एन प्रत्ययान्तेन योगे लिङ्गाद्द्वितीया भवति।

अदूरे एनोऽपञ्चम्या दिग्वाचिनः ॥ ३८९ ॥ अदूरार्थे दिग्वाचिनः पर एनप्रत्ययो भवति अपञ्चम्याः । अपञ्चम्या इति कोऽर्थः । षष्ठ्यर्थे द्वितीया भवतीत्यर्थः । इवर्णावर्णयोर्लोपः स्वरे प्रत्यये ये च इत्यवर्णलोपः। अदूरवर्तिन्यां पूर्वस्यां दिशीत्यर्थः ॥ पूर्वेण ग्रामं । उत्तरेण गिरिं । दक्षिणेन नदीं । पश्चिमेन केदारमित्यादि । चकारान्निकषासमयाहाधिगन्तरान्तरेसंयुक्तात् लिङ्गाद् द्वितीया भवति। निकषा ग्रामं । समया वनम् । हा देवदत्तम् । धिक् यज्ञदत्तं । अन्तरा गार्हपत्यमाहवनीयं च वेदिः । अन्तरेण पुरुषाकारं न किञ्चिल्लभते।

सर्वोभयाभिपरिभिस्तसन्तैः ॥ ३९० ॥ तसन्तैः सर्वादिभिर्योगे लिङ्गाद्द्वितीया भवति । सर्वतो ग्रामं वनानि । उभयतो ग्रामं कुमुकवनानि । अभितोग्रामं पत्रवनानि । परितोग्रामं रंभावनानि ।

कर्मप्रवचनीयैश्च[1] ॥ ३९१ ॥ कर्मप्रवचनीयैर्योगे लिङ्गाद् द्वितीया भवति । के कर्मप्रवचनीयाः ।

श्लोकः ।

लक्षणवीप्सेत्थंभूतेऽभिर्भागे च परिप्रती ।
अनुरेषु सहार्थे च हीने चोपश्च कथ्यते ॥ १ ॥

लक्षणार्थे वीप्सार्थे इत्थंभूतार्थे अभिशब्दः कर्मप्रवचनीयो भवति । भागे च परिप्रती कर्मप्रवचनीयौ भवतः ॥ चशब्दात् । लक्षणार्थे वीप्सार्थे इत्थंभूतार्थे परिप्रती कर्मप्रवचनीयौ भवतः । अनुशब्द एषु पूर्वोक्तेषु अर्थेषु कर्मप्रवचनीयो भवति । सहार्थे च । चशब्दः समुच्चयार्थः । हीनार्थे उपशब्दः कर्मप्रवचनीयो भवति ॥ चशब्दात् हीनार्थे अनुशब्दः कर्मप्रवचनीयो भवति । लक्षणार्थे वृक्षमभि विद्योतते विद्युत् । वीप्सार्थे वृक्षं वृक्षमभितिष्ठति विद्युत् । इत्थंभूतार्थे साधुर्देवदत्तो मातरमभि । वृक्षं परि विद्योतते विद्युत् । वृक्षं प्रति तिष्ठति । वृक्षं वृक्षं प्रति तिष्ठति । साधु देवदत्तो मातरं परि । साधु देवदत्तो मातरं प्रति । यदत्र मां परि स्यात् । तदत्र मां प्रति स्यात् । वृक्षमनु विद्योतते विद्युत् । वृक्षं वृक्षमनुतिष्ठति । साधु देवदत्तो मातरमनु । यदत्र मामनु स्यात् । पर्वतमनु वसते सेना । अन्वर्जुनं योद्धारः । उपार्जुनं योद्धारः । अर्जुनादन्ये योद्धारो निकृष्टा इत्यर्थः ।

गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि ॥ ३९२ ॥ चेष्टाक्रियाणां गत्यर्थानां धातूनां प्रयोगेऽध्वनि वर्जिते कर्मणि द्वितीयाचतुर्थ्यौ भवतः । ग्रामं गच्छति । ग्रामाय गच्छति ।

---

१ कर्मक्रियां प्रोक्तवन्तः कर्मकारकमभिधीयमाना इत्यर्थः ।

नगरं व्रजति । नगराय व्रजति । इत्यादि । चेष्टायामिति किं । मनसा मेरुं गच्छति । मनसा स्वर्गं गच्छति । अनध्वनीति किं । अध्वानं गच्छति । गत्यर्थानामिति किं । पन्थानं पृच्छति ।

मन्यकर्मणि चानादरेऽप्राणिनि ॥ ३९३ ॥ प्राणिगणवर्जिते मन्यतेः कर्मणि द्वितीयाचतुर्थ्यौ भवतः अनादरे गम्यमाने । न त्वा तृणं मन्ये । न त्वां तृणाय मन्ये । न त्वां बुषं मन्ये । न त्वां बुषाय मन्ये । इत्यादि । अनादरे इति किं । अश्मानं दृषदं मन्ये । पाषाणं रत्नं मन्ये । अप्राणिनीति किं । न त्वा नावं मन्ये । न त्वामन्नं मन्ये । न त्वां काकं मन्ये । न त्वां शुकं मन्ये । न त्वां शृगालं मन्ये । नौ अन्न काक शुक शृगाला एते प्राणिनो वैयाकरणजनानां । इह स्यादेव न त्वां श्वानं मन्ये । न त्वां शुने मन्ये ॥ कस्मिन्नर्थे तृतीया ? करणे तृतीया । किं करणं ?

येन क्रियते तत्करणम् ॥३९४॥ येन क्रियते तत्कारकं करणसंज्ञं भवति । दात्रेण लुनाति । कराभ्यां हन्ति । बाणैर्विध्यति ।

दिवः कर्म च ॥ ३९५ ॥ दिवधातोः प्रयोगे करणे द्वितीया भवति । अक्षान् दीव्यति । अक्षैर्दीव्यतीत्यर्थः ।

तृतीया सहयोगे ॥ ३९६ ॥ सहार्थेन योगे लिङ्गात्तृतीया भवति । पुत्रेण सह आगतः । त्यागसत्ताभ्यां सार्धं विराजते । शौर्यगुणैः साकमेधते यशः । इत्यादि

हेत्वर्थे ॥ ३९७ ॥ हेत्वर्थे वर्तमानाल्लिङ्गात्तृतीया भवति । अन्नेन सेवते । धनेन कुलं । विद्यया यशः ।

कुत्सितेऽङ्गे ॥ ३९८ ॥ कुत्सितेऽङ्गे वर्तमानाल्लिङ्गात्तृतीया भवति । अक्ष्णा काणः । पादेन खञ्जः । अक्षि काणमस्येति प्रधानत्वात्प्रथमैव ।

विशेषणे ॥३९९॥ विशेषणे वर्तमानाल्लिङ्गात्तृतीया भवति ।

श्लोकः ।

शिखया बटुमद्राक्षीत् श्वेतच्छत्रेण भूपतिम् ।
केशवं शंखचक्राभ्यां त्रिभिर्नेत्रैः पिनाकिनम् ॥

कर्तरि च ॥ ४०० ॥ कर्तरि च कारके वर्तमानाल्लिङ्गात्तृतीया भवति । देवदत्तेन कृतं । यज्ञदत्तेन भुक्तं । छात्रेण हन्यते । सुराभ्यां युध्यते । सुजनैः क्रियते ।

तुल्यार्थे षष्ठी च ॥ ४०१ ॥ तुल्यार्थे योगे लिङ्गात् षष्ठी तृतीया च भवति । देवदत्तस्य तुल्यः । देवदत्तेन तुल्यः । देवदत्तस्य समानः । देवदत्तेन समानः । इत्यादि । कस्मिन्नर्थे चतुर्थी ? सम्प्रदानकारके चतुर्थी । किं सम्प्रदानं ?

यस्मै दित्सा रोचते धारयते वा तत्सम्प्रदानम् ॥ ४०२ ॥ यस्मै दातुमिच्छा यस्मै रोचते यस्मै धारयते वा तत्कारकं सम्प्रदानसंज्ञं भवति । ब्राह्मणाय गां ददाति । देवदत्ताय रोचते मोदकः । यज्ञदत्ताय धारयते शतं । विष्णुमित्रः यतिभ्यो दानं ददाति । देवाय रोचते हविः । मोक्षाय ज्ञानं धारयते । पुण्यार्थे चतुर्थी भवति नान्यत्र । राज्ञो दण्डं ददाति न तत्र पुण्यं । पुनरागमने षष्ठी । रजकस्य वस्त्रं ददाति ।

नमःस्वस्तिस्वाहास्वधालंवषड्योगे चतुर्थी ॥४०३॥ नम आदिभिर्योगे लिङ्गाच्चतुर्थी भवति । नमो देवाय । स्वस्ति जगते । स्वाहा हुताशनाय । स्वधा पितृभ्यः । अलं मल्लाय प्रतिमल्लः । शक्तो मल्लाय प्रतिमल्लः । वषडिन्द्राय । स्वाहा स्वधा वषट् दाने ॥

तादर्थ्ये ॥ ४०४ ॥ तदर्थभावे द्योत्ये लिङ्गाच्चतुर्थी भवति । मोक्षाय तत्त्वज्ञानं भुक्तिप्रदानाभ्यां धनं । गुणेभ्यः सत्संगतिः ।

श्लोकः ।

संयमाय श्रुतं धत्ते नरो धर्माय संयमम् ।
धर्मं मोक्षाय मेधावी धनं दानाय भुक्तये ॥ १ ॥

तुमर्थाच्च भाववाचिनः ॥ ४०५ ॥ तुमःसमानार्थाद्भाववाचिप्रत्ययान्ताल्लिङ्गाच्चतुर्थी भवति । भाववाचिनश्चेति वक्ष्यति । पाकाय व्रजति । पक्तये व्रजति । पचनाय व्रजति । पक्तुं व्रजति इत्यर्थः ॥ कस्मिन्नर्थे पञ्चमी? अपादाने पञ्चमी । किमपादानं?

यतोऽपैति भयमादत्ते तदपादानम् ॥४०६॥ यस्मादपैति यस्माद्भयं भवति यस्मादादत्ते वा तत्कारकमपादानसंज्ञं भवति । वृक्षात्पर्णं पतति । व्याघ्राद्बिभेति । उपाध्यायादादत्ते विद्यां । इत्यादि ।

ईप्सितं च रक्षार्थानाम् ॥ ४०७ ॥ रक्षार्थानां धातूनां प्रयोगे ईप्सितमनीप्सितं च तत्कारकमपादानसंज्ञं भवति । यवेभ्यो गां रक्षति । गौः यवात् रक्षति । गां निवारयतीत्यर्थः । पापात्पातु भगवान् । रोगकोपाभ्यां निवारयति मनः । अहिभ्य आत्मानं रक्षति ।

पर्यपाङ्योगे पञ्चमी ॥ ४०८ ॥ परि अप आङ् योगे लिङ्गात्पञ्चमी भवति । इहापपरी वर्जने । आङ् मर्यादाभिविध्योः । परिपाटलिपुत्राद्वृष्टो देवः । अपत्रिगर्तेभ्यो वृष्टो देवः । आपाटलिपुत्राद्वृष्टो देवः ।

दिगितरार्तेन्यैश्च ॥ ४०९ ॥ दिग् इतर ऋते अन्य एभिर्योगे वर्तमानाल्लिङ्गात्पञ्चमी भवति । पूर्वोग्रामत् । उत्तरोग्रामात् । इतरोदेवदत्तात् । ऋते धर्मात् कुतः सुखं । अन्योदेवदत्तात् ।

पृथक्नानाविनाभिस्तृतीया वा ॥ ४१० ॥ पृथक् नाना विना एभिर्योगे लिङ्गात्तृतीयापञ्चम्यौ भवतः । पृथक् देवदत्तेन । पृथग्देवदत्तात् । नाना देवदत्तेन । नाना देवदत्तात् । विना देवदत्तेन विना देवदत्तात् ।

हेतौ च ॥ ४११ ॥ हेतौ च वर्तमानाल्लिङ्गात्पञ्चमी भवति । कस्माद्धेतोः समागतः । अग्निमानयं धूमत्वात् । अनित्योऽयं कृतक-

त्वात् । कस्मिन्नर्थे षष्ठी? स्वाम्यादौ षष्ठी । के स्वाम्यादयः? स्वामी सम्बन्धः समीपः समूहः विकारः अवयवः स्व इति स्वाम्यादयः । देवदत्तस्य स्वामी । देवदत्तस्य वस्त्रं । पर्वतस्य समीपं । हंसानां समूहः । क्षीरस्य विकारः । देवदत्तस्य बाहू । यज्ञदत्तस्य शिरः । विष्णुमित्रस्य स्वं ।

स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैः षष्ठी च ॥ ४१२ ॥ स्वाम्यादिभिर्योगे लिङ्गात्षष्ठी सप्तमी च भवति । गवां स्वामी । गोषु स्वामी । गवामीश्वरः । गोष्वीश्वरः । गवामधिपतिः । गोष्वधिपतिः । गवां दायादः । गोषु दायादः । गवां साक्षी । गोषु साक्षी । गवां प्रतिभूः । गोषु प्रतिभूः । गवां प्रसूतः । गोषु प्रसूतः ।

निर्धारणे च ॥ ४१३ ॥ निर्धारणे चार्थे लिङ्गात्षष्ठी सप्तमी च भवति । जातिगुणक्रियाभिः समुदायस्य एकदेशपृथक्करणं निर्धारणं । पुरुषाणां क्षत्रियः शूरतमः । पुरुषेषु क्षत्रियः शूरतमः । गवां कृष्णा गौः सम्पन्नक्षीरा । गोषु कृष्णा गौः सम्पन्नक्षीरा । गच्छतां धावन्तः शीघ्राः । गच्छत्सु धावन्तः शीघ्राः । इत्यादि ।

षष्ठी हेतुप्रयोगे ॥ ४१४ ॥ हेतोः प्रयोगे लिङ्गात्षष्ठी भवति । अध्ययनस्य हेतोर्वसति । अन्नस्य हेतोर्वसति ।

स्मृत्यर्थकर्मणि ॥ ४१५ ॥ स्मरणार्थानां धातूनां प्रयोगे वर्तमानाल्लिङ्गात् कर्मणि षष्ठी भवति । उत्तरत्र नित्यग्रहणादिह विकल्पो लभ्यते । मातुः स्मरति । मातरं स्मरति । पितुरध्येति । पितरमध्येति । इत्यादि ।

करोतेः प्रतियत्ने ॥ ४१६ ॥ करोतेः प्रतियत्ने गम्यमाने लिङ्गात्कर्मणि षष्ठी भवति । सतो विशेषाधानं प्रतियत्नः । एधोदकस्योपस्कुरुते । एधोदकमुपस्कुरुते । इत्यादि ॥

हिंसार्थानामज्वरी ॥ ४१७ ॥ हिंसार्थानां ज्वरवर्जितानां धातूनां प्रयोगे कर्मणि षष्ठी भवति । चौरस्य प्रहन्ति । चौरं प्रहन्ति । चौर-

स्योत्क्राथयति । चौरमुत्क्राथयति । चोरस्य पिनष्टि । चौरं पिनष्टि । रुजो भङ्गे । चौरस्य रुजति । चौरं रुजति । इत्यादि । अज्वरीति किं । चौरं ज्वरयति कर्कटी । चौरस्य सन्तापयतीत्यर्थः ।

कर्तृकर्मणोः कृति नित्यम् ॥ ४१८ ॥ कर्तृकर्मणोरर्थयोर्नित्यं षष्ठी भवति कृत्प्रत्यययोगे । भवत आसिका । भवतः शायिका । भुवनस्य स्रष्टा । पर्वतानां भेत्ता । तत्वानां ज्ञाता । इत्यादि ।

न निष्ठादिषु ॥ ४१९ ॥ कर्तृकर्मणोरर्थयोः षष्ठी न भवति निष्ठादिषु परतः । के निष्ठादयः । क्तक्तवत् । शन्तृङ् । आनश् । वूंस् कान कि कंस् उदन्त् उकङ् क्त्वा तुम् भविष्यदर्थे वुण् आवश्यकाधमर्ण्ययोर्णिन् अव्यय तृण् इत्येवमादयः । देवदत्तेन भुक्तमोदनं । त्वया कृतः कटः । देवदत्त ओदनं भुक्तवान् । देवदत्तः कृतवान् कटं । इत्यादि । कस्मिन्नर्थे सप्तमी ? अधिकरणे सप्तमी । किमधिकरणं ?

य आधारस्तदधिकरणम् ॥ ४२० ॥ य आधारस्तत्कारकमधिकरणसंज्ञं भवति । स आधारस्त्रिविधः । औपश्लेषिको वैषयिकोऽभिव्यापकश्चेति । कटे आस्ते काकः । औपश्लेषिकोऽयं । करयोः कङ्कणं । दिवि देवाः । वैषयिकोऽयम् । तिलेषु तैलं । अभिव्यापकोऽयं ।

कालभावयोः सप्तमी ॥ ४२१ ॥ कालभावयोर्वर्तमानाल्लिङ्गात्सप्तमी भवति । काले शरदि पुष्यन्ति सप्तच्छदाः । भावे गोषु दुह्यमानासु गतः ।

अधिशीङ्स्थासां कर्म ॥ ४२२ ॥ अधिपूर्वाणां शीङ्स्था आसु इत्येतेषां प्रयोगे अधिकरणे द्वितीया भवति । ग्राममधिशेते । ग्राममधितिष्ठति । ग्राममध्यास्ते । ग्रामे आस्त इत्यर्थः ।

उपान्वध्याङ्वसः ॥ ४२३ ॥ उप अनु अधि आङ्

---

[1] आध्रियन्ते क्रिया यस्मिन्नित्याधारः ।

पूर्वेभ्यः वसु निवास इत्येतस्य धातोः प्रयोगे अधिकरणे द्वितीया भवति । ग्राममुपवसति । ग्राममनुवसति । ग्राममधिवसति । ग्राममावसति । ग्रामे वसतीत्यर्थः ।

सति च ॥ ४२४ ॥ सत्यर्थे वर्तमानाल्लिङ्गात्सप्तमी भवति । दाने सति भोगः । ज्ञाने सति मोक्षः । इत्यादि ।

निमित्तात्कर्मणि ॥ ४२५ ॥ निमित्तभूताल्लिङ्गात्सप्तमी भवति कर्मणि परे ।

श्लोकाः ।

चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् ।
केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ॥ १ ॥
मुक्तौ चित्तत्वमध्येति स्वर्मुक्त्योर्जिनमर्चति ।
गुणेषु गुरुमाप्नोति गोपः पयसि दोग्धि गाम् ॥ २ ॥
संप्रदानमपादानं करणाधिकरणे तथा ।
स्वाम्यादिकर्म कर्ता च सेयं षट् कारिकी मता ॥ ३ ॥

इति कारकप्रकरणं समाप्तम् ।

अथ समास उच्यते ।

पान्तु नो नेमिनाथस्य पादपद्मारुणांशवः ।
यस्य पादौ समानम्य शीतीभूता जगज्जनाः ॥ १ ॥

समासः कः ।

नाम्नां समासो युक्तार्थः ॥ ४२६ ॥ नाम्नां युक्तार्थः समासो भवति ।

श्लोकत्रयमाह ।

वस्तुवाचीनि नामानि मिलित्वायुक्तमुच्यते ।
समासाख्यं तदे[1]तत्स्यात्तद्धितोत्पत्तिरेव च ॥ १ ॥

---

१ तदेव इत्यपि पाठान्तरं.

चकारबहुलो द्वन्द्वः सचासौ कर्मधारयः ।
यत्र द्वित्वं बहुत्वं च स द्वन्द्व इतरेतरः ॥ २ ॥
पदयोस्तु पदानां वा विभक्तिर्यत्र लुप्यते ।
स समासस्तु विज्ञेयः कविभिः परिकीर्तितः ॥ ३ ॥

स चतुर्विधः । तत्पुरुषबहुव्रीहिद्वन्द्वाव्ययीभावभेदात् । पुनरुत्तरपदार्थप्रधानस्तत्पुरुषः । अन्यपदार्थप्रधानो बहुव्रीहिः । सर्वपदार्थप्रधानो द्वन्द्वः । पूर्वाव्ययपदार्थप्रधानोऽव्ययीभावः । इति चतुर्विधः । स च यथाक्रमं प्रदर्श्यते । सुखं प्राप्तः । गुणान् आश्रित इति स्थिते ॥

श्लोकः ।

विभक्तयो द्वितीयाद्या नाम्ना परपदेन तु ।
समस्यन्ते समासो हि ज्ञेयस्तत्पुरुषः स च ॥ १ ॥

द्वितीयादि विभक्त्यन्तं पूर्वपदं नाम्ना परपदेन सह यत्र समस्यते स समासस्तत्पुरुषसंज्ञको भवति ।

तत्स्था लोप्या विभक्तयः ॥ ४२७ ॥ तस्मिन् समासे स्थिता विभक्तयो लोप्या भवन्ति ।

प्रकृतिश्च स्वरान्तस्य ॥ ४२८ ॥ लुप्तासु विभक्तिषु स्वरान्तस्य व्यञ्जनान्तस्य च लिङ्गस्य प्रकृतिर्भवति । चकारात्कचित्सन्धिर्भवति ।

कृत्तद्धितसमासाश्च ॥ ४२९ ॥ कृत्तद्धितसमासाश्च शब्दा लिङ्गसंज्ञा भवन्ति । सुखप्राप्तः । गुणाश्रितः । एवं ग्रामं गतः । ग्रामगतः । एवं स्वर्गं गतः । स्वर्गगतः । तृतीया—दध्ना संसृष्टः । दधिसंसृष्टः । धान्येन अर्थः । धान्यार्थः । यत्नेन कृतं । यत्नकृतं । चतुर्थी—कुबेराय बलिः । कुबेरबलिः । यूपाय दारु । यूपदारु । देवाय सुखं । देवसुखं । पञ्चमी—चौराद्भयं चौरभयं । ग्रामान्निर्गतः । ग्रामनिर्गतः । षष्ठी—चन्दनस्य गन्धः । चन्दनगन्धः । राज्ञः पुरुषः । राजपुरुषः । फलानां रसः । फलरसः । सप्तमी—व्यवहारे कुशलः । व्यवहारकुशलः । काम्पिल्ये सिद्धः । का-

म्पिल्यसिद्धः । धर्मे नियतः । धर्मनियतः । एवं मोक्षसुखम् । संसारसुखमित्यादि । विश्वमतिक्रान्तः । इति विग्रहे ।

अत्यादयः क्रान्ताद्यर्थे द्वितीयया ॥४३०॥ अत्यादयः शब्दाः क्रान्ताद्यर्थे द्वितीयया सह यत्र समस्यन्ते स समासस्तत्पुरुषसंज्ञो भवति । उक्तार्थानामप्रयोगः । अव्ययानां पूर्वनिपातः । अतिविश्वः । कोकिलया अवकृष्टं वनमिति विग्रहः ।

अवादयः कृष्टाद्यर्थे तृतीयया ॥ ४३१ ॥ अवादयः शब्दाः कृष्टाद्यर्थे तृतीयया सह यत्र समस्यन्ते स समासस्तत्पुरुषसंज्ञको भवति । स्वरो ह्रस्वो नपुंसके इत्यत्र योगविभागात् ।

गोरप्रधानस्यान्तस्य स्त्रियामादादीनां च ॥४३२॥ अप्रधानस्यान्तस्य गोशब्दस्य तथाविधस्त्रियामादादीनां च ह्रस्वो भवति । इति ह्रस्वः । अवकोकिलं वनं । अवमयूरं । अध्ययनाय परिग्लान इति विग्रहः ।

पर्यादयो ग्लानाद्यर्थे चतुर्थ्या ॥ ४३३ ॥ पर्यादयः शब्दा ग्लानाद्यर्थे चतुर्थ्या सह यत्र समस्यन्ते स समासस्तत्पुरुषसंज्ञो भवति । पर्यध्ययनः । कौशाम्ब्या निर्गतः । मथुराया निर्गत इति विग्रहः ।

निरादयो निर्गमनाद्यर्थे पञ्चम्या ॥४३४॥ निरादयः शब्दा निर्गमनाद्यर्थे पञ्चम्या सह यत्र समस्यन्ते स समासस्तत्पुरुषसंज्ञो भवति । गोरप्रधानस्यान्तस्य इत्यादिना ह्रस्वः । एवं निर्मयूरः । निष्कौशाम्बिः । दीर्घश्चारायणः । व्यासः पाराशर्यः । रामो जामदग्न्यः । क्षेमंकरः । शुभंकरः । प्रियंकरः । श्रियंमन्यः । भुवंमन्यः । ओजसाकृतं । अम्भसाकृतं । तमसाकृतं । परस्मैपदं । आत्मनेपदं । स्तोकान्मुक्तः । कृच्छ्रान्मुक्तः । अन्त्यकादागतः । दूरादागतः । वाचोयुक्तिः । दिशोदण्डः । पश्यतोहरः । शुनःपुच्छः । शुनःशेपः । शुनो लाङ्गूलः । सरसिजं । पङ्केजं । स्तंबेरमः । कर्णेजपः । कण्ठेकालः ।

उरसिलोमा । इत्यत्र समासे कृते विभक्तिलोपे प्राप्ते तत्स्था लोप्या विभक्तयः । इत्यत्रस्थग्रहणाधिक्याल्लोपः क्वचिन्न भवति ।

सप्तम्यास्तत्पुरुषे कृतिबहुलम् ॥ ४३५ ॥ कृदन्ते परे सप्तम्यास्तत्पुरुषे समासे बहुलमलुग्भवति । गेहे नर्दी । गेहे क्ष्वेडा । प्रवाहे मूत्रितं । भस्मनि हुतं । क्वचिद्विकल्पः । खेचरः । खचरः । वनेचरः । वनचरः । पङ्केरुहं । पङ्करुहं । सरसिजं । सरोजं ॥ विदुषां गमनं । दिवंगतः । इत्यादौ समासे कृते ।

व्यञ्जनान्तस्य यत्सुभोः ॥ ४३६ ॥ लुप्तासु विभक्तिषु व्यञ्जनान्तस्य सुभोर्यदुक्तं तद्भवति । विद्वद्गमनं । द्युगतः । इत्यादि । नीलं च तदुत्पलं च । रक्तं च तदुत्पलं च । चशब्दः समुच्चयद्योतनार्थः । तच्छब्द एकाधिकरणद्योतनार्थः ।

पदे तुल्याधिकरणे विज्ञेयः कर्मधारयः ॥ ४३७ ॥ यस्मिन् समासे द्वे पदे तुल्याधिकरणे भवतः स कर्मधारयो भवति ॥ भिन्नप्रवृत्तिनिमित्तयोः शब्दयोरेकाधिकरणे समावेशस्तुल्याधिकरणं । उक्तार्थानामप्रयोग इति तत् च शब्दनिवृत्तिः । विभक्तिलोपः । अत्र नीलं किमित्यपेक्षते उत्पलमपेक्षते । उत्पलं किमित्यपेक्षते नीलमपेक्षते । नीलोत्पलं । रक्तोत्पलं । एवं वीरश्चासौ पुरुषश्च वीरपुरुषः । शुक्लश्चासौ पटश्च शुक्लपटः । शोभना चासौ भार्या च शोभनभार्या । दीर्घा चासौ माला च दीर्घमाला ।

कर्मधारयसंज्ञे तु पुंवद्भावो विधीयते ॥ ४३८ ॥ इति ह्रस्वः । इत्यादि ।

संख्यापूर्वो द्विगुरिति ज्ञेयः ॥४३९॥ स एव कर्मधारयः संख्यापूर्वश्चेत् द्विगुरिति ज्ञेयः । स च त्रिविधः । उत्तरपदतद्धितार्थसमाहारभेदात् । पञ्चसु कपालेषु संस्कृत ओदनः । पञ्चकपाल ओदनः । दशसु गृहेषु प्रविष्टः । दशगृहप्रविष्टः । अष्टसु कपालेषु संस्कृतः पुरोडाशः ।

अष्टनः कपालेषु हविषि ॥ ४४० ॥ अष्टन् शब्दस्य आत्वं भवति कपाले परे हविष्यभिधेये । अष्टाकपालः पुरोडाशः । अयमुत्तरपदद्विगुः । पञ्च च ते गावश्च पञ्चगावः । समासान्तर्गतानां वा राजादीनामदन्तता इति चत्वारश्च ते पन्थानश्च चतुष्पथाः । इति तद्धितपदार्थः । पञ्चानां फलानां समाहारः पञ्चफली । एवं त्रिलोकी । अकारान्तो द्विगुसमाहारो नदादौ पठ्यते पात्रादिगणं वर्जयित्वा । पात्रादिगण इति किं । त्रयाणां भुवनानां समाहारस्त्रिभुवनं । समाहारद्विगुरयं । त्रिभुवनं । त्रिभुवनाय । त्रिभुवनात् । त्रिभुवनस्य त्रिभुवने । सर्वत्रैकवचनं ।

तत्पुरुषावुभौ ॥ ४४१ ॥ उभौ द्विगुकर्मधारयौ तत्पुरुषौ भवतः । इति तत्पुरुषसमासः । अब्राह्मणः । अनजः । कदश्व इत्यादि । इति कर्मधारयः । आरूढो वानरोऽयं वृक्षं । ऊढो रथो येन । उपहृतः पशुर्यस्मै । पतितं पर्णं यस्मात् । चित्रा गावो यस्य । वीराः पुरुषा यस्मिन्देशे । लम्बौ कर्णौ यस्य । दीर्घौ बाहू यस्य । धीराः पुरुषा यस्मिन् देशे । इति स्थिते ।

स्यातां यदि पदे द्वे यदि वा स्युर्बहून्यपि ॥४४२॥ यत्र समासे द्वे पदे यदि वा स्यातां बहूनि पदानि वा स्युरन्यपदार्थे समस्यन्ते स समासो बहुव्रीहिर्भवति । आरूढवानरः । ऊढरथः । उपहृतपशुः । पतितपर्णः । चित्रगुः । वीरपुरुषोदेशः । लम्बकर्णः । दीर्घबाहुः । धीरपुरुषः । बहुपदानामपि । बहवो मत्ताः मातङ्गा यस्मिन् वने तत् बहुमत्तमातङ्गं वनं । बहूनि रसवन्ति फलानि यस्मिन् वृक्षे स बहुरसवत्फलो वृक्षः । व्यञ्जनान्तस्य यत्सुभोरिति न्यायात् अनुषङ्गलोपः । उपगता दश येषां ते उपगतदशाः । एवमासन्ना दश येषां ते आसन्नदशाः । अदूरा दश येषां ते अदूरदशाः । अधिका दश येषां ते अधिकदशाः । पुत्रेण सह आगतः सपुत्रः सहपुत्रः ।

सहस्य सो बहुव्रीहौ वा ॥ ४४३ ॥ सहशब्दस्य सो

वा भवति बहुव्रीहौ समासे । जनकेन सह वर्तते इति सजनकः । एवं सधर्मः । जनन्या सहवर्त्तते इति स जननिः । एवं सवधुः । गोरप्रधानस्येत्यादिना ह्रस्वः । अव्ययानां पूर्वनिपातः ।

युधि क्रियाव्यतिहारे इच् ॥ ४४४ ॥ ग्रहणप्रहरणबाधके युद्धे क्रियाव्यतिहारे बहुव्रीहिसमासात् इच् भवति ।

इच्पूर्वपदस्याकारः ॥ ४४५ ॥ इचि परे पूर्वपदस्याकारो भवति । दण्डैश्च दण्डैश्च प्रवृत्तं युद्धं । दण्डादण्डि । एवं गदागदि । खड्गाखड्गि । केशाकेशि । मुष्टामुष्टि । कचाकचि । दक्षिणस्याः पूर्वस्याश्च दिशोर्यदन्तरालं सा विदिक् ।

विदिक् तथा ॥ ४४६ ॥ तथा विदिगभिधेये बहुव्रीहिर्ज्ञेयः । सर्वनाम्नो वृत्तिमात्रे पूर्वपदस्य पुंवद्भावः । दक्षिणपूर्वा । पश्चिमोत्तरा । दक्षिणपश्चिमा । उत्तरपूर्वा । इत्यादि । शुकश्च मयूरश्च । धवश्च खदिरश्च पलाशश्च । इति स्थिते ।

द्वन्द्वः समुच्चयोर्नाम्नोर्बहूनां वाऽपि यो भवेत् ॥४४७॥ द्वयोर्नाम्नोर्बहूनां वापि समुच्चयोर्द्वन्द्वो भवेत् । स च इतरेतरयोगः । समाहारश्चेति द्विप्रकारः ।

श्लोकः ।

यत्र द्वित्वं बहुत्वं स च द्वन्द्व इतरेतरः ।
समाहारो भवेदन्यो यत्रैकत्वनपुंसके ॥

द्वित्वेद्विवचनं । बहुत्वे बहुवचनं । शुकमयूरौ ॥ धवखदिरपलाशाः ।

अल्पस्वरतरं तत्र पूर्वम् ॥ ४४८ ॥ तत्र द्वन्द्वे समासे अल्पस्वरतरं पदं पूर्वं निपात्यते । प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ । एवं रथपदाती । तरग्रहणं द्विपदग्रहणार्थोऽन्यत्र शंखदुंदुभिवीणाः ।

यच्चार्चितं द्वयोः ॥४४९॥ तत्र द्वन्द्वे समासे द्वयोर्यदर्चितं तत्पूर्वं निपात्यते । वासुदेवार्जुनौ । शुककाकौ । हंसबकौ । देवदैत्यौ । क्वचिद्व्यभिचरति च । तथाहि ।

न नरनारायणादिषु ॥ ४५० ॥ नरनारायणादिषु यदर्चितं पदं तत्पूर्वं न निपात्यते । नरश्च नारायणश्च नरनारायणौ । उमामहेश्वरौ । काकमयूरौ । इत्यादि ।

मातुः पितर्यरश्च ॥ ४५१ ॥ तत्र द्वन्द्वे समासे पितरि उत्तरपदे मातृशब्दस्य ऋत अरादेशो भवति चकारादा च । माता च पिता च मातरपितरौ । मातापितरौ ।

पुत्रे ॥ ४५२ ॥ पुत्रशब्दे उत्तरपदे द्वन्द्वविषये विद्यायोनिसम्बन्धिन ऋदन्तस्य आत्वं भवति । माता च पुत्रश्च मातापुत्रौ । एवं होतापुत्रौ । इति द्वन्द्वसमासः ॥ कुम्भस्य समीपं । अन्तरायस्य अभावः ।

पूर्वं वाच्यं भवेद्यस्य सोऽव्ययीभाव इष्यते॥४५३॥
यस्य समासस्य पूर्वमव्ययं पदं वाच्यं भवेत्सोऽव्ययीभाव इष्यते । अव्ययानां स्वपदविग्रहो नास्तीत्यन्यपदेन विग्रहः । इति वचनाद् उपनिरादेशौ भवतः । समीपस्य उपादेशः । अभावस्य निरादेशः । समासे कृते सति अव्ययानां पूर्वनिपातः ।

स नपुंसकलिङ्गः स्यात् ॥ ४५४ ॥ सोऽव्ययीभावसमासो नपुंसकलिङ्गःस्यात् । अव्ययप्रधानत्वादलिङ्गे प्राप्ते वचनमिदं ।

अव्ययीभावादकारान्ताद्विभक्तीनामपञ्चम्याः ॥ ४५५ ॥ अकारान्तादव्ययीभावाद्विभक्तीनां स्थाने अपञ्चम्या अम् भवति । उपकुंभं । निरन्तरायं । एवमुपगृहं । उपगेहं । उपगजं । उपराजं । उपच्छत्रं । उपवनं । उपनगं । उपदेवं । उपभार्यं । उपशालं । वादस्याभावो निर्वादं । मक्षिकाणामभावो निर्मक्षिकं । शीतस्यातिक्रमः अतिशीतं । एवमतिक्रमं । दिनंदिनं प्रति प्रतिदिनं । एवं प्रतिगृहं । प्रतिवृक्षं । प्रतिपुरुषं । प्रतिवनितं । प्रतिमासं । प्रतिवर्षं । प्रतिग्रामं । प्रतितटं । पुरुषस्य अनुगमः । अनुपुरुषं । एवमनुतटं । ग्रामस्यान्तः अन्तर्ग्रामं । अन्तर्घटं । अन्तर्गृहं । ग्रामस्य मध्ये

मध्येग्रामं । एवं मध्येवनं । मध्येदिनं । मध्येकूपं । ग्रामस्य बहिर्बहिर्ग्रामं । उपरिपर्वतं । एवं बहिर्वणं अन्तर्वणं ।

वा तृतीयासप्तम्योः ॥ ४५६ ॥ अकारान्तादव्ययीभावात्परयोस्तृतीयासप्तम्योः स्थाने अम् वा भवति । उपकुंभं । उपकुंभेन । उपकुंभं । उपकुंभाभ्यामित्यादि । निरन्तरायं निरन्तरायेण । उपकुंभं उपकुंभे । उपकुंभयोः । इत्यादि । निरन्तरायं निरन्तराये । अपञ्चम्या इति किं । उपकुंभात् । निरन्तरायात् । इत्यादि । स्त्रीष्वधिकृत्य अधिकृत्यस्याधिरादेशः । शक्तिमनतिक्रम्य अनतिक्रमस्य यथा देशः। इत्यादिषु समासे कृते ।

अन्यस्माल्लुक् ॥ ४५७ ॥ अकारान्तादन्यस्मादव्ययीभावात्परासां विभक्तीनां लुक् भवति । अधिस्त्रियं । यथाशक्ति । एवमधिगायत्रि । अधिसरस्वति । अधिभारति । अधिनदि । आत्मनः अधि अध्यात्मं । गुरोरनतिक्रमेण यथागुरु । वध्वा अनतिक्रमेण । यथावधु चम्वा अनतिक्रमेण । यथाचमु । गिरेरनतिक्रमेण । यथागिरि । वध्वा अनुगमः । अनुवधु । अनुकण्डु । अनुनदि । अनुस्त्रि । अनुपटु । अनुवायु । अनुगुरु । अनुपितृ । अनुमातृ । अनुकर्तृ । कर्तुःसमीपमुपकर्तृ एवमुपगिरि। उपरवि । उपयति । उपगुरु। उपतरु। उपवधु । उपचमु । उपनदि । उपस्त्रि । उपगु । उपनु । कर्तुरतिक्रमः । अतिकर्तृ । एवमतिरि । अतिगु । अतिनु ।

समं भूमिपदात्योः ॥ ४५८ ॥ भूमिपदात्योः परयोः समत्वं इत्येतस्य समित्यादेशो भवति। भूमेः समत्वं समंभूमि । पदातीनां समत्वं समं पदाति ।

सुविनिर्दुर्भ्यः स्वपिसूतिसमानाम् ॥४५९॥ सुविनिर्दुर्भ्यः परस्य स्वपि सूति समानां सकारस्य षकारो भवति । सुषमं विषमं निष्षमं दुष्षमं । अपरसमं । इत्यादि ।

द्वन्द्वैकत्वम् ॥ ४६० ॥ समाहारद्वन्द्वस्यैकत्वं नपुंसकलिङ्गं

स्यात् । अर्कश्च अश्वमेधश्च अर्काश्वमेधौ । तयोः समाहारः । अर्काश्वमेधं । एवं तक्षायस्कारं हंसमयूरं । मथुरापाटलिपुत्रं । पाणिपादं । बदरामलकं । सुखदुःखं । शुकश्च हंसश्च मयूरश्च कोकिलश्च शुकहंसमयूरकोकिलं । इत्यादि ।

तथा द्विगोः ॥४६१॥ तथा समाहारद्विगोरप्येकत्वं नपुंसकलिङ्गं च स्यात् ।

समासान्तर्गतानां वा राजादीनामदन्तता ४६२
समासान्तर्गतानां राजादीनामदन्तता अप्रत्ययो भवति वा समुच्चये । पञ्चानां गवां समाहारः पञ्चगवं । चतुर्णां पथां समाहारः चतुष्पथं ।

न सूत्रे क्वचित् ॥ ४६३ ॥ क्वचित्सूत्रे द्वन्द्वैकत्वं भवति नपुंसकलिङ्गत्वं न स्यात् । विरामव्यञ्जनादौ । एवं पचि वचि सिचि रुचि मुचेः । इत्यादि ।

पुंवद्भाषितपुंस्कानूङ्पूरण्यादिषु स्त्रियां तुल्याधिकरणे ॥ ४६४ ॥ स्त्रियां वर्तमानं भाषितपुंस्कं अनूङन्तं पूर्वपदभूतं पुंवद्भवति स्त्रियां वर्तमाने तुल्याधिकरणे पूरण्यादिगणवर्जिते उत्तरपदे परे । शोभना भार्या यस्यासौ शोभनभार्यः । एवं दीर्घजङ्घभार्यः । इत्यादि । भाषितपुंस्कमिति किं । द्रोणीभार्यः । अनूङ् इति किम् । ब्रह्मबधूभार्यः । अपूरण्यादिष्विति किं । कल्याणी पञ्चमी यासां रात्रीणां ताः कल्याणीपञ्चमा रात्रयः । के पूरण्यादयः । पूरणी पञ्चमी कल्याणी मनोज्ञा सुभगा दुर्भगा स्वकान्ता कुब्जा वामना इत्यादि।

संज्ञापूरणीकोपधास्तु न ॥ ४६५ ॥ स्त्रियां वर्तमाना भाषितपुंस्कादनूङन्ताः संज्ञाः पूरणीप्रत्ययान्ताः कोपधाः पूर्वपदभूताः पुंवद्रूपा न भवन्ति स्त्रियां वर्तमाने तुल्याधिकरणे पदे पूरण्यादिगणवर्जित उत्तरपदे परे । दत्ताभार्या यस्यासौ दत्ताभार्यः । पञ्चमीभार्यः । पाचिकाभार्यः । गोरप्रधानस्येत्यादिना ह्रस्वः । इत्यादि ।

कर्मधारयसंज्ञे तु पुंवद्भावो विधीयते ॥४६६॥ स्त्रि-

यां वर्तमाना भाषितपुंस्का अनूङन्ताः संज्ञापूरणीप्रत्ययान्ताः—कोपधा अपि कर्मधारयसमासे तु पुंवद्भवन्ति स्त्रियां वर्तमाने तुल्याधिकरणे पूरण्यादिगणवर्जित उत्तरपदे परे । शोभना चासौ भार्या च शोभनभार्या । एवं दत्तभार्या । पाचकभार्या । पञ्चमभार्या इत्यादि । भाषितपुंस्कमिति किं । खट्वावृन्दारिका । अनूङिति किं ब्रह्मबन्धूदारिका ।

आकारो महतः कार्यस्तुल्याधिकरणे पदे ॥४६७॥ महत आकारः कार्यस्तुल्याधिकरणे पदे परे । महांश्चासौ देवश्च महादेवः । अन्तरङ्गत्वात् व्यञ्जनान्तस्य यत्सुभोरिति न्यायादनुषङ्गलोपश्च । प्रथमतोऽनुषङ्गस्य लोपे कृते सति पश्चात् येन विधिस्तदन्तस्येति न्यायात् तकारस्याकारः । सर्वत्र सवर्णे दीर्घः । एवं महापुरुषः । महापर्वतः । महादेशः ।

नस्य तत्पुरुषे लोप्यः ॥४६८॥ तत्पुरुषसमासे नस्य नकारमात्रस्य लोप्यो भवति । न सवर्णः असवर्णः । न ब्राह्मणः अब्राह्मणः । एतल्लक्षणं तत्पुरुषस्यैव अन्येषां समासानां कथमिदं लक्षणं । न विद्यते घोषो ध्वनिर्येषां ते अघोषाः । तथा तत्पुरुष इहोपलक्षणं। उपलक्षणं किम् । स्वस्य स्वसदृशस्य च ग्राहकमुपलक्षणं । सर्पिः काकेभ्यो रक्षति ।

स्वरेऽक्षरविपर्ययः ॥ ४६९ ॥ तत्पुरुषे समासे नस्य अक्षरविपर्ययो भवति स्वरे परे । न अजः अनजः । एवमनर्घ्यः । अनर्थः । अनकारः । अनिन्द्रः । अनुदकमित्यादि ।

कोः कत् ॥ ४७० ॥ कुशब्दस्य कद्भवति तत्पुरुषे स्वरे परे । स्वपदविपदविग्रहो नास्तीत्यन्यपदविग्रहः । कुत्सितश्चासौ अश्वश्च कदश्वः । कदन्नं । कदुष्ट्रः । तत्पुरुष इति किम् । कुत्सिता उष्ट्रा यस्मिन्देशे स कूष्ट्रो देशः ।

का त्वीषदर्थेऽक्षे ॥ ४७१ ॥ ईषदर्थे वर्तमानस्य कुशब्दस्य कादेशो भवति तत्पुरुषे समासे अक्षशब्दे च परे । कु ईषल्लवणं का-

लवणं । काम्लं । कामधुरं । काज्यं । काक्षीरं । कादधि । कु ईषत् तन्त्रं कातन्त्रम् । काक्षेण वीक्षते ।

कवश्चोष्णे ॥ ४७२ ॥ ईषदर्थे वर्तमानस्य कुशब्दस्य कवादेशो भवति तत्पुरुषे चोष्णशब्दे परे । चकारोऽत्र विकल्पार्थः । कु ईषच्च तत् उष्णं च कवोष्णं । कोष्णं । कु ईषदुष्णं ।

पथि च ॥ ४७३ ॥ तत्पुरुषसमासे कुशब्दस्य कादेशो भवति पथिन्शब्दे च परे । कुत्सितश्चासौ पन्थाश्च कापथः । समासान्तगतेत्यादिना अप्रत्ययः । नस्तु क्वचिन्नलोपः । इवर्णावर्णयोर्लोपः स्वरे प्रत्यये ये च । इति इकारलोपः ।

पुरुषे तु विभाषया ॥४७४॥ कुशब्दस्य कादेशो भवति वा तत्पुरुषे पुरुषशब्दे परे । कुत्सितश्चासौ पुरुषश्च कापुरुषः । कुपुरुषः ।

याकारौ स्त्रीकृतौ ह्रस्वौ क्वचित् ॥ ४७५ ॥ ईकारश्च आकारश्च याकारौ । याकारौ स्त्रीकृतौ ह्रस्वौ भवतः समासे क्वचिल्लक्षानुरोधात् । रेवत्याः मित्रं रेवतिमित्रं । एवं रोहिणिमित्रं । इष्टकानां चितं इष्टकचितं । इषीकाणां तूलं इषीकतूलं । इत्यादि ।

ह्रस्वस्य दीर्घता ॥ ४७६ ॥ ह्रस्वस्य दीर्घता भवति समासे क्वचिल्लक्ष्यानुरोधात् । दात्राकारौ कर्णौ यस्यासौ दात्राकर्णः । द्विगुणाकर्णः ॥

नहिवृतिवृषिव्यधिरुचिसहितनिरुहिषु क्विबन्तेषु प्रादिकारकाणाम् ॥ ४७७ ॥ प्रादीनां कारकाणामेषु क्विबन्तेषु दीर्घता भवति नह्यादिषु धातुषु परतः । उपानत् । उपावृत् । प्रावृट् । कर्मावित् । नीरुक् । प्रतीषट् । परीतत् । वीरुत् । इत्यादि ।

अनव्ययविसृष्टस्तु सकारं कपवर्गयोः ॥ ४७८ ॥ अनव्ययविसृष्टस्तु सकारमापद्यते कपवर्गयोः परतः । अयस्कारः । अयस्कल्पः । अयस्पाशः । अयस्काम्यति । अयस्काम इत्यादि । कारकल्पपाशकाम्यकेषु सकारो दृश्यते ।

श्लोकः ।

बहुव्रीह्यव्ययीभावौ द्वन्द्वतत्पुरुषौ द्विगुः ।
कर्मधारय इत्येते समासाः षट् प्रकीर्तिताः ॥ १ ॥

इति समासः समाप्तः ।

अथ तद्धितः किञ्चिदुच्यते ॥

कपटोरपत्यं । भृगोरपत्यं । विदेहस्यापत्यं । उपगोरपत्यं । इति स्थिते ।

वाणपत्ये ॥ ४७९ ॥ षष्ठ्यन्तान्नाम्नोऽण्प्रत्ययो भवति वा अपत्ये अभिधेये । तस्येत्यादिना विभक्तिलोपः ।

वृद्धिरादौ सणे ॥४८०॥ स्वराणामादिस्वरस्य वृद्धिर्भवति सणकारानुबन्धे तद्धिते परे । का वृद्धिः ।

आरुत्तरे च वृद्धिः ॥ ४८१ ॥ अवर्ण ऋवर्ण इवर्ण उवर्णानामा आर् उत्तरे ऐ औ च द्वे सन्ध्यक्षरे वृद्धयो भवन्ति । प्रयोगात् । अवर्णस्य आकारवृद्धिः । ऋवर्णस्य आर् वृद्धिः । इवर्णस्य एकारस्य च ऐकारवृद्धिः । उवर्णस्य ओवर्णस्य च औकारवृद्धिः ।

उवर्णस्त्वोत्वमापाद्यः ॥ ४८२ ॥ उवर्णस्तु ओत्वमापादनीयस्तद्धिते स्वरे ये च परे ।

कार्यावृवावादेशावोकारौकारयोरपि ॥ ४८३ ॥ ओकारऔकारयोरवावौ आदेशौ कार्यौ भवतस्तद्धिते स्वरे ये च परे । कापटवः । भार्गवः । वैदेहः । औपगवः औपगवौ औपगवाः । इति पुरुषशब्दवत् । एवं यास्कः यास्कौ । बैदः बैदौ । आङ्गिरसः । कौत्सः । वासिष्ठः । गौतमः । ब्राह्मणः । ऐदम इत्यादि । पञ्चालस्यापत्यं ।

रूढादण् ॥ ४८४ ॥ जनपदसमाननामानः क्षत्रिया रूढा रूढशब्दात्परो अण् प्रत्ययो भवति । अपत्येऽभिधेये ।

इवर्णावर्णयोर्लोपः स्वरे प्रत्यये ये च ॥ ४८५ ॥ इवर्णावर्णयोर्लोपो भवति तद्धिते स्वरे ये च परे। पाञ्चालः । पञ्चालस्यापत्ये पाञ्चालौ । बहुत्वे ।

रूढानां बहुत्वेऽस्त्रियामपत्यप्रत्ययस्य ॥४८६॥ रूढानां बहुत्वे विहितस्याख्यभिधेयस्य अपत्यप्रत्ययस्य लुग्भवति निमित्ताभावे नैमित्तिकाभाव इति वृद्धेरपि लोपो भवति । पञ्चालाः । एवं विदेहाः । मगधाः । अङ्गाः। अस्त्रियामिति किं। पाञ्चाल्यः। वैदेह्यः। मागध्य इत्यादि । भृगोरपत्यं ।

ऋषिभ्योऽण् ॥ ४८७ ॥ ऋषिवाचिभ्यः परोऽण् भवति अपत्येऽर्थे । भार्गवः । भार्गवौ । बहुत्वे ।

भृग्वत्र्यङ्गिरस्कुत्सवसिष्ठगोतमेभ्यश्च ॥ ४८८ ॥ भृग्वादिभ्यो बहुत्वे विहितस्याख्यभिधेयस्य अपत्यप्रत्ययस्य लुग्भवति। भृगवः। अत्रयः। अङ्गिरसः। गोतमा इत्यादि। अस्त्रियामिति किं। भार्गव्यः । णटकारानुबन्धादिति नदादित्वादीप्रत्ययः । गर्गस्यापत्यं । इति स्थिते ।

ण्य गर्गादेः ॥ ४८९ ॥ गर्गादेर्गणात् ण्यो भवति अपत्येऽभिधेये ।

*** इवर्णावर्णयोर्लोपः स्वरे प्रत्यये ये च ॥४९०॥** इवर्णावर्णयोर्लोपो भवति तद्धिते स्वरे ये च परे । गार्ग्यः गार्ग्यौ । वत्सस्यापत्यं वात्स्यः वात्स्यौ । कौत्स्यः कौत्स्यौ । बहुत्वे ।

गर्गयस्कबिदादीनां च ॥ ४९१ ॥ गर्गादीनां यस्कादीनां बिदादीनां च बहुत्वे विहितस्य अख्यभिधेयस्य अपत्यप्रत्ययस्य लुग्भवति । गर्गाः । वत्साः । कुत्साः । उभयत्र ण्योलुक् । उर्वाः । यस्काः । बिदाः । अणो लुक् । इत्यादि ।

कुञ्जादेरायनण् स्मृतः ॥ ४९२॥ कुञ्जादेर्गणात् आयनण् प्रत्ययो भवति अपत्येऽर्थे तदन्ते ण्यश्च स्मृतः। अस्त्रीनडादिबहुत्वे कुत

एतत् स्मृतग्रहणाधिक्यात् । कुञ्जस्यापत्यं कौञ्जायन्यः कौञ्जायन्यौ । एवं ब्राध्नायन्यः ब्राध्नायन्यौ । स्त्रियां तु । कौञ्जायनी । नडादेस्तु । नाडायनः । चारायणः । मौञ्जायनः । शाकटायनः। बहुत्वे । कौञ्जायनाः कुञ्जस्यापत्यानि । एवं ब्राध्नायनाः ।

स्त्र्यत्र्यादेरेयण् ॥ ४९३ ॥ स्त्रियामदादिभ्योऽत्र्यादेश्च एयण् भवति अपत्येऽभिधेये । विनताया अपत्यं वैनतेयः । एवं सौपर्णेयः । योधवेयः । कौन्तेयः । अत्रेरपत्यं आत्रेयः आत्रेयौ । बहुत्वे। अग्निसंज्ञायामेत्वमियादेशश्च। अत्रयः भृग्वत्र्यङ्गिरेत्यादिना अपत्यप्रत्ययस्य लुक् । सत्यामग्निसंज्ञायां इरेदुरोज्जसि । इत्येत्वं अयिं। ऐवं सौभ्रेयः । गाङ्गेयः । भद्रबाहोरपत्यं ।

ण्येऽकद्वादिस्तु लुप्यते ॥ ४९४ ॥ ण्ये प्रत्यये परे उवर्णो लुप्यते नतु कद्रूशब्दस्य । भाद्रबाहेयः। कामण्डलेयः । अकद्रु इति किम् । काद्रवेयः ।

सर्वनाम्नः संज्ञाविषये स्त्रियां विहितत्वात् ॥ ४९५ ॥
सर्वनाम्नः परः संज्ञाविषये रेयण् भवति अपत्येभिधेये। सर्वा काचित् स्त्री । सर्वाया अपत्यं सार्वेयः । इत्यादि ।

इणतः ॥ ४९६ ॥ अकारान्तान्नाम्न इण् प्रत्ययो भवति अपत्येऽभिधेये । दक्षस्यापत्यं दाक्षिः । एवं दाशरथिः । आर्जुनिः । दैवदत्तिः । अस्यापत्यं इः इत्यादि ।

बाह्वादेश्च विधीयते ॥४९७॥ बाह्वादेर्गणादिण् प्रत्ययो भवति अपत्येऽभिधेये । उपबाहोरपत्यमौपबाहविः । भाद्रबाहविः ।

नस्तु क्वचित् ॥४९८॥ नस्य लोपो भवति क्वचित् लक्ष्यानुरोधात् ॥ उडुलोम्नोऽपत्यं औडुलोमिः । एवमाग्निशर्मिः ।

मनोः षण्य्यौ ॥४९९॥ षष्ठ्यन्तान्मनुशब्दात्परौ षण्य्यौ प्रत्ययौ भवतः अपत्यार्थे । मनोरपत्यं मानुषः । मनुष्यः । मानवः । वाणपत्ये इति अण् भवति ।

कुर्वादेर्यण् ॥ ५०० ॥ कुर्वादेर्गणात् यण् प्रत्ययो भवति अपत्येर्थे। कुरोरपत्यं कौरव्यः । वाणपत्ये इतिअण् भवति । कौरवः । लहस्यापत्यं लाह्यः ।

क्षत्रादियः ॥ ५०१ ॥ षष्ठ्यन्तात् क्षत्रशब्दात्पर इयः प्रत्ययो भवति अपत्यर्थे । क्षत्रियः ।

कुलादीनः ॥ ५०२ ॥ कुलशब्दात्पर ईन प्रत्ययो भवति जातार्थे । कुले जातः कुलीनः । इत्यादि ।

रागान्नक्षत्रयोगाच्च समूहात्सास्य देवता ।
तद्वेत्त्यधीते तस्येदमेवमादेरणिष्यते ॥ १ ॥

रागात् अण्। कुसुम्भेन रक्तं कौसुभं । एवं हारिद्रं वस्त्रं । कौंकुमं । माञ्जिष्ठं। काषायं। नक्षत्रयोगात् । पुष्येण चन्द्रयुक्तेन युक्तः कालः ।

पुष्यतिष्ययोर्नक्षत्रे ॥ ५०३ ॥ नक्षत्रार्थे वर्तमानयोः पुष्यतिष्ययोर्यकारस्य लोपो भवति अणि परे । इति यकारलोपः ।

***मत्स्यस्य यस्य स्त्रीकारे ईये चागस्त्यसूर्ययोः ॥** ॥ ५०४ ॥ इति सूत्राद्य इति अनुवर्तनं। पौषः कालः। पौषो मासः। पौषी रात्रिः । पौषमहः । एवं तैषो मासः। तैषी रात्रिः। तैषमहः। चित्रया चन्द्रयुक्तया युक्तः कालः चैत्रः । वैशाखः । एवं ज्येष्ठः । आषाढः । श्रावणः । भाद्रपदः । आश्वयुजः । कार्तिकः। मार्गशिरः । माघः। फाल्गुनः । एवं सर्वत्र। समूहात्।युवतीनां समूहो यौवतं । एवं हांसं । काकं । क्षात्रं। शौद्रं । आर्षं ।मार्गं। सास्य देवता। जिनो देवता अस्य इति जैनः । एवं शैवः । वैष्णवः । ब्राह्मणः । बौद्धः । कापिलः । सौरः । ऐन्द्रः । तद्वेत्ति । जिनं वेत्तीति जैन इत्यादि । छन्दो- वेत्त्यधीते वा छान्दसः । व्याकरणं वेत्त्यधीते वा वैयाकरणः। भारतः। तस्येदं । मृगस्य इदं मांसं मार्गं । सौकरं । कौमारं । पुत्रस्येदं पौत्रं । दैवं । पौरुषं । यून इदं यौवनं। एवमादिर्यस्येति गणो गृह्यते। चक्षुषा गृह्यते चाक्षुषं रूपं। एवं श्रावणः शब्दः। रसनो रसः। स्पर्शेन स्पार्शः।

दृषदि पिष्टा दार्षदाः सक्तवः । उलूखलेन क्षुण्णा औलूखलास्तण्डुलाः । अश्वैरुह्यते रथः आश्वो रथः । चतुर्भिरुह्यते चातुरं शकटं । चतुर्दश्यां दृष्टश्चातुर्दशो राक्षसः । त्रिविद्य एव त्रैविद्यः । पटोर्भावः पाटवं । लाघवं कौशलमित्यादि ।

तेन दीव्यति संसृष्टं तरतीकण्चरत्यपि । पण्या-च्छिल्पान्नियोगाच्च क्रीतादेरायुधादपि ॥ २ ॥

तेन दीव्यति तेन संसृष्टं तेन तरति तेन चरत्यपि पण्यात् शिल्पात् नियोगाच्च क्रीतादेरायुधादपि । इतीकण् प्रत्ययो भवति । तेन दीव्यतीत्यत्र इकण् । अक्षैर्दीव्यति आक्षिकः । एवं गिरिणा दीव्यति गैरिकः । दाण्डिकः । तेन संसृष्टमित्यादि । दध्ना संसृष्टं दाधिकमौदनं । एवं क्षैरिकः । तान्त्रिकः । धार्मिकः । शार्ङ्गवेरिकः । सार्पिषिकः । लावणिकः । मारिचिकः । तेन तरतीत्यत्रापि । उडुपेन तरतीति औडुपिकः । एवं वाहित्रिकः । द्रोण्या तरतीति द्रौणिकः । गौपुच्छिकः । नावा तरतीति नाविकः । चरतीत्यत्रापि । शिबिकया चरतीति शैबिकिकः । एवं आश्विकः । औष्ट्रिकः । शृङ्गवेरेण चरतीति शार्ङ्गवेरिकः । पण्यात् । ताम्बूलं पण्यमस्य ताम्बूलिकः । एवमपिशब्दग्रहणात् यथाशिष्टप्रयोग्यं भवति । गन्धः पण्योऽस्येति गान्धिकः । एवं सार्पिषिकः । वास्त्रिकः । राजतिकः । लौहितिकः । शिल्पात् । मृदङ्गं शिल्पमस्येति मार्दङ्गिकः । एवं पाणविकः । शाङ्खिकः । काहलिकः । वैणिकः । त्रैवलिकः । वांशिकः । तालिकः । नियोगात् । शुल्कं नियोगो यस्येति शौल्किकः । एवं भाण्डागारिकः । माहानसिकः । प्रातीहारिकः । क्रीतादेः । सहस्रेण क्रीतं साहस्रिकं । एवं शातिकं । लाक्षिकं । सुवर्णेन क्रीतं सौवर्णिकं । आदिशब्दात् । लक्षेण युक्तो लाक्षिकः । दैवेन प्रवृत्तो दैविकः । कर्षापणेन अर्हतीति कार्षापणिकः । आयुधादपि । चक्रमायुधमस्येति चाक्रिकः । एवं कौन्तिकः । तौमरिकः । खाड्गिकः । क्रीतादेरित्यत्र ग्रहणात्तस्येति षष्ठ्यन्तान्नाम्नः परो वापत्ये तस्मिन्नर्थे इकण् प्रत्ययो भवति । प्रष्टस्य

वापः प्राष्टिकं क्षेत्रं । वाप इति कोऽर्थः । कुम्भस्य वापः कौम्भिकमित्यादि ।

नावस्तार्ये विषाद्वध्ये तुलया सम्मितेऽपि च तत्र साधौ यः ॥ ५०५ ॥ नावस्तृतीयान्तात्तार्येऽर्थे विषात्तृतीयान्ताद्वध्येऽर्थे तुलया तृतीयान्तात्सम्मितेऽर्थेऽपि च तत्रेति सप्तम्यन्तात्साधावर्थे यः प्रत्ययो भवति । नावा तार्यमिदं नाव्यं । विषेण वध्यो विष्यः । तुलया सम्मितं तुल्यं । कर्मणि साधुः कर्मण्यः । अपि चेति वचनात् गिरिणा तुल्यो हस्ती गिरितुल्यः । तुल्यः सदृशः कुशलो योग्यो हितश्चेति साधुरुच्यते ।

ईयस्तु हिते ॥ ५०६ ॥ हितार्थे ईयः प्रत्ययो भवति । वत्सेभ्यो हितो वत्सीयो गोधुक् । एवमश्वीयः । जनकेभ्यो हितो जनकीयः । जननीयः । त्वदीयः । मदीयः । युष्मदीयः ।

तत्र जातस्तत आगतः ॥ ५०७ ॥ इत्यादिषु च ईयः प्रत्ययो भवति । शालायां जातः शालीयः । शालाया आगतः शालीयः ।

यदुगवादितः ॥ ५०८ ॥ उवर्णान्ताद्गवादिभ्यश्च हितार्थे यद्भवति । कृकवाकुभ्यो हितः कृकवाकव्यः । वधूभ्यो हितो वधव्यः । गोभ्यो हितो गव्यः । पटुभ्यो हितः पटव्यः । हविर्भ्यो हिता हविष्यास्तण्डुलाः । गवादय इति के । गो हविस् अष्टका बर्हिस् मेधा स्रच् इति गवादिगणः ।

उपमाने वतिः ॥ ५०९ ॥ उपमानेऽर्थे वतिः प्रत्ययो भवति । राजेव वर्त्तते राजवत् । ब्राह्मणस्येव वृत्तमस्येति ब्राह्मणवत् । मथुरायामिव पाटलिपुत्रे प्रासादा मथुरावत् । देवमिव त्वां पश्यामि देववत् । इत्यादि । सर्वत्र द्रव्यगुणक्रियाभिः साम्यमुपमानमस्तीति वत् भवितव्यम् । द्रव्ये । देवदत्त इव धनवान् देवदत्तवत् । एवं कुबेरवत् । बलिवत् । गुणे । यतिरिव गुणवान् यतिवत् । जलमिव शैत्यं जलवत् । अग्निरिव औष्ण्यमग्निवत् । श्रीखण्ड इव सुरभिः श्रीखण्डवत् । क्रियायां । ब्राह्मण इव वर्त्तते ब्राह्मणवत् । एवं पिशाचवत् ।

तत्वौ भावे ॥ ५१० ॥ भावेऽभिधेये तत्वौ भवतः । शब्द-स्य प्रवृत्तिनिमित्तं भावो[1] भवति । तप्रत्ययस्य स्त्रियां वृत्तिः । त्वप्रत्य-यस्य नपुंसके वृत्तिः । पटस्य भावः पटता पटत्वं । एवं अश्वता अ-श्वत्वं । गोता गोत्वं । इति द्रव्यभावः । शुक्लस्य भावः शुक्लता शु-क्लत्वं । रूपता रूपत्वं । रसता रसत्वं । ज्ञानता ज्ञानत्वं । सुखता सु-खत्वं । इति गुणभावः । उत्क्षेपणता उत्क्षेपणत्वं । गमनता गमनत्वं । इति क्रियाभावः ।

यण् च प्रकीर्तितः ॥ ५११ ॥ भावेऽभिधेये यण् प्रकीर्ति-तस्तत्वौ च । जडस्य भावो जाड्यं जडता जडत्वं । एवं ब्राह्मण्यं ब्राह्मणता ब्राह्मणत्वं ।

अघुट् स्वरतद्धिते ये ॥ ५१२ ॥ तद्धिते ये परे अघुट्-स्वरवत्कार्यं भवति । अघुट्स्वरादौ सेट्कस्यापि वन्सेर्वेशब्दस्योत्व-मित्युत्वं । विदुषां भावो वैदुष्यं । प्रकीर्तितग्रहणाधिक्यादन्यस्मिन्नर्थे-ऽपि यण् प्रकीर्तितस्तत्वौ च भवतः । ब्राह्मणस्य कर्म ब्राह्मण्यं ब्राह्म-णता ब्राह्मणत्वं । पुनः पुनर्भावः पौनःपुन्यं ।

तदस्यास्तीति मन्त्वन्त्वीन् ॥५१३॥ तदिति प्रथमान्ता-दस्यास्तीत्येतस्मिन्नर्थे मन्तु वन्तु विन् इन् इत्येते प्रत्यया भवन्ति । गा-वोऽस्य सन्तीति गोमान् । आयुरस्यास्तीस्ति आयुष्मान् । इतिशब्दस्य विवक्षार्थत्वात् । अवर्णान्तात् अवर्णोपधात् मकारान्तात् मकारोपधात् धुडन्तात् अशिडन्तात् परो वन्त् प्रत्ययो भवति । अशिडन्तादित्यु-क्ते सति तद्वचनं सामान्यमेव । तत्र हकारो वर्जनीयः । अवर्णान्तात् । वृक्षोऽस्यास्तीति वृक्षवान् । शालास्यास्तीति शालावान् । इत्यादि । अवर्णोपधात् । तक्षास्यास्तीति तक्षवान् । कर्मास्यास्तीति कर्मवान् । क्वचिन्नकारलोपः । मकारान्तात् । इदमस्यास्तीति इदंवान् । किमस्यास्ती-ति किंवान् । इत्यादि । मकारोपधात् । लक्ष्मीरस्यास्तीति लक्ष्मीवान् ।

---

1 भवतः अस्मात् अभिधानप्रत्ययाविति भावः ।

एवं धर्मवान् । इत्यादि । धुडन्तात् । विद्युदस्यास्तीति विद्युत्वान् । वर्गप्रथमा इत्यादिना तृतीये प्राप्ते सति । तसोर्न तृतीयो मत्वर्थे इत्यनेन सूत्रेण तृतीयत्वं न भवति । अशिडन्तादिति किं । आयुरस्यास्तीति आयुष्मान् ।

असन्तमायामेधास्रग्भ्यो वा विन् ॥५१४॥ एभ्यः परो विन् प्रत्ययो वा भवति । यशोऽस्यास्तीति यशस्वी । पक्षे वन्तु यशस्वान् । अत्र सकारस्य दकारो विसर्गश्च न भवति । तपोऽस्यास्तीति तपस्वी । तपस्वान् । एवं तेजस्वी तेजस्वान् । धुटां तृतीयः । धुटां तृतीयो भवति घोषवति सामान्ये । लवर्णतवर्गलसा दन्त्या इति न्यायात् सकारस्य दकारे प्राप्ते सति ।

तसोर्न तृतीयो मत्वर्थे ॥५१५॥ तकारसकारयोस्तृतीयो मत्वर्थे न भवति। मत्वर्थे इति कोऽर्थः । अस्त्यर्थे । पश्चात् रेफसोर्विसर्जनीये प्राप्ते सकृद्बाधितो विधिर्बाधित एव सत्पुरुषवत् । मायास्यास्तीति मायावी मायावान् । मेधास्यास्तीति मेधावी मेधावान् । स्रगस्यास्तीति स्रग्वी स्रग्वान् । व्यञ्जनान्तस्य यत्सुभोरिति न्यायात् चवर्गदृगादीनां चेति गत्वमनेन न्यायेन अघोषे प्रथमः । वर्गप्रथमास्तृतीयान् ।

बहुलमिन् भवति ज्ञानमस्यास्तीति ज्ञानी । दण्डो यस्यास्तीति दण्डी । शिखास्यास्तीति शिखी । देवोऽस्यास्तीति देवी । इत्यादि ।

तदस्य संजातं तारकादेरितच् ॥५१६॥ तदिति प्रथमान्तातदस्य संजातमित्यस्मिन्नर्थे तारकादेराकृतिगणात् पर इतच् प्रत्ययो भवति । तारका संजाता अस्येति तारकितं नभः । एवं कण्टकितः करः । पल्लवितः वृक्षः ।

संख्यायाः पूरणे डमौ ॥ ५१७ ॥ संख्यायाः पूरणेर्थे डमौ भवतः । एकादशपर्यन्तं संख्या । ततः परमसंख्या ॥ असंख्यादेर्नान्ताया मो भवति तत्कथं वाशब्दात् । वाशब्दः क्वास्ते । वाणपत्ये इत्यत्र ।

डानुबन्धेऽन्त्यस्वरादेर्लोपः ॥ ५१८ ॥ डानुबन्धे प्रत्यये परे अन्त्यस्वरादेर्लोपो भवति । एकादशानां पूरण एकादश एकादशी एकादशं । द्वादश । अत्र आत्वं निपातः । त्रयोदश । अत्र त्रयस्तु निपातः । चतुर्दशः । पञ्चदशः । पञ्चमः । पञ्चमी । पञ्चमं । एवं सप्तमः । अष्टमः । नवमः । दशमः ॥ इत्यादि ।

द्वेस्तीयः ॥५१९॥ द्वेस्तीयो भवति पूरणेऽर्थे । द्वयोः पूरणो द्वितीयः । द्वितीया । द्वितीयं ।

त्रेस्तृ च ॥५२०॥ त्रेस्तीयो भवति तृआदेशश्च पूर्णेऽर्थे । त्रयाणां पूरणस्तृतीयः । तृतीया तृतीयं ।

अन्तस्थो डे षोः ॥५२१॥ रेफषकारयोरन्तस्थो भवति डे परे । चतुर्णां पूरणश्चतुर्थः । चतुर्थी चतुर्थं ।

तवर्गस्य षटवर्गाट्टवर्गः ॥ ५२२ ॥ षकारटवर्गान्तात्परस्य तवर्गस्य टवर्गो भवति आन्तरतम्यात् । षण्णां पूरणः षष्ठः षष्ठी षष्ठं ।

कतिपयात्कतेः ॥ ५२३ ॥ कतिपयात्कतेश्च पूरणेऽर्थे थो भवति डे परे । कतिपयानां पूरणः कतिपयथः । कतीनां पूर्णः कतिथः कतिपयथी । कतिथी । कतिपयथं । कतिथं ।

विंशत्यादेस्तमट् ॥ ५२४ ॥ विंशत्यादेस्तमट् प्रत्ययो भवति पूरणेऽर्थे । विंशतितमः । विंशतेः पूरणी विंशतितमी । विंशतितमं । त्रिंशतः पूरणः त्रिंशत्तमः । त्रिंशत्तमी । त्रिंशत्तमं । चत्वारिंशत्तमः । पञ्चाशत्तमः । उत्तरत्र नित्यग्रहणादिह विकल्पो लभ्यते । उत्तरत्र नित्यग्रहणं क्वास्ते नित्यं शतादेरित्यत्र । यत्र संख्या विद्यते तत्र विकल्पेन तमट् भवति ।

तोर्विंशतेरपि ॥५२५॥ विंशतेरपि तेर्लोपो भवति डानुबन्धे प्रत्यये परे । अपिशब्दात् । अस्य लोपो भवति । विंशः । त्रिंशः । चत्वारिंशः । पञ्चाशः ।

नित्यं शतादेः ॥५२६॥ शतादेर्गणात पूरणेऽर्थे नित्यं तमट्

प्रत्ययो भवति । एकशतस्य पूरण एकशततमः । एकशततमी । एकशततमं । एकसहस्रस्य पूरण एकसहस्रतमः । एकसहस्रतमी एकसहस्रतमं । एककोटितमः ।

षष्ट्याद्यतत्परात् ॥ ५२७ ॥ षष्ट्यादेरसंख्यायाः परात् पूरणेऽर्थे नित्यं तमट् भवति । षष्टेः पूरणः षष्टितमः । षष्टेःपूरणी षष्टितमी । षष्टितमं । सप्ततितमः । अशीतितमः । नवतितमः । अतत्परादिति किं । एकषष्टेःपूरण एकषष्टः । एकषष्टितमः । यत्र संख्या विद्यते तत्र विकल्पेन तमट् प्रत्ययो भवति ।

विभक्तिसंज्ञा विज्ञेया वक्ष्यन्तेऽतः परन्तु ये ॥
येऽद्यादेः सर्वनाम्नस्ते बहोश्चैव पराः स्मृताः ॥ ३ ॥

अतः परं द्व्यादिवर्जितात्सर्वनाम्नः परा ये प्रत्यया वक्ष्यन्ते ते विभक्तिसंज्ञा विज्ञेयाः । तु पुनर्बहोश्चैव इति कोऽर्थः । बहुशब्दात्पराः प्रत्ययाः कथिताः श्रुतत्वात्सर्वनाम्नः कार्यं प्रति विभक्तिसंज्ञा भवन्ति । तेन तदा कदा इति घोषवति न दीर्घः । तस्मिन् काले तदा "दादानीमौतदः स्मृतौ" इति दा प्रत्ययः । कस्मिन्काले कदा । काले किं । सर्वयदेकान्येभ्य एव दा इति दाप्रत्ययः । विभक्तिसंज्ञा इति । विभक्तिकार्यं किं त्यदादित्वं अकारे लोपं । एकत्र किं क इति कादेशः ।

पञ्चम्यास्तस् ॥ ५२८॥ पञ्चम्यन्तात् द्व्यादिवर्जितात्सर्वनाम्नो बहोश्च परस्तस् भवति । सर्वस्मात् सर्वतः । तस्प्रत्ययान्ता अव्ययानि भाष्यन्ते । अव्ययाद्विभक्तेर्लोपः । तस्मात् ततः । यस्मात् यतः । बहुभ्यो बहुतः । एवं विश्वतः । उभयतः । अन्यतः । पूर्वतः । परतः । इत्यादि । अद्व्यादेरिति किं द्वाभ्यां । उगवादित इत्यत्र कथं प्रयोगश्चेति ज्ञापयति । तेन

असर्वनाम्नोप्यवधिमात्रात्तस् वक्तव्यः ॥५२९॥ असर्वनाम्नोऽपि परस्तस्प्रत्ययो भवति अवधिमात्रात् । अत्रावधिमात्रादिति कोऽर्थः प्रयोगमात्रादित्यर्थः । इत्यनेन सूत्रेण तस्प्रत्ययो भवति ।

ग्रामात् ग्रामतः। प्रयोगात् प्रयोगतः । एवं वृक्षात् वृक्षतः। पटतः। घटतः।

तत्रेदमिः ॥ ५३० ॥ तेषु विभक्तिसंज्ञकेषु प्रत्ययेषु परत इदम् इकारतां प्राप्नोति । अस्मात् इतः ।

तेषु त्वेतदकारताम् ॥ ५३१॥ तेषु तकारादिषु विभक्तिसंज्ञकेषु परत एतद् शब्द अकारतां प्राप्नोति । एतस्मात् अतः । तकारादिष्विति किं । एतेन प्रकारेण एतथा ।

तहोः कुः ॥५३२॥ तकारहकारयोः परयोः किंशब्दः कुर्भवति । कस्मात् कुतः ।

त्रः सप्तम्याः ॥५३३॥ सप्तम्यन्ताद् द्व्यादिवर्जितात्सर्वनाम्नो बहोश्च परतः त्रप्रत्ययो भवति। सर्वस्मिन् सर्वत्र । एतस्मिन् अत्र। कस्मिन् कुत्र । अमुष्मिन् अमुत्र । तस्मिन् तत्र । यस्मिन् यत्र। बहुषु बहुत्र । अद्व्यादेरिति किं । द्वयोः । त्वयि मयि । इत्यादि ।

आद्यादिभ्यः सप्तम्यन्तेभ्यश्च ॥ ५३४ ॥ सप्तम्यन्तेभ्य आद्यादिभ्यश्च परस्तस् प्रत्ययो भवति । आदौ आदितः । एवं मध्ये मध्यतः । अन्ते अन्ततः । अग्रे अग्रतः । मुखे मुखतः । पृष्ठे पृष्ठतः । पार्श्वे पार्श्वतः । पूर्वे पूर्वतः । परे परत इत्यादि ।

इदमो हः ॥५३५॥ इदमः सप्तम्यन्तात् हो भवति त्रापवादः । अस्मिन् इह ।

किमः ॥५३६॥ किमः सप्तम्यन्तात् हो भवति । कस्मिन् कुह।

अत् क च ॥५३७॥ किमः सप्तम्यन्तात् अद् भवति कादेशश्च । कस्मिन् क ।

काले किंसर्वयदेकान्येभ्य एव दा ॥ ५३८ ॥ काले वर्तमानेभ्यः सप्तम्यन्तेभ्य एभ्यो दा भवति । कस्मिन् काले कदा । एवं सर्वदा । यदा । एकदा । अन्यदा । काल इति किं। सर्वत्र देशे ।

सदा इति निपातः ॥ ५३९ ॥ सर्वशब्दात्परो दाप्रत्ययो भवति । सर्वस्य सभावश्च। सर्वस्मिन्काले सदा।

इदमोर्ह्यधुनादानीम् ॥ ५४० ॥ काले वर्तमानात्सप्तम्यन्तादिदमः परा र्हि अधुना दानीम् एते प्रत्यया भवन्ति ।

रथोरेतेत् ॥५४१॥ रथोः परत इदम्शब्द एत इत् इत्येतौ प्राप्नोति । अस्मिन् काले एतर्हि । इवर्णोवर्णयोर्लोपः । अधुना । इदानीम् । इत्थम् ।

दादानीमौ तदः स्मृतौ ॥ ५४२ ॥ काले वर्त्तमानात्सप्तम्यन्तात्तदः परौ दादानीमौ स्मृतौ । तस्मिन् काले तदा । तदानीं ।

सद्यआद्या निपात्यन्ते ॥ ५४३ ॥ सद्यआद्याः शब्दाः कालेऽभिधेये निपात्यन्ते । लक्षणसूत्रमन्तरेण लोकप्रसिद्धशब्दरूपोच्चारणं निपातनं । समाने अहनि सद्यः । समानस्य सभावो द्यश्च परविधिः । पूर्वस्मिन् संवत्सरे परुत् । पूर्वतरस्मिन् संवत्सरे परारि ।

पूर्वपूर्वतरयोः परा उदारी च संवत्सरे ॥ ५४४ ॥ पूर्वपरयोः परौ उदारी च भवतः । चशब्दात्पर आदेशश्च संवत्सरेर्थे ।

इदमः समसण् ॥ ५४५ ॥ सप्तम्यन्तादिदमः समसण् प्रत्ययो भवति संवत्सरेर्थे । अस्मिन्संवत्सरे ऐषमः ।

पूर्वादेरेद्युस् ॥ ५४६ ॥ सप्तम्यन्तात्पूर्वादेर्गणात् पर एद्युस् प्रत्ययो भवति । पूर्वस्मिन्नहनि पूर्वेद्युः । एवं परेद्युः । अन्येद्युः । अन्यतरेद्युः । इतरेद्युः । कतरेद्युः । अपरेद्युः ।

उभयाद्द्युश्च ॥ ५४७ ॥ सप्तम्यन्तादुभयशब्दात्परो द्युस् भवति । चकारात् एद्युस् भवति । उभयस्मिन्नहनि उभयेद्युः । उभयद्युः ।

परादेरेद्यविस् ॥ ५४८ ॥ परादेर्गणात्पर एद्यविस् प्रत्ययो भवति । परस्मिन्नहनि परेद्यविः। एवमन्येद्यविः । अन्यतमेद्यविः । इत्यादि ।

प्रकारवचने तु था ॥ ५४९ ॥ अद्व्यादेः सर्वनाम्नः प्रकारवचने तु था भवति । प्रकारशब्दः सदृशार्थो विशेषार्थश्च सामान्यभेदकः प्रकारः । सर्वेण प्रकारेण सर्वथा । एवमन्यथा । यथा । तथा । उभयथा । पूर्वथा । अपरथा । वाक्यार्थविशेषेण सर्वविभक्तिभ्यो

ज्ञेयः थाप्रत्ययः । सर्वस्मै प्रकाराय यदि वा सर्वस्मिन् प्रकारे सर्वथा इत्यादि ।

संख्यायाः प्रकारे धा ॥ ५५० ॥ संख्यायाः परः प्रकारवचने धा भवति । चतुर्भिः प्रकारैः चतुर्धा । एवं द्विधा । एकधा । बहुभिः प्रकारैर्बहुधा । पञ्चधा । षोढा षट्प्रकारस्य इति विग्रहः ।

षष् उत्वम् ॥५५१॥ षष्शब्दस्यान्त उत्वं भवति । सप्तधा । अष्टधा । नवधा । दशधा । शतधा । सहस्रधा । लक्षधा । कोटिधा ।

द्वित्रिभ्यां धमणेधा च ॥ ५५२ ॥ द्वित्रिभ्यां परो धमण् एधा च प्रत्ययौ भवतः प्रकारवचने । द्वैधं त्रैधं । द्वेधा त्रेधा ।

इदंकिंभ्यां थमुः कार्यः ॥ ५५३ ॥ इदंकिंभ्यां परः थमुः कार्यः प्रकारवचने । अनेन प्रकारेण इत्थं । केन प्रकारेण कथम् ।

आख्याताच्च तमादयः ॥५५४॥ नाम्न आख्याताच्च परास्तमादयः प्रत्यया भवन्ति ।

प्रकृष्टे तमतररूपाः ॥ ५५५॥ प्रकृष्टार्थे एते प्रत्यया भवन्ति । प्रकृष्टः आढ्यः आढ्यतरः आढ्यतमः आढ्यरूपः । एवं वैयाकरणतमः वैयाकरणतरः वैयाकरणरूपः । पचतितमः पचतितरः पचतिरूपः । एतौ अव्ययौ पुल्लिङ्गौ । अयं नपुंसकलिङ्गः । पचतिरूपं ।

ईषदसमाप्तौ कल्पदेश्यदेशीयाः ॥ ५५६ ॥ ईषदपरिसमाप्तौ अर्थे कल्पदेश्यदेशीया एते प्रत्यया भवन्ति । ईषदपरिसमाप्तः पटुः पटुकल्पः । पटुदेश्यः पटुदेशीयः । पचतिकल्पः । पचतिदेश्यः । पचतिदेशीयः ।

कुत्सितवृत्तेर्नाम्नः पाशः ॥ ५५७ ॥ कुत्सितवृत्तेर्नाम्नः परः पाशः प्रत्ययो भवति । कुत्सितो वैयाकरणो वैयाकरणपाशः ।

भूतपूर्ववृत्तेर्नाम्नश्चरट् ॥ ५५८ ॥ भूतपूर्ववृत्तेर्नाम्नः परश्चरट् प्रत्ययो भवति । टकारः षणटकारानुबन्धादिति विशेषणाऽर्थः ।

भूतपूर्वं आढ्यः आढ्यचरः । भूतपूर्वा आढ्या आढ्यचरी । भूतपूर्वमाढ्यं आढ्यचरं । भूतपूर्वो राजा राजचरः । भूतपूर्वा राज्ञी राजचरी । एवं देवचरः । देवचरी ।

बह्वल्पार्थात्कारकाच्छस्वा मङ्गले गम्यमाने ॥ ५५९ ॥ बह्वर्थात् अल्पार्थाच्च परः शसूप्रत्ययो वा भवति मङ्गले गम्यमाने । बहून् देहि बहुशो देहि । एवं अल्पशो देहि अल्पं देहि । स्तोकशो देहि स्तोकं देहि । शतशो देहि शतं देहि । सहस्रशो देहि सहस्रं देहि । लक्षशो याचते लक्षं याचते ।

वारस्य संख्यायाः कृत्वसुच् ॥५६०॥ वारस्य संबन्धिन्याः संख्यायाः परः कृत्वसुच् प्रत्ययो भवति । उकार उच्चारणार्थः । कृत्वसुच्प्रत्ययान्ता अव्ययानि स्युः । पञ्चवारान् भुङ्क्ते पञ्चकृत्वः । एवं गणकृत्वः । कतिकृत्वः । बहुकृत्वः । एवं सप्तकृत्वो गच्छति । दशकृत्वो ददाति । शतकृत्वो याचते । सहस्रकृत्वो मन्यते इति ।

द्वित्रिचतुर्भ्यः सुच् ॥५६१॥ वारस्य संबन्धिभ्यो द्वित्रिचतुर्भ्यः परः सुच् प्रत्ययो भवति । द्वौ वारौ भुङ्क्ते द्विर्भुङ्क्ते । त्रिर्भुङ्क्ते । चतुर्भुङ्क्ते ।

संख्याया अवयवान्ते तयट् ॥५६२॥ संख्याया अवयवान्तार्थे तयट् प्रत्ययो भवति । द्वौ अवयवौ यस्य असौ द्वितयः । त्रितयः । चतुष्टयः । पञ्चतयः । सप्ततयः ।

परिमाणे तयट् ॥५६३॥ परिमाणेऽर्थे तयट् प्रत्ययो भवति । चत्वारि परिमाणानि यस्य चतुष्टयं । एवं द्वितयं त्रितयं ।

द्वित्रिभ्यामयट् ॥५६४॥ द्वित्रिशब्दाभ्यां परोऽयट् प्रत्ययो भवति समूहेऽर्थे । द्वयोः समूहः द्वयं । त्रयाणां समूहः त्रयं । उत्सेधमानं तिर्यग्मानमिति द्विविधं ।

माने मात्रट् ॥ ५६५ ॥ परिमाणे मात्रट् प्रत्ययो भवति । ऊरुः प्रमाणमस्य ऊरुमात्रमुदकं । ऊरुमात्री परिखा ।

यत्तदेतद्भ्यो डावन्तु ॥५६६॥ यद् तद् एतद् इत्येतेभ्यः परो डावन्तु प्रत्ययो भवति परिमाणेऽर्थे। उकार उच्चारणार्थः । यत्परिमाणमस्य यावान् । एवं तावान् एतावान् ।

किमो डियन्तु ॥ ५६७ ॥ किमः शब्दात्परो डियन्तु प्रत्ययो भवति परिमाणेऽर्थे । किंपरिमाणमस्य कियान् ।

इदमः ॥५६८॥ इदमः परो डियन्तु प्रत्ययो भवति परिमाणेऽर्थे। इदं परिमाणमस्य इयान् ।

अभूत्तद्भावे कृभ्वस्तिषु विकारात् च्विः ॥ ५६९ ॥ अभूत्तद्भावे विकारात् च्विप्रत्ययो भवति कृभ्वस्तिषु परतः ।

च्वौ चावर्णस्य ईत्वम् ॥५७०॥ अवर्णस्य ईत्वं भवति च्वौ परे । सर्वापहारी प्रत्ययस्य लोपः । च्विप्रत्यये परे पूर्वस्वरस्य दीर्घः। शुक्लीकरोति। दीर्घीभवति। पुत्रीस्यात् । पटूस्यात् । कवीकरोति । कवीभवति । कवीस्यात् । मात्रीकरोति । मात्रीभवति । मात्रीस्यात्।

ऊर्ध्वे दघ्नद्वयसटौ च ॥५७१॥ ऊर्ध्ववाचिनि प्रमाणेऽर्थे दघ्नट्द्वयसटौ प्रत्ययौ भवतः । चशब्दान्मात्रट् भवति । ऊरुः प्रमाणमस्य ऊरुदघ्नं । ऊरुद्वयसं । ऊरुमात्रमुदकं ।

हस्तिपुरुषादण् च ॥ ५७२ ॥ हस्तिन् पुरुष इत्येताभ्यां मानेऽर्थेऽण् भवति । चशब्दान्मात्रट् दघ्नट् द्वयसट् च भवति। हस्ती प्रमाणमस्य हास्तिनं । हस्तिमात्रं । हस्तिदघ्नं । हस्तिद्वयसी । पुरुषः प्रमाणमस्य पौरुषं । पुरुषमात्रं । पुरुषदघ्नं। पुरुषद्वयसमुदकमित्यर्थः ।

प्रस्तुतवृते मयट् ॥५७३॥ प्रस्तुतवृते नाम्नः परो मयट् प्रत्ययो भवति। सुवर्णं प्रस्तुतं सुवर्णमयं । एवमन्नं प्रस्तुतमन्नमयं । भस्ममयं । यदि वा अन्नं प्रस्तुतमत्र अन्नमयः कायः। अन्नं प्रस्तुतमत्र अन्नमयं जीवनं । भस्म प्रस्तुतमत्र भस्ममयं तपः । एवं भस्ममयो मठः । भस्ममयी तपस्विनी । भस्ममयी तनुः ।

नय्वोः[1] पदाद्योर्वृद्धिरागमः ॥ ५७४ ॥ इश्च उश्च यू तयोर्य्वोः स्वराणामाद्योः स्वरात्पूर्वयोरिकारोकारयोर्वृद्धिर्न भवति तयोरादौ वृद्धिरागमो भवति णकारानुबन्धप्रत्यये परे । व्याकरणं वेत्ति अधीते वा वैयाकरणः । द्वारे नियोगो यस्येति दौवारिकः । य्वोरिति किं । महानसे नियोगोऽस्येति माहानसिकः । इत्यादि ।

श्लोकः ।

सन्धिर्नाम समासश्च तद्धितश्चेति नामतः ।
चतुष्कमिति तत्रोक्तमित्येतच्छर्ववर्मणा ॥ १ ॥
भावसेनत्रिविद्येन वादिपर्वतवज्रिणा ।
कृतायां रूपमालायां चतुष्कः परिपूर्यते ॥ २ ॥

इति प्रथमा वृत्तिः समाप्ता ।

तिङन्तप्रकरणम् ।

द्वितीया वृत्तिः ।

श्लोकः ।

सर्वकर्मविनिर्मुक्तं मुक्तिलक्ष्म्याश्च वल्लभम् ।
चन्द्रप्रभजिनं नत्वा तिङन्तः कथ्यते मया ॥१॥

अथ त्यादयो विभक्तयः प्रदर्श्यन्ते ॥ १ ॥ ताश्च दशविधा भवन्ति । कास्ताः । वर्तमाना । सप्तमी । पञ्चमी । ह्यस्तनी । अद्यतनी । परोक्षा । श्वस्तनी । आशीः । भविष्यन्ती । क्रियातिपत्तिरिति ।

वर्त्तमाना ॥ २ ॥ ति तस् अन्ति । सि थस् थ । मि वस् मस् । ते आते अन्ते । से आथे ध्वे । ए वहे महे । इमानि अष्टादश वचनानि वर्तमानसंज्ञानि भवन्ति ।

---

१ पदस्याद्योर्यकारवकारयोः समीपे वृद्धिर्न भवति तयोश्चादौ वृद्धिरागमो भवति सणकारानुबन्धे तद्धिते परे स्थानेऽन्तरतम इति न्यायाद् यकारस्यैकारो वकारस्यौकारः ।

सप्तमी ॥ ३ ॥ यात् यातां युस्, यास् यातं यात, यां याव याम। ईत् ईयातां ईरन्। ईथास् ईयाथां ईध्वं, ईय ईवहि ईमहि, इमानि अष्टादश वचनानि सप्तमीसंज्ञानि भवन्ति ॥

पञ्चमी ॥ ४ ॥ तु तां अन्तु, हि तं त, आनि आव आम, तां आतां अन्तां, स्व आथां ध्वं, ऐ आवहै, आमहै, इमानि वचनानि पञ्चमीसंज्ञानि भवन्ति ॥

ह्यस्तनी ॥ ५ ॥ दि तां अन्, सि तं त, अम् व म, त आतां अन्त, थास् आथां ध्वं, इट् वहि महि, इमानि वचनानि ह्यस्तनीसंज्ञानि भवन्ति ॥

एवमेवाद्यतनी ॥ ६ ॥ एवमेवाद्यतनीसंज्ञानि भवन्ति ॥

परोक्षा ॥ ७ ॥ अट् अतुस् उस्, थल् अथुस् अ, अट् व म, ए आते इरे, से आथे ध्वे, ए वहे महे, इमानि वचनानि परोक्षसंज्ञानि भवन्ति ॥

श्वस्तनी ॥ ८ ॥ ता तारौ तारस्, तासि तास्थस् तास्थ, तास्मि तास्वस् तास्मस्, ता तारौ तारस्, तासे तासाथे ताध्वे, ताहे तास्वहे तास्महे, इमानि वचनानि श्वस्तनीसंज्ञानि भवन्ति ॥

आशीः ॥ ९ ॥ यात् यास्तां यासुस्, यास् यास्तं यास्त, यासं यास्व यास्म, सीष्ट सीयास्तां सीरन्, सीष्टास् सीयास्थां सीध्वं, सीय सीवहि सीमहि, इमानि वचनानि आशीःसंज्ञानि भवन्ति ॥

स्यसंहितानि त्यादीनि भविष्यन्ती ॥ १० ॥ स्यति स्यतस् स्यन्ति, स्यसि स्यथस् स्यथ, स्यामि स्यावस् स्यामस्, स्यते स्येते स्यन्ते, स्यसे स्येथे स्यध्वे, स्ये स्यावहे स्यामहे, स्येन संहितानि त्यादीनि वचनानि भविष्यन्तीसंज्ञानि भवन्ति ॥

द्यादीनि क्रियापत्तिः ॥ ११ ॥ स्यत् स्यतां स्यन्, स्यस् स्यतं स्यत, स्यं स्याव स्याम, स्यत स्येतां स्यन्त, स्यथास् स्येथां

स्यध्वं, स्ये स्यावहि स्यामहि, स्येन संहितानि द्यादीनि क्रियातिपत्ति-संज्ञानि भवन्ति ॥

षडाद्याः सार्वधातुकम् ॥ १२ ॥ षण्णां विभक्तीनां आद्याश्चतस्रो विभक्तयः सार्वधातुकसंज्ञा भवन्ति ।

अथ परस्मैपदानि ॥ १३ ॥ सर्वविभक्तीनां आदौ नववचनानि परस्मैपदसंज्ञानि भवन्ति । उत्तरत्र नवग्रहणात्परग्रहणाच्चेह पूर्वाणीति नवेति अवगन्तव्यं । ति तस् अन्ति । सि थस् थ । मि वस् मस् । एवं सर्वविभक्तिषु ।

नव पराण्यात्मने ॥ १४ ॥ सर्वविभक्तीनां पराणि नववचनानि आत्मनेपदसंज्ञानि भवन्ति । ते आते अन्ते । से आथे ध्वे । ए वहे महे । एवं सर्वविभक्तिषु ।

त्रीणि त्रीणि प्रथममध्यमोत्तमाः ॥ १५ ॥ परस्मैपदानामात्मनेपदानां च त्रीणि त्रीणि वचनानि प्रथममध्यमोत्तमपुरुषसंज्ञानि भवन्ति । ति तस् अन्ति इति प्रथमपुरुषः । सि थस् थ इति मध्यमपुरुषः । मि वस् मस् इत्युत्तमपुरुषः । ते आते अन्ते इति प्रथमपुरुषः । से आथे ध्वे इति मध्यमपुरुषः । ए वहे महे इत्युत्तमपुरुषः । एवं सर्वविभक्तिषु । एता विभक्तयो धातोर्योज्यन्ते । को धातुः ।

क्रियाभावो धातुः ॥ १६ ॥ यः शब्दः क्रियां भावयति संपादयति स धातुसंज्ञो भवति । इति भ्वादीनां धातुसंज्ञायां । भू सत्तायां । भू इति स्थिते ।

प्रत्ययः परः ॥ १७ ॥ प्रतीयते अनेनार्थः स प्रत्ययः । विकसितार्थ इत्यर्थः । प्रकृतेः परः प्रत्ययो भवति । इति सर्वत्यादिप्रसङ्गः ।

काले ॥ १८ ॥ वर्त्तमानातीतभविष्यल्लक्षणः कालः । काल इत्यधिकृत्यात्मनेपदात् वेदितव्यः ।

सम्प्रतिवर्त्तमाना ॥ १९ ॥ प्रारब्धपरिसमाप्तक्रियालक्षणः सम्प्रतीत्युच्यते । सम्प्रतिकाले वर्त्तमाना विभक्तिर्भवति । तत्रापि युगपदष्टादशवचनप्राप्तौ ।

शेषात्कर्त्तरि परस्मैपदम् ॥ २० ॥ शेषाद्धातोः कर्त्तरि परस्मैपदं भवति । तत्रापि ।

नाम्नि प्रयुज्यमानेऽपि प्रथमः ॥ २१ ॥ नाम्नि प्रयुज्यमानेऽप्यप्रयुज्यमानेऽपि प्रथमपुरुषो भवति । तत्राप्येकत्वविवक्षायां प्रथमैकवचनं ति ।

अन् विकरणः कर्त्तरि ॥ २२ ॥ धातोर्विकरणसंज्ञकोऽन् भवति कर्त्तरि विहिते सार्वधातुके परे ।

अनि च विकरणे ॥ २३ ॥ नाम्यन्तस्य लघुनाम्युपधायाश्च गुणो भवत्यन्विकरणे परे । को गुणः ।

अर् पूर्वे द्वे च सन्ध्यक्षरे गुणः ॥२४॥ यूणां (ऋवर्णइवर्ण उवर्णानां) अर्पूर्वे द्वे च सन्ध्यक्षरे गुणो भवति । इत्युवर्णस्य ओकारो गुणः । सन्धिः । स भवति । तथैव द्वित्वविवक्षायां प्रथमपुरुषद्विवचनं तस् । भू तस् इति स्थिते ।

रसकारयोर्विसृष्टः ॥ २५ ॥ पदान्ते रेफसकारयोर्विसृष्टो भवति । तौ भवतः ॥ तथैव बहुत्वविवक्षायां प्रथमपुरुषबहुवचनं अन्ति भू अन्ति इति स्थिते ।

असन्ध्यक्षरयोरस्य तौ तल्लोपश्च ॥ २६ ॥ इह धातुप्रस्तावे अकारसन्ध्यक्षरयोः परतोऽकारस्य अकारसन्ध्यक्षरौ भवतस्तत्परयोर्लोपो भवति । ते भवन्ति ।

युष्मदि मध्यमः ॥ २७ ॥ युष्मदि प्रयुज्यमानेऽप्रयुज्यमानेऽपि मध्यमः पुरुषो भवति। त्वं भवसि। युवां भवथः। यूयं भवथ।

अस्मद्युत्तमः ॥ २८ ॥ अस्मदि प्रयुज्यमानेऽप्रयुज्यमानेऽपि उत्तमः पुरुषो भवति ।

अस्य वमोर्दीर्घः ॥ २९ ॥ अस्य दीर्घो भवति वमोः परतः। अहं भवामि। आवां भवावः। वयं भवामः। अप्रयुज्यमानेऽपि ।

भवति, भवतः, भवन्ति । भवसि, भवथः, भवथ । भवामि, भवावः, भवामः । भावकर्मविवक्षायां ।

आत्मनेपदानि भावकर्मणोः ॥ ३० ॥ धातोरात्मनेपदानि भवन्ति भावकर्मणोरर्थयोः । अकर्मकाद्धातोर्भावे सकर्मकात्कर्मणि च ।

श्लोकः ।

लज्जासत्तास्थितिजागरणं वृद्धिक्षयभयजीवितमरणम् ।
शयनक्रीडारुचिदीप्त्यर्था धातव एते कर्मविहीनाः ॥ १ ॥

क्रियापदं कर्तृपदेन युक्तं
व्यपेक्षते यत्र किमित्यपेक्षां ।
सकर्मकन्तं सुधियो वदन्ति
शेषस्ततो धातुरकर्मकः स्यात् ॥ २ ॥

को भावः ।

श्लोकः ।

सन्मात्रं भावलिङ्गं स्यादसंपृक्तं तु कारकैः ।
धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते ॥ १ ॥

तत्र प्रथमैकवचनमेव । किं कर्म । क्रियाविषयं कर्म । तत्र द्विवचनबहुवचनमेव । मध्यमोत्तमपुरुषावपि ॥

सार्वधातुके यण् ॥ ३१ ॥ धातोर्यण् भवति भावकर्मणोर्विहिते सार्वधातुके परे ।

नाम्यन्तयोर्धातुविकरणयोर्गुणः ॥ ३२ ॥ नाम्यन्तयोर्धातुविकरणयोर्गुणो भवति । इति गुणे प्राप्ते ।

नणकारानुबन्धचेक्रीयतयोः ॥ ३३ ॥ नाम्यन्तानां ना-

---

१ स्वप्न इतिपाठांतरं ।

म्युपधानां च गुणो न भवति णकारानुबन्धचेक्रियतयोः परतः । भूयते । कर्मणि ॥

प्रादय उपसर्गाः क्रियायोगे ॥ ३४ ॥ प्रादयः क्रियायोगे उपसर्गा भवन्ति । के ते प्रादयः ।

श्लोकः ।

प्रपराऽपसमन्ववनिर्दुरभिव्यधिसूदतिनिप्रतिपर्यपयः ॥
उपआङितिविंशतिरेष सखे उपसर्गगणः कथितः कविना ॥१॥

अकर्मका अपि धातवः सोपसर्गाः सकर्मका भवन्ति । अनुभूयते ।

आते आथे इति च ॥ ३५ ॥ अकारात्परयोराते आथे इत्येतयोरादिरिर्भवति । अनुभूयेते अनुभूयन्ते । अनुभूयसे अनुभूयेथे अनुभूयध्वे । अनुभूये अनुभूयावहे अनुभूयामहे । एवं सर्वधातूनां । एधङ् वृद्धौ ।

कर्त्तरि रुचादिङानुबन्धेभ्यः ॥ ३६ ॥ रुचादिभ्यो ङानुबन्धेभ्यश्च कर्त्तर्यात्मनेपदानि भवन्ति । एधते एधेते एधन्ते । एधसे एधेथे एधध्वे । एधे एधावहे एधामहे । भावे । एध्यते एध्येते एध्यन्ते इत्यादि । अकारः समाहारानुबन्धे । डुपचषुञ् पाके ।

इनञ्यजादेरुभयम् ॥ ३७ ॥ इन्नन्तात् ञानुबन्धाद्यजादेश्च कर्त्तर्युभयपदानि भवन्ति । पचति पचतः पचन्ति । पचसि पचथः पचथ । पचामि पचावः पचामः । पचते पचेते पचन्ते । पचसे पचेथे पचध्वे । पचे पचावहे पचामहे ॥ भावे ॥ पच्यते । अविवक्षितसकर्मकोऽकर्मको भवति ॥ कर्मणि । पच्यते पच्येते पच्यन्ते । पच्यसे । पच्येथे पच्यध्वे ॥ पच्ये पच्यावहे पच्यामहे ।

स्मेनातीते ॥ ३८ ॥ स्मेन संयोगेऽतीते काले वर्त्तमाना विभक्तिर्भवति । भवतिस्म ॥ एधतेस्म । पचतिस्म पचतेस्म इत्यादि ।

विध्यादिषु सप्तमीच ॥ ३९ ॥ विध्यादिषु वर्त्तमानाद्धातोः सप्तमी पञ्चमी च भवति । के विध्यादयः । विधिनिमन्त्रणामन्त्रणा-

ध्येषणसम्प्रश्नप्रार्थनादयः । को विधिः । विधिः कर्त्तव्योपदेशः । अथवा अज्ञातज्ञापको विधिः । देवान् यजेत । यजतु । यजतां । होमं जुहुयात् । जुहोतु । यत्र क्रियमाणे प्रत्यवायोऽस्ति तन्निमन्त्रणं । इह श्राद्धे न भुञ्जीत न भुङ्क्तां भवान् । यत्र क्रियमाणे प्रत्यवायो नास्ति तदामन्त्रणं । इहासीन । आस्तां भवान् । सत्कारपूर्वको व्यापारोऽध्येषणं । यूयं माणवकमध्यापयेध्वम् । कर्त्तव्यालोचना सम्प्रश्नः । अहो किं व्याकरणमधियीय उत वेदमधियीय । अहो किं नाटकमध्ययै आहोस्विदलङ्कारमध्ययै । याच्ञा प्रार्थना । भिक्षां मे दध्याः । क्षेत्रं मे दधीथाः । कन्यां मे देहि । मम सुवर्णं दत्स्व इ० । आदिशब्दात्प्रेषणविज्ञापनाज्ञापनादयः । क्षीणं प्रतिकर्मप्रतिपादनं प्रेषणं । गृहीतवेतनस्त्वं । कर्माणि कुर्याः । कुर्वीथाः । कुरु । कुरुष्व । अधिकं प्रति स्वकार्यसूचनं विज्ञापनं । अहो देव इदं कार्यमवधारयेः । अवधारय । सर्वेषां स्वस्वकार्यनियमप्रतिपादनमाज्ञापनं । विप्रा एवं प्रवर्तेरन् प्रवर्तन्ताम् । यतय एवं चरेयुः ।

याशब्दस्य च सप्तम्याः ॥ ४० ॥ याशब्दो या चासौ शब्दश्च याशब्दस्तस्य याशब्दस्य च सप्तम्या अकारात्परस्य सप्तमी याशब्दस्य इर्भवति । भवेत् भवेतां ।

याम्युसोरियमियुसौ ॥ ४१ ॥ अकारात्परयोर्याम्युसोरियमियुसौ भवतः । भवेयुः । भवेः भवेतं भवेत । भवेयं भवेव भवेम ॥ भावे ॥ भूयेत । कर्मणि । अनुभूयेत अनुभूयेयातां अनुभूयेरन् । एधेत एधेयातां एधेरन् । एधेथाः एधेयाथां एधेध्वं । एधेय एधेवहि एधेमहि ॥ भावे ॥ एध्येत ॥ पचेत् पचेतां पचेयुः । पचेः पचेतं पचेत । पचेयं पचेव पचेम । पचेत पचेयातां पचेरन् ॥ भावे । पच्येत । कर्मणि । पच्येत । पच्येयातां पच्येरन् ।

पञ्चम्यनुमतौ ॥ ४२ ॥ अनुज्ञानमनुमतिः । अनुमितौ पञ्चमी भवति ।

समर्थनाशिषोश्च ॥ ४३ ॥ क्रियासु प्रोत्साहः समर्थना । इष्टस्यार्थस्य आशंसनं आशीः । समर्थनाशिषोरर्थयोश्च पञ्चमी भवति । भवतु । आशिषि । आशिषि तुह्योस्तातण् वा वक्तव्यः । भवतात् भवतां भवन्तु ।

हेरकारादहन्तेः ॥ ४४ ॥ अकारात्परस्य हेर्लोपो भवति अहन्तेः । भव भवतात् भवताद् भवतं भवत । भवानि भवाव भवाम॥ भावे ॥ भूयतां । कर्मणि । अनुभूयतां ।

आदातामाथामादेरिः ॥ ४५ ॥ अकारात्परयोः आतां आथां इत्येतयोरादिरिर्भवति । अनुभूयेतां । अनुभूयन्तां । अनुभूयस्व अनुभूयेथां अनुभूयध्वं । अनुभूयै अनुभूयावहै अनुभूयामहै । एधतां एधेतां एधन्तां । एधस्व एधेथां एधध्वं । एधै एधावहै एधामहै । भावे । एध्यतां । कर्मणि । एध्यतां एध्येतां एध्यन्तां । पचतु पचतात् पचताद् पचतां पचन्तु । पचतां पचेतां पचन्तां । भावे । पच्यतां । कर्मणि । पच्यतां पच्येतां पच्यन्तां ॥

भूतकरणवत्यश्च ॥ ४६ ॥ भूतमतीतं करणं क्रिया यस्य तद्भूतकरणं साधनं तद्विद्यते यासां ता भूतकरणवत्यः । भूतकरणवत्यो ह्यस्तन्यद्यतनीक्रियातिपत्तयोऽतीते काले भवन्ति । ह्यो भवः कालो ह्यस्तनः तत्र ह्यस्तनी भवति ॥

अड्धात्वादिर्ह्यस्तन्यद्यतनीक्रियातिपत्तिषु ४७ धातोरादावडागमो भवति ह्यस्तन्यद्यतनीक्रियातिपत्तिषु परतः ।

*** पदान्ते धुटां प्रथमः ॥ २५ ॥** पदान्ते वर्तमानानां धुटां अन्तरतमः प्रथमो भवति । अभवत् अभवतां अभवन् । अभवः अभवतं अभवत । अभवं अभवाव अभवाम ॥ भावे । अभूयत ॥ कर्मणि । अन्वभूयत अन्वभूयेतां अन्वभूयन्त । अड् धात्वादिसूत्रबाधनार्थमुत्तरयोगः ।

स्वरादीनां वृद्धिरादेः ॥ ४८ ॥ स्वरादीनां धातूनां आदिस्वरस्य वृद्धिर्भवति ह्यस्तन्यादिषु परतः । ऐधत ऐधेतां ऐधन्त । ऐधथाः ऐधेथां ऐधध्वं । ऐधे ऐधावहि ऐधामहि । भावे । ऐध्यत । कर्मणि । ऐध्यत ऐध्येतां । ऐध्यन्त । अपचत् अपचतां अपचन् । अपचत अपचेतां अपचन्त । भावे अपच्यत । कर्मणि । अपच्यत अपच्येतां अपच्यन्त ।

मास्मयोगे ह्यस्तनी च ॥ ४९ ॥ मास्मयोगे ह्यस्तन्यद्यतनी च भवति ।

न मामास्मयोगे ॥ ५० ॥ मायोगे मास्मयोगे च धातोरादावडागमो न भवति । मास्मभवत् मास्मभवतां मास्मभवन् ॥ मास्मैधत मास्मैधेतां मास्मैधन्त ॥ मास्मपचत् मास्मपचतां मास्मपचन् ॥ मास्मपचत मास्मपचेतां मास्मपचन्त । भावे । मास्मभूयत । कर्मणि । मास्मानुभूयत मास्मानुभूयेतां मास्मानुभूयन्त । श्रु श्रवणे ।

श्रुवः शृ च ॥ ५१ ॥ श्रुवो धातोर्नुप्रत्ययो भवति सार्वधातुके परे शृ आदेशश्च । शृणोति शृणुतः शृण्वन्ति । अन्विकरणः कर्त्तरीति निर्देशात् द्वित्वबहुत्वयोश्च परस्मै सप्तम्यां च हि वचने च गुणो न भवति । उत्तरत्र प्रदर्श्यते । शृणुयात् शृणुयातां शृणुयुः । शृणोतु । नणकारानुबन्धचेक्रीयितयेति श्रुवस्तातण्प्रत्ययो गुणनिषेधः । शृणुतात् शृण्वन्तु ।

नोश्च विकरणादसंयोगात् ॥ ५२ ॥ असंयोगात् पूर्वान्नुविकरणात् परस्य हेर्लोपो भवति ॥ शृणु शृणुतात् शृणुतं शृणुत । शृणवानि शृणवाव शृणवाम । अशृणोत् अशृणुतां अशृण्वन् । कर्मणि ।

नाम्यन्तानां यणायियिन्नाशीश्विचेक्रीयितेषु येदीर्घः ॥ ५३ ॥ नाम्यन्तानां धातूनां दीर्घो भवति यणादिषु ये च्वौ च परे । श्रूयेत । श्रूयतां । अश्रूयत । इत्यादि । षिधु गत्यां । षिधू शास्त्रे माङ्गल्ये च ।

धात्वादेः षः सः ॥ ५४ ॥ धात्वादेः षस्य सो भवति । सेधति । स्थासेनयसेधतिसिचसञ्जिष्वञ्जां । अडभ्यासान्तरश्चेति सस्य षत्वं । प्रतिषेधति । तत्र सेधतेर्गताविति वचनाद्गतौ न षत्वं । परिसेधति । सेधतः । सेधन्ति । सेधेत् सेधतु । असेधत् । णीङ् प्रापणे ।

णो नः ॥ ५५ ॥ धात्वादेर्णस्य नो भवति । नयति नयतः नयन्ति । नयते नयेते नयन्ते । नयेत् । नयेत । नयतु । नयतां । अनयत् अनयत । भावे । नीयते कर्मण्येवं । स्रंसु भ्रंसु अवस्रंसने । ध्वंसु गतौ च । मनोरनुस्वारो धुटि इति नकारस्यानुस्वारः । स्रंसते स्रंसेते स्रंसन्ते । भ्रंसते । ध्वंसते ॥

अनिदनुबन्धानामगुणेऽनुषङ्गलोपः ॥ ५६ ॥ इदनुबन्धवर्जितानां धातूनां अनुषङ्गलोपो भवति अगुणे प्रत्यये परे । कर्मणि । स्रस्यते स्रस्येते स्रस्यन्ते । एवं भ्रस्यते । ध्वस्यते । अत एव वर्जनादिदनुबन्धानां धातूनां नुरागमोऽस्ति गुणागुणे प्रत्यये परे । ग्रथिवकि कौटिल्ये । शकि शङ्कायां । ग्रन्थते वङ्कते । शङ्कते । ग्रन्थ्यते ग्रन्थ्येते । शङ्क्यते शङ्क्येते शङ्क्यन्ते । वङ्क्यते । वङ्क्येते । वङ्क्यन्ते । टुनदि समृद्धौ । नन्दति नन्दतः नन्दन्ति । नन्द्यते । वदि अभिवादनस्तुत्योः । वन्दते वन्देते वन्दन्ते । कर्मणि । वन्द्यते । दंश दशने । षञ्ज सङ्गे । ष्वञ्ज परिष्वङ्गे । रञ्ज रागे ।

दंशिषञ्जि ष्वञ्जिरञ्जीनामनि ॥ ५७ ॥ एतेषामनि विकरणे परेऽनुषङ्गलोपो भवति । दशति । दशेत् । दशतु । अदशत् । भावे । दश्यते । सजति । सजेत् । सजतु । असजत् । सज्यते । परिष्वजते । रजति रजेदित्यादि ।

रञ्जेरिनिमृगरमणार्थे वा ॥ ५८ ॥ मृगरमणार्थे रञ्जेरनुषङ्गलोपो वा भवति इनि परे । रजति कश्चित्तमन्यः प्रयुङ्क्ते । धातोश्च हेतौ इति इन् भवति । रजयति । पक्षे । रञ्जयति । ष्ठिवु क्षिवु निरसने । क्लमु ग्लानौ । चमु छमु जमु जिमु अदने ।

ष्ठिवुक्लमाचामामनि ॥५९॥ ष्ठिवु क्लम आचम् इत्येतेषामुपधाया दीर्घो भवति परस्मैपदेऽनिपरे। क्रियायोगे प्रादय उपसर्गा भवन्ति। निष्ठीवति निष्ठीवतः निष्ठीवन्ति। निष्ठीव्यते। क्लामति। भावे। क्लम्यते। आचामति। आचम्यते। आङिति किं। चमति विचमति। क्रमु पादविक्षेपे।

क्रमः परस्मै ॥ ६० ॥ क्रमः दीर्घो भवति परस्मैपदे अनि परे। क्रामति। परस्मै इति किं।

प्रोपाभ्यामारम्भे ॥ ६१ ॥ लक्षणसूत्रे लक्षणं व्यभिचरन्त्याचार्याः। प्रोपाभ्यां परः क्रम् आरम्भेऽर्थे आत्मनेपदी भवति। प्रक्रमते। उपक्रमते। प्रक्रम्यते उपक्रम्यते। षुस्रुद्रुप्रुक्रुच्छगम्लसृप्गतौ। इषु इच्छायां। यमु उपरमे।

गमिष्यमां छः ॥६२॥ गम इषु यम् एषामन्त्यस्य छो भवत्यनि परे। गच्छति। इच्छति। यच्छति। गम्यते इष्यते यम्यते। पा पाने।

पः पिबः ॥ ६३ ॥ पाधातोः पिबादेशो भवत्यनि परे। पिबति। दामागायति पिबति स्थास्यति जहातीनामीकारो व्यञ्जनादौ चेत्याकारस्य ईकारः। पीयते। घ्रा गन्धोपादाने।

घ्रो जिघ्रः ॥६४॥ घ्राधातोर्जिघ्रादेशो भवत्यनि परे। जिघ्रति। घ्रायते। ध्माशब्दाग्निसंयोगयोः।

ध्मो धमः ॥ ६५ ॥ ध्माधातोर्धमादेशो भवत्यनि परे। धमति। ध्मायते। स्था गतिनिवृत्तौ।

स्थस्तिष्ठः ॥ ६६ ॥ स्थाधातोस्तिष्ठादेशो भवत्यनि परे। तिष्ठति। स्थीयते। म्ना अभ्यासे।

म्नो मनः ॥ ६७ ॥ म्नाधातोर्मनादेशो भवत्यनि परे। मनति। म्नायते। दाण् दाने।

दाणो यच्छः ॥ ६८ ॥ दाण्धातोर्यच्छादेशो भवत्यनि परे। प्रयच्छति प्रदीयते। दृशिर् प्रेक्षणे।

दृशेः पश्यः ॥ ६९ ॥ दृशेर्धातोः पश्यादेशो भवत्यनि परे । पश्यति । दृश्यते । ऋ प्रापणे । ऋ सृ गतौ ।

अर्तेः ऋच्छः ॥ ७० ॥ अर्त्तेः ऋच्छादेशो भवत्यनि परे । ऋच्छति ।

गुणोर्तिसंयोगाद्योः ॥७१॥ अर्त्तेः संयोगादेश्च धतोर्गुणो भवति । यकारादौ प्रत्यये परे । अर्य्यते ।

सर्तेर्धावः ॥ ७२ ॥ सर्तेर्धावादेशो भवत्यनि परे । धावति । यणाशिषोर्य्ये इति इकारागमः । स्रियते । ननु धावुगतावप्यस्ति । जवाभिधाने यथा स्यात् । तेन प्रियामनुसरति । शद्लृ शातने ।

शदेः शीयः ॥ ७३ ॥ शदेः शीयादेशो भवत्यनि परे ।

शदेरनि ॥ ७४ ॥ शदेरनि परे आत्मनेपदं भवति । शदि धातुः रुचादिर्भवत्यनि परे । शीयते शीयेते शीयन्ते । कर्मणि । शद्यते । पक्षे कश्चित्तमन्यः प्रयुङ्क्ते । शादयति । षद्लृ विशरणगत्यवसादनेषु ।

सदेः सीदः ॥ ७५ ॥ सदेः सीदादेशो भवत्यनि परे । सीदति सीदतः सीदन्ति । इति भ्वादयः ॥

अद् प्सा भक्षणे । पूर्ववत् वर्तमानादीनां ।

अदादेर्लुग्विकरणस्य ॥ ७६ ॥ अदादेर्गणाद्विकरणस्य लुग्भवति ।

अघोषेष्वशिटां प्रथमः ॥ ७७ ॥ अघोषेषु प्रत्ययेषु परे अशिटां धुटां प्रथमो भवति । अत्ति अत्तः अदन्ति । अत्सि अत्थः अत्थ । अद्मि अद्वः अद्मः । शीङ् स्वप्ने ।

शीङः सार्वधातुके ॥ ७८ ॥ शीङो गुणो भवति सार्वधातुके परे । शेते शयाते ।

आत्मने चानकारात् ॥ ७९ ॥ अनकाराच्चात्मनेपदे अन्तेर्नकारस्य लोपो भवति ।

शेतेरिरन्तेरादिः ॥ ८० ॥ शेतेः परस्य अन्तेरादिरिर्भवति । शेरते । शेषे । शयाथे शेध्वे । शये शेवहे शेमहे । ब्रूञ् व्यक्तायां वाचि ।

ब्रुव ईड्वचनादिः ॥ ८१ ॥ ब्रुव ईड् भवति वचनादिर्भूत्वा व्यञ्जनादौ गुणिनि सार्वधातुके परे । नाम्यन्तयोरिति गुणः । ब्रवीति ।

द्वित्वबहुत्वयोश्च परस्मै ॥ ८२ ॥ सर्वेषां धातूनां विकरणानां च सार्वधातुके परस्मैपदे पञ्चम्युत्तमवर्जिते द्वित्वबहुत्वयोश्च गुणो न भवति । ब्रूतः ।

स्वरादाविवर्णोवर्णान्तस्य धातोरियुवौ ॥ ८३ ॥ इवर्ण उवर्णान्तस्य धातोरियुवौ भवतः स्वरादावगुणे । ब्रुवन्ति । ब्रवीषि । ब्रूथः ब्रूथ । ब्रवीमि ब्रूवः ब्रूमः ।

ब्रुवस्त्यादीनामडादयः पञ्च ॥ ८४ ॥ ब्रूधातोः परेषां त्यादिपञ्चकानामडादयः पञ्च भवन्ति अट् अतुस् उस् थल् अथुस् इत्येते वक्तव्याः ।

तत्सन्निधौ ब्रुव आह ॥ ८५ ॥ तेषामडादीनां सन्निधौ ब्रूधातोराहादेशश्च भवति । आह आहतुः आहुः ।

थल्याहो हस्य धकारः ॥ ८६ ॥ थलि परे आहेत्येतस्य हकारस्य धकारो भवति । आत्थ आहतुः ।

सर्वेषामात्मनेसार्वधातुकेऽनुत्तमे पञ्चम्याः ॥८७॥ सर्वेषां धातूनां विकरणानां च सार्वधातुके आत्मनेपदे परे पञ्चम्युत्तमवर्जिते गुणो न भवति । ब्रूते ब्रुवाते ब्रुवते । ब्रूषे ब्रुवाथे ब्रूध्वे । ब्रुवे ब्रूवहे ब्रूमहे । अद्यात् अद्यातां अद्युः । अद्याः अद्यातं अद्यात । अद्यां अद्याव अद्याम । शयीत शयीयातां शयीरन् । शयीथाः शयीयाथां शयीध्वं । शयीय शयीवहि शयीमहि ।

सप्तम्यां च ॥ ८८ ॥ सर्वेषां धातुविकरणानां गुणो न भवति सप्तम्यां च परस्मैपदे परे । ब्रूयात् ब्रूयातां ब्रूयुः । ब्रूयाः ब्रूयातं ब्रूयात ।

ब्रूयां ब्रूयाव ब्रूयाम । ब्रुवीत ब्रुवीयातां ब्रुवीरन् । ब्रुवीथाः ब्रुवीयाथां ब्रुवीध्वं । ब्रुवीय ब्रुवीवहि ब्रुवीमहि । अत्तु अत्तात् अत्तां अदन्तु ।

हुधुड्भ्यां हेर्धिः ॥ ८९ ॥ हुधुड्भ्यां परस्य हेर्धिर्भवति । अद्धि अत्तात् अत्तं अत्त । अदानि अदाव अदाम । शेतां शयातां शेरतां । शेष्व शयाथां शेध्वं । शयै शयावहै शयामहै । ब्रवीतु ब्रूतात् ब्रूतां ब्रुवन्तु ।

हौ च ॥ ९० ॥ सर्वेषां धातूनां गुणो न भवति हौ च परे । ब्रूहि ब्रूतात् ब्रूतं ब्रूत । ब्रवाणि ब्रवाव ब्रवाम । ब्रूतां ब्रुवातां ब्रुवतां । ब्रूष्व ब्रुवाथां ब्रूध्वं । ब्रवै ब्रवावहै ब्रवामहै ।

अदोऽट् ॥ ९१ ॥ अदः परयोर्दिस्योरादेरड् भवति ।

अवर्णस्याकारः ॥ ९२ ॥ धातोरादेरवर्णस्याकारो भवति ह्यस्तन्यादिपरतः । आदत् आत्तां आदन् । आदः आत्तं आत्त । आदं आद्व आद्म । अशेत अशेयातां अशेरत । अशेथाः अशेयाथां अशेध्वं । अशयि अशेवहि अशेमहि । अब्रवीत् अब्रूतां अब्रुवन् । अब्रवीः अब्रूतं अब्रूत । अब्रुवं अब्रूव अब्रूम । अब्रूत अब्रुवातां अब्रुवत । अब्रूथाः अब्रुवाथां अब्रूध्वं । अब्रुवि अब्रूवहि अब्रूमहि । भावकर्मणोः । अद्यते अद्येते अद्यन्ते ।

अयीर्ये ॥ ९३ ॥ शेतेः ईकारोऽय् भवति ये परे । शय्यते शय्येते शय्यन्ते । ञिष्वप्शये । "धात्वादेः षः सः" ।

ब्रुवो वचिः ॥९४॥ ब्रुवो वचिर्भवति अगुणे सार्वधातुके परे ।

स्वपिवचियजादीनां यण् परोक्षाशीःषु ॥ ९५ ॥ स्वपिवचियजादीनामन्तस्थायाः सम्प्रसारणं भवति यण् परोक्षाशीःषुपरतः । किं सम्प्रसारणं ।

संप्रसारणं य्वृतोन्तस्थानिमित्ताः ॥ ९६ ॥ अन्तस्था निमित्ता इउऋतः सम्प्रसारणसंज्ञा भवन्ति । सुप्यते सुप्येते सुप्यन्ते । यज देवपूजासंगतिकरणदानेषु । इज्यते इज्येते इज्यन्ते । असु भुवि । अस्ति ।

अस्तेरादेः ॥ ९७ ॥ अस्तेरादेर्लोपो भवति अगुणे सार्वधातुके परे । स्तः सन्ति ।

अस्तेः सौ ॥ ९८ ॥ अस्तेरन्त्यस्य लोपो भवति सौ परे । असि स्थः स्थ । अस्मि स्वः स्मः । स्यात् स्यातां स्युः । स्याः स्यातं स्यात । स्याम् स्याव स्याम । अस्तु स्तात् स्तां सन्तु । एकदेशविकृतमनन्यवत् ।

दास्त्योरेभ्यासलोपश्च ॥ ९९ ॥ दासंज्ञकस्य अस्तेरन्त्यस्य ए भवति अभ्यासलोपश्च हौ परे ।

अस्तेः ॥ १०० ॥ अस्तेः परस्य हेर्धिर्भवति ।

स्थानिवदादेशः ॥ १०१ ॥ यस्य स्थाने यो विधीयते स स्थानी इतर आदेशः । एधि स्तात् स्तं स्त । असानि असाव असाम ।

अस्तेर्दिस्योः ॥ १०२ ॥ अस्तेः परयोर्दिस्योरादिरीड्भवति ।

अस्तेः ॥ १०३ ॥ अस्तेरवर्णस्याकारो भवति ह्यस्तन्यादिषु परतः । आसीत् आस्तां आसन् । आसीः आस्तं आस्त । आसम् आस्व आस्म ।

अस्तेर्भूरसार्वधातुके ॥ १०४ ॥ अस्तेर्भूरादेशो भवति असार्वधातुके परे । भूयते । रुदिर् अश्रुविमोचने ॥

रुदादेः सार्वधातुके ॥ १०५ ॥ रुदादेः परस्य सार्वधातुकस्य व्यञ्जनादेरयकारादेरादाविडागमो भवति ।

नामिनश्चोपधाया लघोः ॥ १०६ ॥ सर्वेषां धातूनां उपधाभूतस्य पूर्वस्य लघोर्नामिनो गुणो भवति । रोदिति रुदितः रुदन्ति । रोदिषि रुदिथः रुदिथ । रोदिमि रुदिवः रुदिमः ।

श्लोकः ।

रोदितिः स्वपितिश्चैव श्वसितिः प्राणितिस्तथा ।
जक्षितिश्चेति विज्ञेयो रुदादिः पञ्चको गणः ॥ १ ॥

रुद्यात् रुद्यातां रुद्युः । रोदितु रुदितात् रुदितां रुदन्तु । हौ चेति गुणनिषेधः । रुदिहि रुदितात् रुदितं रुदित । रोदानि रोदाव रोदाम ।

रुदादिभ्यश्च ॥ १०७ ॥ रुदादिभ्यश्च परयोर्दिस्योरादिरीद्भवति । अरोदीत् ।

रुदादेश्च ॥ १०८ ॥ रुदादेश्च परयोर्दिस्योरादिरद्भवति । अरोदत् अरुदितां अरुदन् । अरोदीः अरोदः अरुदितं अरुदित । अरोदं अरुदिव अरुदिम । एवं पञ्चानाम् । ञिष्वप् शये । स्वपिति स्वपितः स्वपन्ति । स्वपिषि । स्वप्यात् स्वप्यातां स्वप्युः । स्वपितु स्वपितात् स्वपितां स्वपन्तु । अस्वपीत् । अस्वपत् अस्वपतां अस्वपन् । श्वस् प्राणने । श्वसिति । श्वस्यात् । श्वसितु । अश्वसीत् । अश्वसत् । अनपि च । प्राणिति । प्राण्यात् । प्राणितु । अप्राणीत् । अप्राणत् । जक्ष भक्ष हसनयोः ।

जक्षादिश्च ॥ १०९ ॥ जक्षादीनामभ्यस्तसंज्ञा भवति । जक्षिति जक्षतः ।

लोपोऽभ्यस्तादन्तिनः ॥ ११० ॥ अभ्यस्तात्परस्य अन्तेर्नकारस्य लोपो भवति । जक्षति । जक्ष्यात् जक्ष्यातां जक्ष्युः । जक्षितु जक्षितात् जक्षितां जक्षतु । अजक्षीत् । अजक्षत् अजक्षतां । अनउस्सिजभ्यस्तविदादिभ्योऽभुवः । इत्यनेन उस् भवति । अजक्षुः । भावकर्मणोः । रुद्यते । सुप्यते । इत्यादि । षूङ् प्राणिगर्भविमोचने । सूते सुवाते सुवते । सुवीत सुवीयातां सुवीरन् । सूतां सुवातां सुवतां । सूष्व सुवाथां । सूध्वम् ॥

सूतेः पञ्चम्याम् ॥ १११ ॥ सूतेः पञ्चम्युत्तमे च गुणो न भवति । सुवै सुवावहै सुवामहै । असूत असुवातां । सूयते । हन् हिंसागत्योः । हन्ति ।

धुटि हन्तेः सार्वधातुके ॥ ११२ ॥ हन्तेरन्तस्य लोपो भवति धुडादावगुणे सार्वधातुके परे । हतः ।

गमहनजनखनघसामुपधयाःस्वरादावनण्यगुणे ॥ ११३ ॥ गमादीनामुपधाया लोपो भवत्यनणूवर्जिते स्वरादावगुणे परे ।

लुप्तोपधस्य च ॥ ११४ ॥ लुप्तोपधस्य च हन्तेर्हस्य घिर्भवति । घ्नन्ति । हंसि हथः हथ । हन्मि हन्वः हन्मः । हन्यात् हन्यातां हन्युः । हन्तु हतात् हतां घ्नन्तु । पूर्वोक्तपरोक्तयोः परोक्तः विधिर्बलवान् इति न्यायात्॥

हन्तेर्जो हौ ॥११५॥ हन्तेर्जकारादेशो भवति हौ परे। जहि हतात् हतं हत । हनानि हनाव हनाम ।

व्यञ्जनाद्दिस्योः ॥ ११६ ॥ व्यञ्जनात्परयोर्दिस्योर्लोपो भवति । अहन् अहतां अघ्नन् । अहन् अहतं अहत । अहनं अहन्व अहन्म। चक्षङ् व्यक्तायां वाचि ।

स्कोः संयोगाद्योरन्ते च ॥ ११७ ॥ संयोगाद्योः सकारककारयोर्लोपो भवति धुट्यन्ते च ।

*** तवर्गस्य षटवर्गाट्टवर्गः ॥ ११८ ॥** तवर्गस्य षकारटवर्गाभ्यां परस्य टवर्गो भवत्यान्तरतम्यात्। आचष्टे आचक्षाते आचक्षते।

षढोः कः से ॥११९॥ षढोः को भवति सकारे परे । आचक्षे आचक्षाते आचक्षते ।

***धुटां तृतीयश्चतुर्थेषु ॥१२०॥** धुटां तृतीयो भवति चतुर्थेषु परतः ऋवर्णटवर्गरषा मूर्द्धन्या इति न्यायात्। इति षकारस्य डकारः । आचड्ढ्वे । आचक्षे आचक्ष्वहे आचक्ष्महे । आचक्षीत आचक्षीयातां आचक्षीरन्। आचष्टां आचक्षातां आचक्षतां । आचक्ष्व आचक्षाथां आचड्ढ्वं । आचक्षै आचक्षावहै आचक्षामहै । आचष्ट आचक्षातां आचक्षत । आचष्ठाः आचक्षाथां आचड्ढ्वं । आचक्षि आचक्ष्वहि आचक्ष्महि ।

चक्षङ् ख्याञ् ॥१२१॥ चक्षङ् इत्येतस्य ख्याञादेशो भवति असार्वधातुके परे । आख्यायते । ईश् ऐश्वर्ये ।

छशोश्च ॥ १२२ ॥ छशोश्च षो भवति धुट्यन्ते । ईष्टे ईशाते ईशते ।

ईशः से ॥ १२३ ॥ ईशः परस्य सादेः सार्वधातुकस्यादाविट् भवति धुटि परे । ईशिषे ईशाथे ईड्ढ्वे । ईशे ईश्वहे ईश्महे । ईशीत ईशीयातां ईशीरन् । ईष्टां ईशातां ईशतां । ईशिष्व ईशाथां ईड्ढ्वं । ऐशि ऐश्वहि ऐश्महि । ईश्यते । शासु अनुशिष्टौ । शास्ति ।

शासेरिदुपधाया अण्व्यञ्जनयोः ॥ १२४ ॥ शासेरुपधायाः इद्भवति अण् व्यञ्जनयोः परतः ।

शासिवसिघसीनां च ॥ १२५ ॥ निमित्तात्परः शासिवसिघसीनां सः षत्वमापद्यते । शिष्टः शासति । शास्सि । शिष्यात् शिष्यातां शिष्युः । शास्तु शिष्टात् शिष्टां शासतु ।

शा शास्तेश्च ॥ १२६ ॥ शास्तेर्हौ परे शादेशो भवति चकारात् हेर्धिर्भवति । शाधि । शिष्टात् । शिष्टं शिष्ट । शासानि शासाव शासाम ।

सस्य ह्यस्तन्यां दौ तः ॥ १२७ ॥ ह्यस्तन्यां दौ परे सस्य तो भवति । अशात् अशिष्टां अशासुः ।

सौ वा ॥ १२८ ॥ सस्य तो भवति वा ह्यस्तन्यां सौ परे । अशात् । अशाः अशिष्टं अशिष्ट । अशासं । अशिष्व । अशिष्म । शिष्यते । दीधीङ् दीप्तिदेवनयोः । वेवीङ् वेतनातुल्ये । आदीधीते । यइवर्णस्यासंयोगपूर्वस्यानेकाक्षरस्य । इति यः । आदीध्याते आदीध्यते ।

दीधीवेव्योरिवर्णयकारयोः ॥ १२९ ॥ दीधीवेव्योरन्तस्य लोपो भवति इवर्णयकारयोः परतः । आदीधीत आदीधीयातां आदीधीरन् । आदीधीतां आदीध्यातां आदीध्यतां । आदीधीष्व आदीध्याथां आदीधीध्वं ।

दीधीवेव्योश्च ॥ १३० ॥ अनयोः पञ्चम्युत्तमे च गुणो न भवति । आदीध्यै आदीध्यावहै आदीध्यामहै । आदीधीत आदीध्यातां आदीध्यत । आदीध्यते । वेवीते वेव्याते वेव्यते । वेवीत वेवीयातां वेवीरन् । वेवीतां वेव्यातां वेव्यतां । वेवीष्व वेव्याथां वेवीध्वं ।

वेव्यै वेव्यावहै वेव्यामहै । अवेवीत अवेव्यातां अवेव्यत । अवेवीथाः अवेव्याथां अवेवीध्वं । अवेव्यि अवेवीवहि अवेवीमहि । वेव्यते । ईड् स्तुतौ । ईट्टे ईडाते ईडते ।

ईड्जनोः ध्वे च ॥१३१॥ ईड्जनोः ध्वे च सार्वधातुके परे इड् भवति । ईडिषे ईडाथे ईडिध्वे । ईडे ईड्वहे ईड्महे । ईडीत ईडीयातां ईडीरन् । ईट्टां ईडातां ईडतां । ऐट्ट ऐडातां ऐडत । ईड्यते । इत्यादि । णु स्तुतौ ।

उतो वृद्धिर्व्यञ्जनादौ गुणिनि सार्वधातुके ॥१३२॥ धातोरुतो वृद्धिर्भवति व्यञ्जनादौ गुणिनि सार्वधातुके परे। वृद्धिग्रहणाधिक्यादभ्यस्तस्य वृद्धिर्न भवतीत्यर्थः ॥ नौति नुतः नुवन्ति । नौषि नुथः नुथ । नौमि नुवः नुमः । नुयात् नुयातां नुयुः । नौतु नुतात् नुतां नुवन्तु । अनौत् अनुतां अनुवन् । नूयते। एवं । ष्टुञ् स्तुतौ। स्तौति स्तवीति स्तुतः स्तुवन्ति । स्तुते स्तुवाते स्तुवते । स्तूयते । ऊर्णुञ् आच्छादने ।

ऊर्णोतेर्गुणः ॥ १३३ ॥ ऊर्णोतेर्गुणो भवति व्यञ्जनादौ गुणिनि सार्वधातुके परे । प्रोर्णोति । वृद्धिग्रहणाधिक्यात् अभ्यस्तस्य पृथक्करणाद्वा प्रोर्णौति प्रोर्णुतः प्रोर्णुवन्ति । प्रोर्णोषि प्रोर्णौषि प्रोर्णुथः प्रोर्णुथ । प्रोर्णोमि प्रोर्णौमि प्रोर्णुवः प्रोर्णुमः । प्रोर्णुते प्रोर्णुवाते प्रोर्णुवते । प्रोर्णुयात् प्रोर्णुयातां प्रोर्णुयुः । प्रोर्णुवीत । प्रोर्णोतु प्रोर्णौतु प्रोर्णुतां प्रोर्णुवन्तु । प्रोर्णुतां प्रोर्णुवातां प्रोर्णुवतां ।

ह्यस्तन्यां च ॥ १३४ ॥ ऊर्णुञ् इत्येतस्य ह्यस्तन्यां गुणो भवति व्यञ्जनादौ वचने परे । प्रौर्णोत् प्रौर्णुतां प्रौर्णुवन् । प्रौर्णुत प्रौर्णुवातां प्रौर्णुवत । प्रोर्णूयत इत्यादि । । विद् ज्ञाने । वेत्ति वित्तः विदन्ति । विद्यात् विद्यातां विद्युः । वेत्तु वित्तात् वित्तां विदन्तु ।

विद आम् कृञ् पञ्चम्यां वा ॥१३५॥ विदः परं आम् भवति ततः कृञ् प्रयुज्यते पञ्चम्यां । आमि विधेरेवेति गुणो न भवति।

विदांकरोतु विदांकुरुतात् विदांकुरुतां विदांकुर्वन्तु । विदांकुरु। अवेत् अवित्तां अविदन् ।

विदादेर्वा ॥ १३६ ॥ विद आदन्ताद्द्विषश्चान् उस् वा भवति ह्यस्तन्यां । अविदुः । विद्यते । एवं ह्यस्तन्यां। प्सा भक्षणे। आदन्तात् । अप्सात् अप्सातां अप्सन् ।

आकारस्योसि ॥ १३७ ॥ आकारस्य लोपो भवति उसि परे । अप्सुः । रा. ला आदाने । अलात् अलातां अलान् अलुः । अरात् अरातां अरान् अरुः । द्विष् अप्रीतौ । अद्वेट् अद्विष्टां अद्विषन् अद्विषुः ।भावकर्मणोः । रायते।लायते । प्सायते । द्विष्यते ।

समोगमृच्छप्रच्छिस्वृश्रुवेत्त्यर्त्तिदृशाम्॥१३८॥ समः परेषामात्मनेपदं भवति । संवित्ते संविदाते संविदते ।

वेत्तेर्वा ॥ १३९ ॥ वेत्तेः परस्यातेरिर्वा भवति । संविद्रते । संविदीत संविदीयातां संविदीरन् । संवित्तां संविदातां संविदतां संविद्रतां । समवित्त समविदातां समविद्रत समविदत ॥ इण् गतौ । एति इतः।

इणश्च ॥ १४० ॥ इणश्च यो भवति स्वरादावगुणे । यन्ति । एषि इथः इथ । एमि इवः इमः । इयात् इयातां इयुः । एतु इतात् इतां यन्तु । इहि इतात् इतं इत । अयानि अयाव अयाम । ऐत् ऐतां । परापि वृद्धिरिण्मात्राश्रितेन यत्वेन बाध्यते । सावकाशानवकाशयोरनवकाशो विधिर्बलवान् । इति न वृद्धिः । इणश्चेति यत्वं ।

एतेर्थे ह्यस्तन्याम् ॥१४१॥ एतेर्थे परे अटोऽवर्णस्य दीर्घो भवति ह्यस्तन्यां । आयन् । ऐः ऐतं ऐत । आयं ऐव ऐम ।

दुह् प्रपूरणे ।

दादेर्घः ॥ १४२ ॥ दादेर्हस्य घो भवति धुट्यन्ते च ।

घढधभेभ्यस्तथोर्धोऽधः ॥१४३॥ ऐभ्यः धाञ्वर्जितेभ्यः परयोस्तथोर्धो भवति । दोग्धि दुग्धः दुहन्ति ।

तृतीयादेर्घढधभान्तस्य धातोरादिचतुर्थत्वं स्ध्वोः

॥ १४४ ॥ घढधभान्तस्य धातोरादेस्तृतीयस्य चतुर्थत्वं भवति स्ध्वोः परतः । धोक्षि दुग्धः दुग्ध । दोह्मि दुह्वः दुह्मः । दुग्धे दुहाते दुहते । दुह्यात् दुह्यातां दुह्युः । दुहीत दुहीयातां दुहीरन् । दोग्धु दुग्धात् दुग्धां दुहन्तु । हुधुड्भ्यां हेर्धिः । दुग्धि दुग्धात् दुग्धं दुग्ध । दोहानि दोहाव दोहाम । दुग्धां दुहातां दुहतां ।

लोपे च दिस्योः ॥१४५॥ घढधभान्तस्य धातोरादेस्तृतीयस्य चतुर्थत्वं भवति दिस्योर्लोपेऽपि । अधोक् अदुग्धां अदुग्ध । अदोहं अदुह्व अदुह्म । अदुग्ध अदुहातां अदुहत । लिह् आस्वादने ॥

होढः ॥ १४६ ॥ धातोर्हस्य ढो भवति धुट्यन्ते च ।

ढे ढलोपो दीर्घश्चोपधायाः ॥ १४७ ॥ ढे परे ढलोपो भवति उपधाया दीर्घश्च । लेढि लीढः लिहन्ति । लेक्षि लीढः लीढ । लेह्मि लिह्वः लिह्मः । लीढे लिहाते लिहते । लिक्षे लिहाथे लीढ्वे । लिहे लिह्वहे लिह्महे । लिह्यात् । लिहीत लेढु लीढात् लीढां लिहन्तु । लेढि लीढात् लीढं लीढ । लेहानि लेहाव लेहाम ॥ लीढां लिहातां लिहतां । लिक्ष्व लिहातां लीढ्वं । लेहै लेहावहै लेहामहे ॥ अलेट् अलीढां अलिहन्–अलीढ । लिह्यते ॥ इत्यदादिः समाप्तः ।

हुदानादनयोः ।

जुहोत्यादेश्च ॥१४८॥ जुहोत्यादेश्च परविकरणस्य लुग्भवति ॥

द्विर्वचनमनभ्यासस्यैकस्वरस्याद्यस्य ॥ १४९ ॥ धातोरवयवस्यानभ्यासस्य एकस्वरस्याद्यवर्णस्य द्विर्वचनं भवतीति वर्त्तते ।

जुहोत्यादीनां सार्वधातुके ॥१५०॥ जहोत्यादीनां द्विर्वचनं भवति सार्वधातुके परे ।

पूर्वोऽभ्यासः ॥ १५१ ॥ द्विरुक्तस्य धातोः पूर्वोऽवयवोऽभ्याससंज्ञो भवति ।

हो जः ॥ १५२ ॥ अभ्यासहकारस्य जकारो भवति । जुहोति जुहुतः ।

द्वयमभ्यस्तम् ॥ १५३ ॥ धातोरभ्यास इतरश्चेति द्वयमभ्यस्तसंज्ञं भवति ।

लोपोऽभ्यस्तादन्तिनः ॥१५४॥ अभ्यस्तात्परस्यान्तेनेकारस्य लोपो भवति ।

जुहोतेः सार्वधातुके ॥१५५॥ जुहोतेः उकारस्य वकारो भवति स्वरादावगुणे सार्वधातुके परे । जुह्वति । जुहोषि जुहुथः जुहुथ । जुहोमि जुहुवः जुहुमः ॥ इत्यादि । ओहाङ् गतौ ।

भृञ्हाङ्माङामित्॥१५६॥ भृञ् हाङ् माङ् इत्येतेषामभ्यासस्य इद्भवति सार्वधातुके परे ।

उभयेषामीकारो व्यञ्जनादावदः ॥ १५७ ॥ उभयेषामभ्यस्तक्र्यादिविकरणानां दावर्जितानामाकारस्य ईकारो भवति व्यञ्जनादावगुणे सार्वधातुके परे । जिहीते ।

अभ्यस्तानामाकारस्य ॥ १५८ ॥ अभ्यस्तानामाकारस्य लोपो भवत्यगुणे सार्वधातुके परे । जिहाते जिहते । जिहीषे जिहाथे जिहीध्वे । जिहे जिहीवहे जिहीमहे ॥ जिहीत जिहीयातां जिहीरन् । जिहीतां जिहातां जिहतां । जिहीष्व जिहाथां जिहीध्वं । जिहै जिहावहै जिहामहै । अजिहीत अजिहातां अजिहत ॥ एवं माङ् माने शब्दे च । मिमीते मिमाते मिमते। मिमीषे मिमाथे मिमीध्वे । मिमे मिमीवहे मिमीमहे । डुधाञ् डुभृञ् धारणपोषणयोः ।

द्वितीयचतुर्थयोः प्रथमतृतीयौ ॥१५९॥ अभ्यासस्य द्वितीयचतुर्थयोः प्रथमतृतीयौ भवतः । बिभर्त्ति बिभृतः बिभ्रति । बिभर्षि बिभृथः बिभृथ ॥ बिभर्मि बिभृवः बिभृमः ॥ बिभृते बिभ्राते बिभ्रते । बिभृषे बिभ्राते बिभृध्वे । बिभ्रे बिभृवहे बिभृमहे ।

डुधाञ्ह्रस्वः ॥१६०॥ अभ्यासस्य ह्रस्वो भवति । दधाति ।

तथोश्च दधातेः ॥ १६१ ॥ दधातेर्धातोः आदेस्तृतीयचतुर्थत्वं भवति तथोः सेध्वोश्चागुणे परतः । धत्तः दधति । दधासि

धत्थः धत्थ। दधामि दध्वः दध्मः। धत्ते दधाते दधते। धत्से दधाथे धद्ध्वे। दधे दध्वहे दध्महे। भावकर्मणोश्च।

नाम्यन्तानां यणायियन्नाशीश्च्विचेक्रियतेषुदीर्घः॥१६२॥ नाम्यन्तानां धातूनां दीर्घो भवति यणादीनां ये च्वौ च परे। हूयते।

अदाह्वाधौ दा॥१६३॥ डुदाञ् दाने। दाण् दाने। दो अवखण्डने। देङ् रक्षणे। एते चत्वारो दारूपाः। डुधाञ् धारणपोषणयोः। धेट् पा पाने इत्येतौ। धारूपौ। दाप् लवने। दैप् शोधने इत्येतौ वर्जयित्वा दाधा इत्येतौ दासंज्ञौ भवतः दाप् दैपौ वर्जयित्वा दाधाइत्येतौ दासंज्ञौ भवतः।

दामागायति पिबति स्थास्यति जहातीनामीकारो व्यञ्जनादौ॥१६४॥ दासंज्ञकमारूपगायति पिबति स्थास्यति जहातीनामन्तस्य ईकारो भवति व्यञ्जनादावगुणे सार्वधातुके परे। दीयते। धीयते। माङ् माने शब्दे च। मीयते मीयेते मीयन्ते। कै गै रै शब्दे। गीयते पीयते। ष्ठा गतिनिवृत्तौ। निमित्ताभावे नैमित्तिकस्याप्यभावः। स्थीयते। षो अन्तकर्मणि। अवसीयते। ओहाक् त्यागे। हीयते। जुहुयात् जुहुयातां जुहुयुः। जिहीत जिहीयाताम् जिहीरन्। धेट् पा पाने। दध्यात् दध्यातां दध्युः। दधीत दधीयातां दधीरन्। जुहोतु जुहुतात् जुहुतां जुह्वतु। जुहुधि जुहुतात् जुहुतं जुहुत। जुहवानि जुहवाव जुहवाम। जिहीतां जिहातां जिहतां। मिमीत मिमीयाताम् मिमीरन्। मिमीतां मिमातां मिमतां। मिमीष्व मिमाथां मिमीध्वं। मिमै मिमावहै मिमामहै। बिभर्तु बिभृतां बिभ्रतु। बिभृतां बिभ्रतां बिभ्रतां। दधातु धत्तात् धत्तां दधतु। अभ्यस्तानामकारस्य इति लोपे प्राप्ते। "लोपस्वरादेशयोः स्वरादेशो विधिर्बलवान्"। इति स्वरादेशो भवति।

दास्त्योरभ्यासलोपश्च॥१६५॥ दासंज्ञकस्यास्तेश्च हौ

परेन्तस्य एत्वं भवति अभ्यासलोपश्च । यथासंख्यं । धेहि धत्तात् धत्तं धत्त । दधानि दधाव दधाम । धत्तां दधातां दधतां । अजुहोत् अजुहुतां ।

अनउस्सिजभ्यस्तविदादिभ्यो भुवः ॥१६६॥ सिजभ्यस्तविदादिभ्यश्च परस्य अन उस् भवति अभुवः ।

अभ्यस्तानामुसि ॥ १६७ ॥ अभ्यस्तानां गुणो भवति उसि परे। अजुहवुः। अजुहोः अजुहुतं अजुहुत। अजुहवं अजुहुव अजुहुम । अजिहीत अजिहातां अजिहत । अबिभः अबिभृतां अबिभरुः। अबिभः अबिभृतं अबिभृत। अबिभरं अबिभृव अबिभृम । अबिभृत अबिभ्रातां अबिभ्रत । अमिमीत अमिमातां अमिमत। अमिमीथाः अमिमाथां अमिमीध्वं। अमिमि अमिमीवहि अमिमीमहि। अदधात् अधत्तां।

आकारस्योसि ॥ १६८ ॥ आकारस्य लोपो भवति उसि परे । अदधुः। अधत्त अदधातां अदधत । ञिभी भये । बिभेति बिभितः बिभीतः ।

भियो वा ॥ १६९ ॥ भियो वा इकारो भवति व्यञ्जनादावगुणे सार्वधातुके परे ।

यइवर्णस्य संयोगपूर्वस्यानेकाक्षरस्य ॥१७०॥ असंयोगपूर्वस्यानेकाक्षरस्य इवर्णस्य यो भवति स्वरादावगुणे परे। बिभ्यति इत्यादि । ह्री लज्जायां ।

अभ्यासस्यादिव्यञ्जनमवशेष्यम् ॥१७१॥ अभ्यासस्यादिव्यञ्जनमवशेष्यं भवति । अनादेर्लोप इत्यर्थः। जिह्रेति जिह्रीतः स्वरादाविवर्णोवर्णान्तस्य धातोरियुवाविति इयादेशः । जिह्रियति । ओहाक् त्यागे । जहाति जहीतः ।

जहातेर्वा ॥१७२॥ जहातेः सार्वधातुके व्यञ्जनादावगुणे परे आकार इकारादेशो भवति वा । जहितः जहति । जहासि । उभयेषा-

मीकारो व्यञ्जनादावदः । जहीथः जहिथः जहीथ जहिथ । जहामि जहीवः जहिवः जहीमः जहिमः ।

लोपः सप्तम्यां जहातेः ॥ १७३ ॥ जहातेरन्तस्य लोपो भवति सप्तम्यां व्यञ्जनादावगुणे सार्वधातुके परे । जह्यात् जह्यातां जह्युः । जहातु जहीतात् जहितात् जहीतां जहितां जहतु ।

आत्वं वाहौ ॥ १७४ ॥ जहातेरन्तस्य आत्वं ईत्वमित्वं च भवति वाहौ परे । जहाहि जहिहि जहीहि जहीतात् जहितात् जहीतं जहितं जहीत । जहानि जहाव जहाम । अजहात् अजहीतां अजहितां अजहुः । अजहाः अजहीतं अजहितं अजहीत अजहित । अजहां अजहिव अजहीव अजहिम अजहीम । इत्यादि । ऋसृ गतौ । पॄ पालनपूरणयोः ।

अर्तिपिपर्त्योश्च ॥ १७५ ॥ अनयोरभ्यासस्य इद्भवति सार्वधातुके परे ।

अभ्यासस्यासवर्णे ॥ १७६ ॥ अभ्यासस्य इवर्ण उवर्णयोरियुवौ भवतोऽसवर्णे परे । इयर्ति इयृतः इयृति । इयर्षि इयृथः इयृथ । इयर्मि इयृवः इयृमः । इयृयात् इयृयातां इयृयुः । इयर्तु इयृतात् इयृतां इयृतु । इयृहि इयृतात् इयृतं इयृत । इयराणि इयराव इयराम । ऐयः ऐयृतां ऐयरुः । ऐयः ऐयृतं ऐयृत । ऐयरं ऐयृव ऐयृम । "गुणोर्तिसंयोगाद्योरिति" गुणः । अर्यते ।

ऋवर्णस्याकारः ॥ १७७ ॥ अभ्यासस्य ऋवर्णस्याकारो भवति । ससर्ति ससृतः सस्रति । ससृयात् ससृयातां ससृयुः । ससर्तु ससृतात् ससृतां सस्रतु । अससः अससृतां अससरुः ।

यणाशिषोर्ये ॥ १७८ ॥ ऋदन्तादिकारागमो भवति यणाशिषोर्ये परे । स्रियते । पिपर्ति पिपृतः पिप्रति । पिपृयात् पिपृयातां पिपृयुः । पिपर्तु पिपृतात् पिपृतां पिप्रतु । अपिपः अपिपृतां अपिपरुः । णिजिर् शौचपोषणयोः । विजिर् पृथक्भावे । विषॢ व्याप्तौ विषॢ शब्दे ।

निजिविजिविषां गुणः सार्वधातुके ॥ १७९ ॥
निजादीनामभ्यासस्य गुणो भवति सार्वधातुके परे ।

चवर्गस्य किरसवर्णे ॥ १८० ॥ चवर्गस्य किर्भवति असवर्णे धुटि परे अन्ते च। नेनेक्ति नेनिक्तः नेनिजति । नेनेक्षि नेनिक्थः नेनिक्थ । नेनेज्मि नेनिज्वः नेनिज्मः । नेनिज्यात् नेनिज्यातां नेनिज्युः । नेनेक्तु नेनिक्तात् नेनिक्तां नेनिजतु । नेनेग्धि नेनिक्तात् नेनिक्तं नेनिक्त ।

अभ्यस्तस्य चोपधाया नामिनः स्वरे गुणिनि सार्वधातुके ॥ १८१ ॥ अभ्यस्तस्य चोपधाया नामिनो गुणो न भवति स्वरादौ गुणिनि सार्वधातुके परे । नेनिजानि नेनिजाव नेनिजाम । अनेनेक् अनेनिक्तां अनेनिजुः । अनेनेक् अनेनिक्तं अनेनिक्त । अनेनिजं अनेनिज्व अनेनिज्म । वेवेक्ति वेविक्तः । वेविजति । वेविज्यात् वेविज्यातां वेविज्युः। वेवेक्तु वेविक्तात् वेविक्तां वेविजतु । वेविग्धि । अवेवेक् अवेविक्तां अवेविजुः । वेवेष्टि वेविष्टः वेविषति । वेवेक्षि वेविष्ठः वेविष्ठ । वेवेष्मि वेविष्वः वेविष्मः । वेविष्यात् वेविष्यातां वेविष्युः । वेवेष्टु वेविष्टात् वेविष्टां वेविषतु । धुटां तृतीयश्चतुर्थेषु । इति तृतीयः। ऋवर्णउवर्णरषा मूर्धन्या इति न्यायात् । षकारस्य डकारः। वेविड्ढि वेविष्टात् वेविष्टं वेविष्ट । वेविषाणि वेविषाव वेविषाम । अवेवेट् अवेविष्टां अवेविषुः । अवेवेः अवेविष्टं अवेविष्ट । अवेविषं अवेविष्व अवेविष्म। भावकर्मणोः । निज्यते । विज्यते । विष्यते । इति जुहोत्यादिः ।

दिवुक्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु

दिवादेर्यन् ॥ १८२ ॥ दिवादेर्गणाद्विकरणसंज्ञको यन् भवति कर्तरि विहिते सार्वधातुके परे ।

नामिनोर्वोरकुर्छुरोर्व्यञ्जने ॥ ८३ ॥ अकुर्छुरोर्वोरुपधाभूतस्य नामिनो दीर्घो भवति व्यञ्जने परे । दीव्यति दीव्यतः दी-

व्यन्ति । दीव्येत् दीव्येतां दीव्येयुः । दीव्यतु दीव्यतात् दीव्यतां दीव्यन्तु । अदीव्यत् अदीव्यतां अदीव्यन् । षूङ् प्राणिप्रसवे । सूयते सूयेते सूयन्ते । सूयेत सूयेयातां सूयेरन् । सूयतां सूयेतां सूयन्तां । असूयत असूयेतां असूयन्त । असूयथाः असूयेथां असूयध्वं । असूये असूयावहि असूयामहि । नहञ् बन्धने । संनह्यति संनह्यतः संनह्यन्ति । संनह्यते संनह्येते संनह्यन्ते । संनह्येत् संनह्येतां संनह्येयुः । संनह्येः संनह्येतं संनह्येत । संनह्येयं संनह्येव संनह्येम । संनह्येत संनह्येयातां संनह्येरन् । संनह्यतु संनह्यतात् संनह्यतां संनह्यन्तु । संनह्य संनह्यतात् संनह्यतं संनह्यत । संनह्यानि संनह्याव संनह्याम । संनह्यतां संनह्येतां संनह्यन्तां । संनह्यस्व संनह्येथां संनह्यध्वं । संनह्यै संनह्यावहै संनह्यामहै । समनह्यत् समनह्यतां समनह्यन् । समनह्यत समनह्येतां समनह्यन्त । इत्यादि । भावकर्मणोश्च । दीव्यते । सूयते । संनह्यते । ञिमिदा स्नेहने ।

मिदेः ॥ १८४ ॥ मिदेरित्येतस्य नाम्युपधस्य धातोर्यन्स्वविकरणे परे गुणो भवति। प्रमेद्यति प्रमेद्यतः प्रमेद्यन्ति । प्रमेद्येत् । प्रमेद्यतु । प्रामेद्यत् । शो तनूकरणे । छो छेदने । षोऽन्तकर्मणि । दो अवखण्डने ।

यन्योकारस्य ॥ १८५ ॥ धातोरोकारस्य लोपो भवति यनि परे । श्यति श्यतः श्यन्ति । श्यसि श्यथः श्यथ । श्यामि श्यावः श्यामः । छ्यति छ्यतः छ्यन्ति । स्यति स्यतः स्यन्ति । द्यति द्यतः द्यन्ति । शम् दम् उपशमे । तमु कांक्षायां । श्रम् तपसि खेदे च । भ्रमु अनवस्थाने । क्षमूष् सहने । क्लमु ग्लानौ । मदी हर्षे।

शमादीनां दीर्घो यनि ॥१८६॥ शमादीनां दीर्घो भवति यनि परे । शाम्यति । दाम्यति । ताम्यति । श्राम्यति । भ्राम्यति। क्षाम्यति । क्लाम्यति । माद्यति । जनी प्रादुर्भावे ।

जाजनेर्विकरणे ॥ १८७ ॥ जनेः स्वविकरणे परे जा भवति । जायते । जायेत । जायतां । अजायत ।

यणि वा ॥ १८८ ॥ यणि परे जनेर्जादेशो वा भवति। जायते जन्यते । इति दिवादिः ।

षुञ् अभिषवे ।

नुः स्वादेः ॥१८९॥ स्वादेर्गणाद्विकरणसंज्ञको नुर्भवति कर्तरि विहिते सार्वधातुके परे । सुनोति सुनुतः ।

नोर्वकारो विकरणस्य ॥ १९० ॥ नोर्विकरणस्यासंयोगपूर्वस्योकारस्य वकारो भवति स्वरादावगुणे सार्वधातुके परे। सुन्वन्ति । सुनोषि सुनुथः सुनुथ । सुनोमि ।

उकारलोपो वमोर्वा ॥१९१॥ असंयोगपूर्वस्य विकरणस्योकारस्य लोपो वा भवति वमोः परतः । सुन्वः सुनुवः सुन्मः सुनुमः । सुनुते सुन्वाते सुन्वते । सुनुषे सुन्वाथे सुनुध्वे। सुन्वे सुन्वहे सुनुवहे सुन्महे सुनुमहे ।

*** नाम्यन्तानां यणायिन्नाशीश्चि चेक्रीयतेषु दीर्घः ॥ १९२ ॥** नाम्यन्तानां धातूनां दीर्घो भवति यण् आय् इन् आशीः चेक्रीयतेषु ये च्वौ च परे । सूयते सूयेते । अशूङ् व्याप्तौ अश्नुते ।

नोर्विकरणस्य ॥१९३॥ नुविकरणस्योकारस्य संयोगपूर्वस्य उवादेशो भवति स्वरादावगुणे सार्वधातुके परे। अश्नुवाते अश्नुवते । चिञ् चयने ॥ चिनोति चिनुतः चिन्वन्ति ॥ चिनुते चिन्वाते चिन्वते। सुनुयात् सुनुयातां सुनुयुः । अश्नुवीत अश्नुवीयातां अश्नुवीरन् । अश्नुवीथाः अश्नुवीयाथां अश्नुवीध्वं । अश्नुवीय अश्नुवीवहि अश्नुवीमहि । चिनुयात् । चिन्वीत । सुनोतु सुनुतात् सुनुतां सुन्वन्तु ।

नोश्च विकरणादसंयोगात् ॥१९४ ॥ असंयोगपूर्वान्नु-

विकरणाच्च परस्य हेर्लोपो भवति । सुनु सुनुतात् सुनुतं सुनुत । सुनवानि सुनवाव सुनवाम । अश्नुतां अश्नुवातां अश्नुवतां । अश्नुष्व अश्नुवाथां अश्नुध्वं । अश्नवै अश्नवावहै अश्नवामहै । चिनोतु चिनुतात् चिनुतां चिन्वन्तु । चिनुतां चिन्वातां चिन्वतां । चिनुष्व चिन्वाथां चिनुध्वं । चिनवै चिनवावहै चिनवामहै । असुनोत् असुनुतां असुन्वन् । आश्नुत आश्नुवातां आश्नुवत । अचिनोत् । अचिनुत । इत्यादि इति स्वादिः ।

॥ तुद् व्यथने ॥

तुदादेरनि ॥ १९५ ॥ तुदादेर्गुणो न भवति अनि परे । तुदति तुदतः तुदन्ति । मृङ् प्राणत्यागे ।

इरन्यगुणे ॥ १९६ ॥ ऋदन्तादिकारागमो भवति अगुणे अन्विकरणे परे । स्वरादाविवर्णोवर्णान्तस्य धातोरियुवौ । म्रियते म्रियेते म्रियन्ते । मुच्लृ मोक्षणे ।

मुचादेरागमो नकारः स्वरादनि विकरणे ॥१९७॥ मुचादेः स्वरान्नकारागमो भवत्यन् विकरणे परे । मुञ्चति मुञ्चतः मुञ्चन्ति । लुप्लृ्ञ् छेदने । विद्लृञ् लाभे । लिप् उपदेहे । षिचिर् क्षरणे । लुम्पति लुम्पते । विन्दति विन्दते । लिम्पति लिम्पते । सिञ्चति । सिञ्चते । इति मुचादिः । तुदेत् । म्रियेत । मुञ्चेत् । मुञ्चेत । तुदतु । म्रियतां । मुञ्चन्तु । मुञ्चतां । अतुदत् । अम्रियत । अमुञ्चत् । अमुञ्चत अमुञ्चेतां अमुञ्चन्त । अमुञ्चथाः अमुञ्चेथां अमुञ्चध्वं । अमुञ्चे अमुञ्चावहि अमुञ्चामहि । भावकर्मणोः । तुद्यते ।

यणाशिषोर्ये ॥ १९८ ॥ ऋदन्तादिकारागमो भवति यणाशिषोर्ये परे । म्रियते । मुच्यते । लुप्यते । विद्यते । लिप्यते । सिच्यते इत्यादि कॄ विक्षेपे । गॄ निगरणे ।

ऋदन्तस्येरगुणे ॥ १९९ ॥ ऋदन्तस्य इर् भवत्यगुणे परे । किरति । गिरति ।

वा स्वरे ॥ २०० ॥ गिरतेरश्रुतेर्लश्रुतिर्भवति वा स्वरे परे । गिलति गिलतः गिलन्ति । इरुरोरीरूरौ । कीर्यते गीर्यते इत्यादि ।

तुदादिः समाप्तः ।

रुधिर् आवरणे ।

स्वराद्रुधादेः परो न शब्दः ॥ २०१ ॥ रुधादेर्गणस्य स्वरात्परो विकरणसंज्ञको नकारागमो भवति कर्तरि विहिते सार्वधातुके परे । णत्वं घढधभेभ्यस्तथोर्धोधः । धुटां तृतीयश्चतुर्थेषु । रुणद्धि.

रुधादेर्विकरणान्तस्य लोपः ॥ २०२ ॥ रुधादेर्विकरणान्तस्य लोपो भवति अगुणे सार्वधातुके परे । रुन्द्धः रुन्धन्ति । रुन्त्से । रुन्धाथे रुन्ध्वे । रुन्धे रुन्ध्वहे रुन्ध्महे । भुजपालनाभ्यवहारयोः ।

अशने भुजरुचादिः ॥ २०३ ॥ अशनार्थे भुजरुचादिर्भवति इति रुचादिः । भुङ्क्ते भुञ्जाते भुञ्जते । भुङ्क्षे भुञ्जाथे भुङ्ग्ध्वे । भुञ्जे भुञ्ज्वहे भुञ्ज्महे । युजिर् योगे । युनक्ति युङ्क्तः युञ्जन्ति ॥ युञ्जते । युङ्क्षे युञ्जाथे युङ्ग्ध्वे । युञ्जे युञ्ज्वहे युञ्ज्महे । रुन्ध्यात् । रुन्धीत । भुञ्जीत । युज्यात् । युञ्जीत । रुणद्धु रुन्द्धात् रुन्द्धां रुन्धन्तु । रुन्द्धि । रुन्द्धात् रुन्द्धं रुन्द्ध । रुणधानि रुणधाव रुणधाम भुङ्क्तां भुञ्जातां भुञ्जतां । भुङ्क्ष्व भुञ्जाथां भुङ्ग्ध्वं । भुनजै भुनजावहै भुनजामहै । युनक्तु युङ्क्तात् युङ्क्तां युञ्जन्तु । युङ्ग्धि युङ्क्तात् युङ्क्तं युङ्क्त । युनजानि युनजाव युनजाम । युङ्क्तां । अरुणत् अरुणद् अरुन्धां अरुन्धन् ।

सोऽपदान्ते वा ॥ २०४ ॥ दधोरत्वं स्यात् तत्रापि शब्दबहुलभावात् ।

सोऽपदान्तेऽरेफप्रकृत्योरपि ॥ २०५ ॥ पदान्ते वर्तमानयोर्दधोरत्वं वा स्यात् ह्यस्तन्यां मध्यमपुरुषैकवचने । अरुणत्वं अरुणस्त्वं । अरुन्द्धं । अरुन्द्ध । अरुणधं अरुन्ध्व अरुन्ध्म । अभुङ्क्त अभुञ्जातां अभुञ्जत । अभुङ्क्थाः अभुञ्जाथां अभुङ्ग्ध्वं । अभुञ्जि । अ-

भुञ्ज्वहि अभुञ्ज्महि। अयुनक् अयुनग् अयुङ्क्तां अयुञ्जन्। अयुनक् अयुनग् अयुङ्क्तं अयुङ्क्त। अयुनजं अयुञ्ज्व अयुञ्ज्म। अयुङ्क्त अयुञ्जातां अयुञ्जत। अयुङ्क्थाः अयुञ्जाथां अयुङ्ग्ध्वं। अयुञ्जि अयुञ्ज्वहि अयुञ्ज्महि। भावकर्मणोः। रुध्यते रुध्येते रुध्यन्ते। भुज्यते भुज्येते भुज्यन्ते। भिदिर् विदारणे। छिदिर् द्विधाकरणे। भिनत्ति। छिनत्ति। भिन्द्यात्। छिन्द्यात्। भिनत्तु। छिनत्तु। अभिनत् अभिंत्तां अभिन्दन्। अभिनत्त्वं अभिनस्त्वं अभिन्तं अभिन्त। अभिनदं अभिन्द्व अभिन्द्म। अच्छिनत् अच्छिन्ताम् अच्छिन्दन्। अच्छिनत्त्वं अच्छिनस्त्वं अच्छिन्तं अच्छिन्त। अच्छिन्दम् अच्छिन्द्व अच्छिन्द्म। इति रुधादिः समाप्तः।

तनु विस्तारे।

तनादेरुः॥ २०६॥ तनादेर्गणाद्विकरणसंज्ञक उर्भवति कर्तरिविहिते सार्वधातुके परे। तनोति तनुतः तन्वन्ति। मनुङ् अवबोधने। मनुते मन्वाते मन्वते। मनुषे मन्वाथे मनुध्वे। मन्वे मनुवहे मन्वहे मनुमहे मन्महे। डुकृञ् करणे।

करोतेः॥२०७॥ करोतेः गुणो भवति स्वविकरणे परे। करोति।

अस्योकारः सार्वधातुकेऽगुणे॥ २०८॥ करोतेरकारस्य उकारो भवति अगुणे सार्वधातुके परे। कुरुतः कुर्वन्ति। करोषि कुरुथः कुरुथ। करोमि।

करोतेर्नित्यम्॥ २०९॥ करोतेः परस्य उकारस्य नित्यं लोपो भवति वमोः परतः। कुर्वः कुर्मः। कुरुते कुर्वाते कुर्वते। भावकर्मणोश्च। तन्यते। मन्यते।

ये च॥ २१०॥ करोतेः परस्य उकारस्य नित्यं लोपो भवति ये च परे। कुर्यात्। कुर्वीत। तनोतु तनुतात् तनुतां तन्वन्तु।

उकाराच्च॥ २११॥ उकाराच्च विकरणात्परस्य हेर्लोपो भवति। तनु तनुतात् तनुतं तनुत। तनवानि तनवाव तनवाम।

मनुतां मन्वातां मन्वतां ॥ करोतु कुरुतात् कुरुतां कुर्वन्तु । कुरुतां । अतनोत् अतनुतां अतन्वन् । अतनोः । अमनुत अमन्वातां अमन्वत । अमनुथाः अमन्वाथां अमनुध्वं । अमन्वि अमनुवहि अमन्वहि अमनुमहि अमन्महि । अकरोत् अकुरुतां अकुर्वन् । अकुरुत । भावकर्मणोः । तन्यते । मन्यते "भावकर्मणोश्च । यणाशिषोर्ये" इतीकारागमः । क्रियते । इति तनादिः । डुक्रीञ् द्रव्यविनिमये ।

ना क्र्यादेः ॥ २१२ ॥ क्र्यादेर्विकरणसंज्ञको ना भवति कर्तरि विहिते सार्वधातुके परे । क्रीणाति । उभयेषामिति ईकारः । क्रीणीतः ।

क्र्यादीनां विकरणस्य ॥ २१३ ॥ क्र्यादीनां विकरणाकारस्य लोपो भवति स्वरादावगुणे सार्वधातुके परे । क्रीणन्ति । वृङ् संभक्तौ । वृणीते वृणाते वृणते । ग्रहञ् उपादाने ।

सपरास्वरायाः सम्प्रसारणमन्तस्थायाः ॥ २१४ ॥ परेण धातुस्वरेण सह अन्तस्थायाः सम्प्रसारणं भवति । इत्यधिकृत्य ।

ग्रहिज्यावयिव्यधिवष्टिव्यचिप्रच्छिव्रश्चिभ्रस्जीनामगुणे ॥ २१५ ॥ ग्रहादीनामन्तस्थायाः परेण स्वरेण सह सम्प्रसारणं भवत्यगुणे परे । किं सम्प्रसारणं ।

सम्प्रसारणं य्वृतोऽन्तस्था निमित्ताः ॥ २१६ ॥ अन्तस्था निमित्ता इ उ ऋ ताः संप्रसारणसंज्ञा भवन्ति । गृह्णाति गृह्णीतः गृह्णन्ति । गृह्णीते गृह्णाते गृह्णते । ज्या वयोहानौ । जीनाति । भावकर्मणोश्च । जीयते । वेञ् तन्तुसन्ताने । वयति वयतः वयन्ति । वयते ॥ ऊयते । व्यध ताडने । विध्यति विध्यते । वश कान्तौ ।

छशोश्च ॥ २१७ ॥ छशोश्च षो भवति धुट्यन्ते च । वष्टि उष्टः उशन्ति । वक्षि उष्ठः उष्ठ । वश्मि उश्वः उश्मः । उश्यते । व्यच व्याजीकरणे । विचति विचतः विचन्ति । विच्यते । प्रच्छ ज्ञीप्सायां । पृच्छति पृच्छतः पृच्छन्ति । पृच्छयते । व्रश्चू छेदने । वृश्चति । वृश्चते ।

भ्रस्ज पाके। लवर्णतवर्गलसा दन्त्या इति न्यायात्। भृज्जति। भृज्जते। त्रिषु व्यञ्जनेषु सञ्जायमानेषु सजातीयानामेकव्यञ्जनलोपः। क्रीणीयात्। वृणीत। गृह्णीयात्। गृह्णीत। क्रीणातु क्रीणीतात् क्रीणीताम्। क्रीणन्तु। क्रीणीहि क्रीणीतात् क्रीणीतं क्रीणीत। क्रीणानि क्रीणीव क्रीणीम। वृणीत। गृह्णातु गृह्णीतात् गृह्णीतां गृह्णन्तु।

आन व्यञ्जनान्ताद्धौ॥२१८॥ व्यञ्जनान्तात्क्र्यादेर्विकरणसंज्ञक आनो भवति हौ परे। गृहाण गृह्णीतात् गृह्णीतं गृह्णीत। गृह्णानि गृह्णीव गृह्णीम। गृह्णीतां। अक्रीणात् अक्रीणीतां अक्रीणन्। अक्रीणाः अक्रीणीतं अक्रीणीत। अक्रीणं अक्रीणीव अक्रीणीम। अवृणीत अवृणातां अवृणत। अवृणीथाः अवृणाथां अवृणीध्वं। अवृणि अवृणीवहि अवृणीमहि। अगृह्णात्। अगृणीत। भावकर्मणोः। विक्रीयते। व्रियते। गृह्यते। पूञ् पवने।

प्वादीनां ह्रस्वः ॥ २१९ ॥ प्वादीनां ह्रस्वो भवति स्वविकरणे। पुनाति पुनीतः पुनन्ति। पुनीयात् पुनीयातां पुनीयुः। पुनातु पुनीतात् पुनीतां पुनन्तु। पुनीहि पुनीतात् पुनीतं पुनीत। पुनानि पुनाव पुनाम। अपुनात् अपुनीतां अपुनन्। अपुनाः अपुनीतं अपुनीत। अपुनं अपुनीव अपुनीम। एवं लूञ् छेदने। लुनाति। लुनीतात्। लुनीत। अलुनात्। ज्ञा अवबोधने।

ज्ञश्च ॥ २२० ॥ ज्ञश्च स्वविकरणे जा भवति। जानाति जानीतः जानन्ति। जानीयात्। जानातु जानीतात् जानीतां जानन्तु। अजानात् अजानीतां अजानन्। इति क्र्यादिः।

चुर स्तेये।

चुरादेश्च ॥ २२१ ॥ चुरादेः कारितसंज्ञक इन् भवति स्वार्थे उपधाया गुणः।

ते धातवः ॥ २२२ ॥ ते सनादिप्रत्ययान्ता धातुसंज्ञा भवन्ति अन्विकरणः कर्त्तरि। अनि च विकरणे इति गुणः। चोरयति

चोरयतः चोरयन्ति ॥ मन्त्रि गुप्तभाषणे ॥ अत एव इदनुबन्धानां धातूनां नुरागमोऽस्ति गुणागुणे प्रत्यये परे । मन्त्रयते मन्त्रयेते मन्त्रयन्ते ॥ वृङ् आवरणे ।

अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्सु ॥२२३॥ अस्योपधाया दीर्घो भवति नाम्यन्तानां वृद्धिर्भवति इन् इच् अट् एषु परतः । वारयति वारयतः वारयन्ति । वारयते । भावकर्मणोश्च ।

कारितस्यानामिड्विकरणे ॥ २२४ ॥ कारितस्य लोपो भवति आम् इड् विकरणवर्जिते प्रत्यये परे ।

स्वरादेशः परनिमित्तकः पूर्वविधिं प्रति स्थानिवत् ॥२२५॥ स्वरादेशः परनिमित्तकः पूर्ववर्णस्य विधिं प्रति स्थानिवद्भवति । चोर्यते वार्यते । गुडि सजि पल रक्षणे । गुण्डयति । सञ्जयति पाळयति । उपधाभूतस्येति किं । अर्च पूजायां । अर्चयति । चोरयेत् । मन्त्रयेत् । वारयेत् । चोरयतु । मन्त्रयतां । वारयतु । वारयतां । अचोरयत् । अमन्त्रयत । अवारयत । गुण्डयेत् । गुण्डयतु । अगुण्डयत् । सञ्जयेत । सञ्जयतु । असञ्जयत् । पाळयेत् । पाळयतु । अपाळयत् । अर्चयेत् । अर्चयतु । आर्चयत् । भावकर्मणोश्च । गुण्ड्यते । सज्जते । पाल्यते । अर्च्यते इत्यादि । एवं सर्वमुन्नेयं । इति चुरादिः ।

इति सार्वधातुकं ।

अथाऽसार्वधातुकमुच्यते ।

भूतकरणवत्यश्च ॥२२६॥ इति अतीतमात्रे अद्यतनी भवति । अद्यभवोऽद्यतनः । तत्रातीतेऽद्यतने भवति । भू सत्तायां ।

सिजद्यतन्याम् ॥ २२७ ॥ धातोः सिज्भवति अद्यतन्यां परतः ।

इडागमोऽसार्वधातुकस्यादिर्व्यञ्जनादेरयकारादेः ॥ २२८ ॥ धातोः परस्य व्यञ्जनादेरयकारादेरसार्वधातुकस्यादाविडागमो भवति ।

इणिक्स्थादापिबतिभूभ्यः सिचः परस्मै ॥२२९॥ इणादिभ्यः परस्य सिचो लुग्भवति परस्मैपदे परे ।

भुवः सिज्लुकि ॥ २३० ॥ भुव इडागमो न भवति सिज्लुकि । अभूत् अभूतां ।

भुवो वोन्तः परोक्षाद्यतन्योः ॥२३१॥ भूधातोरान्तो वकारागमो भवति परोक्षाद्यतन्योः स्वरे परे । अभूवन् । अभूः अभूतं अभूत । अभूवं अभूव अभूम । इण् गतौ ।

इणो गाः ॥ २३२ ॥ इणो गा भवत्यद्यतन्यां परतः ।

अनिडेकस्वरादातः ॥ २३३ ॥ एकस्वरादाकारात्परमसार्वधातुकमनिड् भवति । अगात् अगातां ।

आलोपोऽसार्वधातुके ॥ २३४ ॥ धातोराकारस्य लोपो भवत्यसार्वधातुके स्वरादावगुणे परे । अगुः । अगाः अगातं अगात । अगाम् अगाव अगाम । इक् स्मरणे ।

इकोऽपि ॥ २३५ ॥ इकोऽपि गा भवत्यद्यतन्यां परतः । इङिकावध्युपसर्गं न व्यभिचरतः । अध्यगात् अध्यगातां अध्यगुः । अस्थात् अस्थातां अस्थुः । अध्मात् । अदात् । इत्यादि ।

इङ् अध्ययने ।

अद्यतनीक्रियातिपत्त्योर्गी वा ॥२३६॥ अद्यतनीक्रियातिपत्त्योरात्मनेपदे परे ईङो वा गी आदेश इष्यते ॥

इवर्णादश्विश्रिडीङ्शीङः ॥ २३७ ॥ श्विश्रिडीङ्शीङ्वर्जितादेकस्वरादिवर्णात्परमसार्वधातुकमनिड् भवति । आदेशबलादगुणित्वे । अध्यगीष्ट अध्यगीषातां अध्यगीषत । अध्यगीष्ठाः अध्यगीषाथां ॥

सिचो धकारे ॥ २३८ ॥ सिचो लोपो भवति धकारे परे ।

नाम्यन्ताद्धातोराशीरद्यतनीपरोक्षासु धो ढः ॥ २३९ ॥ नाम्यन्ताद्धातोराशीरद्यतनीपरोक्षासु धो ढो भवति । अध्यगीढ्वं । अध्यगीषि अध्यगीष्वहि अध्यगीष्महि । पक्षे स्वरादीनां वृद्धिरादेः ॥ अध्यैष्ट अध्यैषातां अध्यैषत ॥ अध्यैष्ठाः अध्यैषाथां अध्यैढ्वं । अध्यैषि अध्यैष्वहि अध्यैष्महि ।

भूप्राप्तौ ॥ २४० ॥ भूधातोः भूप्राप्तावात्मनेपदी भवति । अभविष्ट अभविषातां अभविषत । अभविष्ठाः अभविषाथां अभविढ्वं । अभविषि अभविष्वहि अभविष्महि । समवप्रविभ्यश्चेति स्था रुचादिः ।

स्थादोरिरद्यतन्यामात्मने ॥ २४१ ॥ स्थादासंज्ञकयोरन्तस्य इर्भवति अद्यतन्यामात्मनेपदे परे ।

स्थादोश्च ॥ २४२ ॥ स्थादासंज्ञकयोर्गुणो न भवति अनिटि सिजाशिषोश्चात्मनेपदे परे ।

ह्रस्वाच्चानिटः ॥ २४३ ॥ ह्रस्वात्परस्य अनिटः सिचो लुग्भवति धुटि परे ॥ समस्थित समस्थिषातां समस्थिषत । समस्थिथाः समस्थिषाथां समस्थिढ्वं । समस्थिषि समस्थिष्वहि समस्थिष्महि ॥ अदित अदिषातां अदिषत । अदिथाः अदिषाथां अदिढ्वं । अदिषि अदिष्वहि अदिष्महि । ऐधिष्ट ऐधिषातां ऐधिषत । ऐधिष्ठाः ऐधिषाथां ऐधिढ्वं । ऐधिषि ऐधिष्वहि ऐधिष्महि ।

पचिवचिसिचिरुचिमुचेश्चात् ॥ २४४ ॥ एभ्यः पञ्चभ्यः परमसार्वधातुकमनिट् भवति ।

अस्य च दीर्घः ॥२४५॥ व्यञ्जनान्तानामनिटामुपधाभूतस्यास्य दीर्घो भवति परस्मैपदे सिचि परे ।

सिचः ॥ २४६ ॥ सिचः परयोर्दिस्योरादिरीड्भवति । अपाक्षीत् ।

धुटश्च धुटि ॥२४७॥ धुटः परस्य सिचो लोपो भवति धुटि परे ।

अपाक्तां अपाक्षुः । अपाक्षीः अपाक्तं अपाक्त । अपाक्षं अपाक्ष्व अपाक्ष्म । अपक्त अपक्षातां अपक्षत । अपक्थाः अपक्षाथां अपग्ध्वं । अपक्षि अपक्ष्वहि अपक्ष्महि । वद व्यक्तायां वाचि ।

वदव्रजरलन्तानां च ॥ २४८ ॥ वदव्रजरलन्तानामुपधाभूतस्यास्य दीर्घो भवति परस्मैपदे सिचि परे ।

इटश्चेटि ॥ २४९ ॥ इटः परस्य सिचो लोपो भवति इटि परे। अवादीत् अवादिष्टां अवादिषुः । ध्वज वज व्रज गतौ । प्राव्राजीत् प्राव्राजिष्टां प्राव्राजिषुः । वर ईप्सायां । अवारीत् अवारिष्टां अवारिषुः । चर गतिभक्षणयोः । अचारीत् अचारिष्टां अचारिषुः । फल निष्पत्तौ । अफालीत् अफालिष्टां अफालिषुः । खल श्वल्ल आशुगतौ । अखालीत् अखालिष्टां अखालिषुः । अखालीः अखालिष्टं अखालिष्ट । अखालिषं अखालिष्व अखालिष्म ।

व्यञ्जनादीनां सेटामनेदनुबन्धह्म्यन्तकणक्षणश्वसवधां वा ॥२५०॥ एदनुबन्धह्म्यन्तकणक्षणश्वसवर्जितानां सेटां व्यञ्जनादीनां धातूनां उपधाभूतस्यास्य दीर्घो भवति वा परस्मैपदे सिचि परे । रद विलेखने । अरादीत् अरादिष्टां अरादिषुः। अरदीत् अरदिष्टां अरदिषुः । गद् व्यक्तायां वाचि । अगादीत् अगादिष्टां अगादिषुः । अगदीत् अगदिष्टां अगदिषुः । व्यञ्जनादीनामिति किं ।

मायोगेऽद्यतनी ॥ २५१ ॥ माशब्दयोगे धातोरद्यतनी भवति । अटपटइटकिटकट गतौ । माभवानटीत् । माभवन्तावटिष्टां । मा भवन्तोऽटिषुः। मा त्वमटीः मा युवामटिष्टं मा यूयमटिष्ट । माहमटिषं मा वामटिष्व मा वयमटिष्म । सेटामिति किं । अपाक्षीत् अपाक्तां अपाक्षुः । अपाक्षीः अपाक्तं अपाक्त। अपाक्षं अपाक्ष्व अपाक्ष्म । नित्यमुपधाभूतस्येति किं ॥ अव रक्ष पालने ॥ अरक्षीत् अरक्षिष्टां अरक्षिषुः । अरक्षीः अरक्षिष्टं अरक्षिष्ट । अरक्षिषं अरक्षिष्व अरक्षिष्म । तक्षू त्वक्षू तनूकरणे । अतक्षीत् । अत्वक्षीत् । अस्येति किं ॥ मुष स्तेये ।

अमोषीत् अमोषिष्टां अमोषिषुः । कुष निष्कर्षे ॥ अकोषीत् अकोषिष्टां अकोषिषुः । वर्जनं किं ॥ खगे हसने । अखगीत् अखगिष्टां अखगिषुः । रगे शङ्कायां । अरगीत् ॥ कगे नोच्यते ॥ अकगीत् अकगिष्टां अकगिषुः । ग्रहञ् उपादाने ॥ अग्रहीत् अग्रहीष्टां अग्रहीषुः । इटो दीर्घो ग्रहेरपरोक्षायां दीर्घः । वह परिकल्कने । रह त्यागे । अरहीत् अरहिष्टां अरहिषुः । टुवमुद्गिरणे ॥ अवमीत् । क्रमु पादविक्षेपे । अक्रमीत् अक्रमिष्टां अक्रमिषुः । चमु छमु जमु झमु जिमु अदने । अचमीत् । अच्छमीत् । अजमीत् । अझमीत् । अजिमीत् अजिमिष्टां अजिमिषुः । व्यय क्षये । अव्ययीत् अव्ययिष्टां अव्ययिषुः । अय वय मय पय तय चय रय णय गतौ । आयीत् । अवयीत् । अमयीत् । अपयीत् । अतयीत् । अचयीत् । अरयीत् । अनयीत् अनयिष्टां अनयिषुः । कण निमीलने । अकणीत् । क्षण क्षुण हिंसायां । अक्षणीत् । श्वस प्रापणे । अश्वसीत् अश्वसिष्टां अश्वसिषुः । हनु हिंसागत्योः । अद्यतन्यां च वधादेशः । अवधीत् अवधिष्टां अवधिषुः । इत्यादि ॥ टुणदि समृद्धौ । अनन्दीत् अनन्दीष्टां अनन्दिषुः ॥ श्रंसु भ्रंसु अवस्रंसने । ध्वंस गतौ च । अश्रंसिष्ट अश्रंसिषातां अश्रंसिषत । अश्रंसिष्ठाः अश्रंसिषाथां अश्रंसिध्वं । अश्रंसिषि अश्रंसिष्वहि अश्रंसिष्महि । अभ्रंसिष्ट अभ्रंसिषातां अभ्रंसिषत । अध्वंसिष्ट । व्येञ् संवरणे ।

सन्ध्यक्षरान्तानामाकारोऽविकरणे ॥ २५२ ॥ सन्ध्यक्षरान्तानां धातूनां आकारो भवति अविकरणे परे ।

यमिरमिनम्यादन्तानां सिरन्तश्च ॥ २५३ ॥ एषामिडागमः सकारपूर्वो भवति परस्मैपदे सिचि परे । यमु उपरमे । अयंसीत् अयंसिष्टां अयंसिषुः । रमु क्रीडायां । अरंसीत् अरंसिष्टां अरंसिषुः ।

व्याङ्परिभ्यो रमः ॥२५४॥ विआङ्परिभ्यः परस्य रमुधातोः परं परस्मैपदं भवति ॥ व्यरंसीत् ॥ णमु प्रह्वत्वे शब्दे । अनं-

सीत् । अव्यासीत् अव्यासिष्टां अव्यासिषुः । अव्यास्त अव्यासातां अव्यासत ।

सणनिटः शिडन्तान्नाम्युपधाददृशः ॥२५५॥ दृश-वर्जितात् नाम्युपधादनिटः शिडन्ताद्धातोः सण् भवति अद्यतन्यां परतः सिचोपवादः ॥ रिश रुश हिंसायां ॥ क्रुश आह्वाने रोदने च ॥ लिश विच्छ गतौ ॥ क्रुश ह्वरणदीप्तौ ॥

रिशिरुशिक्रुशिलिशिविशिदिशिदृशिस्पृशिमृशिदंशेः शात् ॥२५६॥ एभ्यः परमसार्वधातुकमनिट् भवति । अरिक्षत् अरिक्षतां अरिक्षन् । अरिक्षः अरिक्षतं अरिक्षत । अरिक्षं अरिक्षाव अरिक्षाम । अक्रुक्षत् अक्रुक्षतां अक्रुक्षन् । अक्रुक्षः अक्रुक्षतं अक्रुक्षत ॥

सणो लोपः स्वरे बहुत्वे ॥२५७॥ सणोऽस्य लोपो भवत्यबहुत्वे स्वरे परे । अक्रुक्षं अक्रुक्षाव अक्रुक्षाम । विश प्रवेशने । अविक्षत् । त्विष दीप्तौ ।

त्विषिपुष्यतिकृषिश्लिष्यतिद्विषिपिषिविषिशिषिशुषितुषिदुषेः षात् ॥ २५८ ॥ एभ्यः परमसार्वधातुकमनिट् भवति । अत्विक्षत् अत्विक्षतां अत्विक्षन् । कृष विलेखने । अकृक्षत् अकृक्षतां अकृक्षन् । श्लिष आलिङ्गने । अश्लिक्षत् । द्विष अप्रीतौ । अद्विक्षत् । पिष्लृ संचूर्णने । अपिक्षत् । विष्लृ व्याप्तौ । अविक्षत् । शिष्लृ विशेषणे । अशिक्षत् । तुष तुष्टौ । अतुक्षत् । दुष वैकृत्ये । अदुक्षत् अदुक्षतां अदुक्षन् । दुह प्रपूरणे ।

दहिदिहिदुहिमिहिरिहिरुहिलिहिलुहिनहिवहेर्हात् ॥ २५९ ॥ एभ्यः परमसार्वधातुकमनिट् भवति । अधुक्षत् अधुक्षतां अधुक्षन् । दिह उपचये[1] । अधिक्षत् । अनिटामिति किं । कुष निष्कर्षे । अकोषीत् अकोषिष्टां अकोषिषुः । शिडन्तादिति किं । अभुक्त अभुक्षातां अभुक्षत । अभुक्थाः अभुक्षाथां अभुग्ध्वं । अभुक्षि

[1] उपचयो वृद्धिः ।

अभुक्ष्वहि अभुक्ष्महि । नाम्युपधादिति किं । दह भस्मीकरणे । अधाक्षीत् । प्रकृत्याश्रितमन्तरङ्गं प्रत्ययाश्रितं बहिरङ्गं । "अन्तरङ्गबहिरङ्गयोरन्तरङ्गो विधिर्बलवान् ।" इति धत्वं चतुर्थत्वं च । अदाग्धां अधाक्षुः । अधाक्षीः अदाग्धं अदाग्ध । अधाक्षं अधाक्ष्व अधाक्ष्म । अदृश इति किं । दृशिर् प्रेक्षणे ।

सृजिदृशोरागमोकारः स्वरात्परोधुटिगुणवृद्धिस्थाने ॥२६०॥ सृजिदृशोः स्वरात्परोऽकारागमो भवति गुणवृद्धिस्थाने धुटि परे । अद्राक्षीत् अद्राष्टां अद्राक्षुः ।

भृजादीनां षः ॥ २६१ ॥ भृजादीनां षो भवति धुट्यन्ते च । सृज विसर्गे । अस्राक्षीत् अस्राष्टां अस्राक्षुः । इति भ्वादिः ॥ अद् भक्षणे ।

अदेर्घस्लृसनद्यतन्योः ॥ २६२ ॥ अदेर्घस्लृ आदेशो भवति सनद्यतन्योः परतः ।

पुषादिद्युताद्लृकारानुबन्धर्त्तिसर्त्तिशास्तिभ्यश्च परस्मै ॥ २६३ ॥ एभ्योऽण् भवति अद्यतन्यां परस्मैपदे । सिचोऽपवादः । अघसत् अघसतां अघसन् । पुष पुष्टौ ॥ अपुषत् अपुषतां अपुषन् । शुष शोषणे ॥ अशुषत् अशुषतां अशुषन् । द्युत शुभ रुच दीप्तौ । अद्युतत् अद्युततां अद्युतन् । अद्युतः अद्युततं अद्युतत । अद्युतं अद्युताव अद्युताम । अशुभत् । अरुचत् । श्वित आवर्णे । अश्वितत् । सु, श्रु, द्रु, दु, ऋच्छ, गम्लृ, सृप्लृ गतौ ।

अर्त्तिसर्त्योरणि ॥ २६४ ॥ अर्त्तिसर्त्योर्गुणो भवति अणि परे । आरत् असरत् । शास् अनुशिष्टौ ।

शासेरिदुपधाया अण्व्यञ्जनयोः ॥ २६५ ॥ शासेरुपधाया इद्भवति अण्व्यञ्जनयोः परतः ।

शासिवसिघसीनां च ॥२६६॥ निमित्तात् परः शासिवसिघसीनां सकारः षत्वमापद्यते । अशिषत् । परस्मा इति किं । व्य-

द्योतिष्ट व्यद्योतिषातां व्यद्योतिषत । शीङ् स्वप्ने । अशयिष्ट । ब्रुवो वचिरिति वचिरादेशः ।

अणसुवचिख्यातिलिपिसिचिह्वः ॥२६७॥ एभ्योऽण् भवति अद्यतन्यां परतः । असु क्षेपणे ।

अस्यतेस्थोन्तः ॥ २६८ ॥ अस्यतेरन्ते थकारागमो भवत्यणि परे । अपास्थत् अपास्थताम् अपास्थन् ।

अणिवचेरोदुपधायाः ॥ २६९ ॥ वचेरुपधाया ओद्भवति कर्त्तरि विहितायामद्यतन्यामणि परे । अवोचत् । अवोचत । ख्या प्रकथने ।

आलोपोऽसार्वधातुके ॥ २७० ॥ धातोराकारस्य लोपो भवति स्वरादावगुणेऽसार्वधातुके परे । आख्यत् आख्यतां आख्यन् । लिप् उपदेहे । अलिपत् । व्यवस्थितत्वाधिकाराल्लिम्पादीनामात्मनेपदे वा अण् पक्षे सिच् । अलिपत अलिप्त । धुटश्च धुटि । सिचो लोपः । अलिपेतां अलिप्सातां अलिपन्त अलिप्सत । अलिपथाः अलिप्थाः । अलिपेथां अलिप्साथां अलिपध्वं अलिप्ध्वं । अलिपे अलिप्सि अलिपावहि अलिप्स्वहि अलिपामहि अलिप्स्महि । षिचिर् क्षरणे । असिचत् । ह्वेञ् स्पर्धायां शब्दे च । आह्वत् आह्वतां आह्वन् । आह्वत आह्वेतां आह्वन्त । हन् हिंसागत्योः ।

अद्यतन्यां च ॥ २७१ ॥ हन्तेर्वधिरादेशो भवति अद्यतन्यां परतः । अवधीत् अवधिष्टां अवधिषुः । आत्मनेपदे परे हन्तेर्वधिरादेशो वा भवति । आङो यमहनौ स्वाङ्गकर्मकौ चेत्यात्मनेपदं भवति ।

आत्मनेपदे वा हनः ॥२७२॥ अद्यतन्यां हन्तेरन्तस्य लोपो भवत्यद्यतन्यां सिच्यात्मनेपदे । आहत । आहसातां आहसत । अवधिष्ठ अवधिषातां अवधिषत ॥ इत्यादिः ॥ हु दानादनयोः ।

सिचि परस्मै स्वरान्तानाम् ॥ २७३ ॥ स्वरान्तानां वृद्धिर्भवति परस्मैपदे सिचि परे । नामिन एव ।

उतोयुरुणुस्नुक्षुह्नुवः ॥ २७४ ॥ युरुणुस्नुक्षुहुवर्जितादेकस्वरादुदन्तात्परमसार्वधातुकमनिट् भवति। अहौषीत् अहौष्टां अहौषुः। अधात् अधातां अधुः। स्थादोरिरद्यतन्यामात्मने । इति इकारादेशः।

स्थादोश्च ॥ २७५ ॥ स्थादासंज्ञकयोर्गुणो न भवति अनिटि सिजाशिषोश्चात्मनेपदे परे इति गुणनिषेधः । ह्रस्वाच्चानिट् इति सिचो लोपः। अधित अधिषातां अधिषत । अधिथाः अधिषाथां अधिढ्वं । अधिषि अधिष्वहि अधिष्महि । समस्थित समस्थिषातां समस्थिषत । इति जुहोत्यादिः॥ दिवु क्रीडाविजिगीषादीति । अदेवीत् अदेविष्टां अदेविषुः ।

स्वरतिसूतिसूयत्यूदनुबन्धाच्च ॥ २७६ ॥ एभ्यः परमसार्वधातुकमनिट् भवति वा । षूङ् प्राणिप्रसवे । असोष्ट असोषातां असोषत । असोष्ठाः असोषाथाम् ।

नाम्यन्ताद्धातोराशीरद्यतनीपरोक्षासु धो ढः ॥ २७७ ॥ नाम्यन्ताद्धातोराशीरद्यतनीपरोक्षासु धो ढो भवति । असोढ्वं । असोषि असोष्वहि असोष्महि । असविष्ट असविषाताम् । असविषत । दहि दिहि दुहि इत्यादिनानिट् ।

नहेर्धः ॥ २७८ ॥ नहेर्हकारस्य धो भवति धुट्यन्ते च । अनात्सीत् अनाद्धां अनात्सुः । अनात्सीः अनाद्धं अनाद्ध । अनात्सं अनात्स्व अनात्स्म । अनद्ध अनत्सातां अनत्सत । अनद्धाः अनत्साथां अनद्ध्वं । अनत्सि अनत्स्वहि अनत्स्महि । इति दिवादिः ।

स्तुसुधूञ्भ्यः परस्मै ॥ २७९ ॥ स्तुसुधूञ्भ्य इडागमो भवति परस्मैपदे सिचि परे । अस्तावीत् अस्ताविष्टां अस्ताविषुः । धूञ् कम्पने । अधावीत् । उदनुबन्धत्वाद्विकल्पेनेट् । आशिष्ट आशिषातां आशिषत । आष्ट आक्षातां आक्षत । अचैषीत् अचैष्टां अचैषुः । अचेष्ट अचेषातां अचेषत । इतिस्वादिः ।

अदितुदिनुदिक्षुदिखिद्यतिविद्यतिविन्दतिविनत्तिछिदिभिदिहदिशदिसदिपदिस्कन्दिखिदेदात् ॥ २८० ॥ एभ्यः षोडशभ्यः परमसार्वधातुकमनिट् भवति ।

व्यञ्जनान्तानामनिटाम् ॥ २८१ ॥ व्यञ्जनान्तानामनिटां धातूनां वृद्धिर्भवति परस्मैपदे सिचि परे । तुद व्यथने । अतौत्सीत् अतौत्तां अतौत्सुः । अतुत्त अतुत्सातां अतुत्सत । मृङ् प्राणत्यागे ।

ऋतोऽवृङ्वृञः ॥ २८२ ॥ वृङ् वृञ् वर्जितादेकस्वरादृतः परमसार्वधातुकमनिट् भवति ।

ऋदन्तानां च ॥ २८३ ॥ ऋदन्तानां च गुणो न भवति अनिटि सिजाशिषोश्चात्मनेपदे परे । अमृत अमृषातां अमृषत । अमुचत् अमुचतां अमुचन् ।

सिजाशिषोश्चात्मने ॥ २८४ ॥ नामिन उपधायाः सिच्यानात्मने पदे परे आशिषि चानिटि गुणो न भवति । अमुक्त अमुक्षातां अमुक्षत ।

स्पृशमृशकृशतृपिदृपिसृपिभ्यो वा ॥ २८५ ॥ एभ्यः सिज्वा भवति अद्यतन्यां ।

स्पृशादीनां वा ॥ २८६ ॥ स्पृशादीनां स्वरात्परः अकारागमो भवति वा गुणवृद्धिस्थाने धुटि परे ॥ स्पृश संस्पर्शने ॥ अस्प्राक्षीत् अस्प्राष्टां अस्प्राक्षुः । अस्पार्क्षीत् अस्पार्ष्टां अस्पार्क्षुः । सणइति सण् । अस्पृक्षत् । मृश आमर्शने ॥ अम्राक्षीत् अम्राष्टां अम्राक्षुः । अमार्क्षीत् अमार्ष्टां अमार्क्षुः । अमृक्षत् । कृश विलेखने । अक्राक्षीत् अक्राष्टां अक्राक्षुः । अकार्क्षीत् अकार्ष्टां अकार्क्षुः । अकृक्षत् ॥ तृपिदृप्योर्वा ॥ तृप प्रीणने ॥ अत्राप्सीत् अत्राप्तां अत्राप्सुः । अतार्प्सीत् । पुषादित्वादण् भवति। अतृपत् । दृप हर्षमोहनयोः । अद्राप्सीत् अद्राप्ताम् अद्राप्सुः । अदार्प्सीत् । अदृपत् । अदर्पीत् ।

एतौ पुषादी । सृप्लृविगतौ । अस्राप्सीत् । असार्प्सीत् । असृपत् ।
इति तुदादिः ।

इरनुबन्धाद्वा ॥ २८७ ॥ इरनुबन्धाद्धातोर्वा अण् भवति । कर्तर्यद्यतन्यां परस्मैपदे परे । अरुधत् अरुधतां अरुधन् । अरौत्सीत् अरौद्धां अरौत्सुः । अरौत्सीः अरौद्धं अरौद्ध । अरौत्सं अरौत्स्व अरौत्स्म । अणभावपक्षे सिच् ।

राधिरुधिक्रुधिक्षुधिबन्धिशुधिसिध्यतिबुध्यतियुधिव्यधिसाधधात् ॥ २८८ ॥ एभ्यः परमसार्वधातुकमनिट् भवति । इत्यनेन पूर्वोदाहरणेषु नेट् ।

युजिरुजिरञ्जिभुजिभजिभञ्जिसञ्जित्यजिभ्रस्जियजिमस्जिसृजिनिजिविजिष्वञ्जेर्जात् ॥ २८९ ॥ एभ्यः परमसार्वधातुकमनिट् भवति । अभुक्त अभुक्षातां अभुक्षत । इरनुबन्धाद्वेत्यण् । अयुजत् अयुजतां अयुजन् । अणभावे । अयौक्षीत् अयौक्तां अयौक्षुः । अयुक्त अयुक्षातां अयुक्षत । इति रुधादिः । तनु विस्तारे । अतनीत् अतनिष्टां अतनिषुः । अतनिष्ट अतनिषातां अतनिषत । अमनिष्ट अमनिषातां अमनिषत । अकार्षीत् अकार्ष्टां अकार्षुः । अकृत अकृषातां अकृषत । इत्यादिः । इति तनादिः । अक्रैषीत् अक्रैष्टां अक्रैषुः । अक्रेष्ट अक्रेषातां अक्रेषत । नञा निर्दिष्टमनित्यत्वात् ।

श्लोकः ।

ऋदृदन्तानां सनीड्वा स्यादात्मने च सिजाशिषोः
संयोगादेर्ऋतो वाच्यः सुडसिद्धो बहिर्भवः ॥ १ ॥

इति इड्विकल्पेन ।

पुनरपि श्लोकः ।

ऋदृदन्तोपि वा दीर्घो न परोक्षाशिषोरिटः ।
न परस्मै सिचि प्रोक्त इति योगविभञ्जनात् ॥ २ ॥

इति इटो दीर्घो विकल्पेन । वृङ् संभक्तौ । अवृत अवृषातां अवृषत । अवरिष्ट अवरिषातां अवरिषत । अवरीष्ट अवरीषातां अवरीषत । ग्रहीङ् उपादाने ।

इटो दीर्घो ग्रहेरपरोक्षायाम् ॥ २९० ॥ ग्रहेः परस्य इटो दीर्घो भवति अपरोक्षायां । अग्रहीत् अग्रहीष्टां अग्रहीषुः । अग्रहीष्ट अग्रहीषातां अग्रहीषत । इति क्र्यादिः ।

श्रिद्रुस्रुकमिकारितान्तेभ्यश्चण् कर्त्तरि ॥ २९१ ॥ एभ्यश्चण् भवति कर्त्तर्यद्यतन्यां परतः ।

चण् परोक्षाचेक्रीयितसनन्तेषु ॥ २९२ ॥ चणादिषु धातोर्द्विर्वचनं भवति । अभ्यासस्यादिर्व्यञ्जनमवशेष्यमिति अनादेर्लोपः । भज श्रिञ् सेवायां । अशिश्रियत् । अदुद्रुवत् अदुद्रुवतां । असुस्रुवत् । कमु कान्तौ ।

कवर्गस्य चवर्गः ॥ २९३ ॥ अभ्यासकवर्गस्य चवर्गो भवति आन्तरतम्यात् । अचकमत् । इत्यभ्यासो धातुवत् ॥ पक्षे अचीकमत् ।

इन्यसमानलोपोपधाया ह्रस्वश्चणि ॥ २९४ ॥ समानलोपवर्जितस्य लघ्वन्तस्याभ्यासस्य दीर्घो भवति लघुनि धात्वक्षरे इनि चण्परे ।

दीर्घोलघोरस्वरादीनाम् ॥ २९५ ॥ समानलोपवर्जितस्य लघ्वन्तस्य अस्वरादेरभ्यासस्य दीर्घो भवति लघुनि धात्वक्षरे इनि चण्परे । कारितस्य लोपः । अचूचुरत् अचूचुरतां अचूचुरन् । असमानलोपोपधाया इति किम् । अससामत् । लघ्वन्तस्य इति किम् । क्षिप क्षान्तौ । अचिक्षिपत् । क्षल शौचे । अचिक्षलत् ।

अलोपे समानस्य सन्वल्लघुनीनिचण्परे ॥ २९६ ॥ समानस्यालोपे सति लघुनि धात्वक्षरे अभ्यासस्य सन्वत्कार्यं भवति इनि चण्परे । किं सन्वत्कार्यं ।

सन्यवर्णस्य ॥ २९७ ॥ अभ्यासावर्णस्य इत्वं भवति सनि

परे । अपीपलत् अपीपलतां अपीपलन् । अलोपे समानस्येति किं । अदन्ताः कथ वाक्यप्रबन्धे इत्यादयः ।

धातोश्च ॥ २९८ ॥ अनेकाक्षरस्य धातोरन्ते स्वरादेर्लोपो भवति इनि परे । अचकथत् अचकथतां अचकथन् । एवं रच प्रयत्ने । व्यररचत् व्यररचतां व्यररचन् । इत्यादि । समानस्येति किम् । पटुमाचष्टे पटुंकरोति तत्करोति तदाचष्टे इति इन् । अपीपटत् । वृद्धौ सन्ध्यक्षरलोपः । रूप रूपक्रियायां । व्यरुरूपत् व्यरुरूपतां व्यरुरूपन् । लघुनि धात्वक्षरे इति किं । तर्ज भर्त्स सन्तर्जने । अततर्जत अततर्जेतां अततर्जन्त । संयोगविसर्गानुस्वारपरोऽपि गुरुः स्याद्ध्रस्वः । अबभर्त्सत अबभर्त्सेताम् अबभर्त्सन्त । वृङ् वरणे । अवीवरत् अवीवरतां अवीवरन् । अततन्त्रत् ।

स्वरादेर्द्वितीयस्य ॥ २९९ ॥ स्वरादेर्धातोर्द्वितीयावयवस्य द्विर्वचनं भवति । तत्र च ।

न नबदराः संयोगादयोऽये ॥ ३०० ॥ संयोगादयो ये स्वरादेर्धातोर्द्वितीयावयवस्य संयोगादयो नबदरा न द्विरुच्यन्ते नतु ये परे । अर्च पूजायां । आर्चिचत् आर्चिचतां आर्चिचन् । एवं अर्ह पूजायां । आर्जिहत् ।

न शास्वदनुबन्धानाम् ॥ ३०१ ॥ शास् ऋदनुबन्धानां चोपधाया ह्रस्वो न भवति इनि चण्परे । अशशासत् अशशासताम् अशशासन् । ढौकृ तौकृ गतौ । अडुढौकत अडुढौकेतां अडुढौकन्त । अतुतौकत । शासेरिति किं । आङः शासूङ् इच्छायां । आशीशसत् । भ्राज् भ्राष् दीप्तौ ।

भाषदीपजीवमीलपीडकणवणभणश्रणमणहेठलुपां वा ॥ ३०२ ॥ एषामुपधाया ह्रस्वो भवति वा इनि चण्परे । भाष् व्यक्तायां वाचि । दीप दीप्तौ । जीव प्राणधारणे । मील निमेषणे । पीड गहने । कण वण भण श्रण मण शब्दे । हेठ गतौ । लुप्लृ छेदने ।

अबिभ्रजत् अबिभ्रजतां अबिभ्रजन् । अबिभ्रजत । अबभ्राजत् अबभ्राजत । अबिभ्रशत् । अबिभ्रशत । अबभ्राशत् । अबभ्राशत । अबिभषत । अबभाषत । अदीदिपत् । अदिदीपत् । अजीजिवत् । अजिजीवत् । अमीमिलत् । अमिमीलत् । अपिपीडत् । अपीपिडत् । अचीकणत् । अचकाणत् । अवीवणत् । अववाणत् । अबीभणत् । अबभाणत् । अमीमणत् । अममाणत् । अशिश्रणत् । अशश्राणत् । अजीहिठत् । अजीहेठत् । अलूलुपत् । अलुलूपत् । चिति स्मृत्यां । अचिचिन्तत् । स्फुट परिहासे ।

शिट्परो घोषः॥२०३॥ शिटः परो घोषोऽवशेष्यो भवति। शिटो लोप इत्यर्थः। अपुस्फुटत्। लक्ष दर्शनाङ्कनयोः। अललक्षत्। भक्ष अदने। अबभक्षत्। कुट्ट अनृतभाषणे । अचूकुट्टत् । लड उपसेवायां । अलीलडत्। मिदि तिल स्नेहने। अमिमिन्दत्। अतितिलत् । ओलडि उत्क्षेपे। अललण्डत्। पीड अवगाहने। अपीपिडत्। नट अवस्यन्दने। अनीनटत्। बध संयमने । अबीबधत्। चुट छुट कुट छेदने । अचूचुटत्। अचूछुटत्। अचूकुटत् । पुट चुट अल्पीभावे । अपूपुटत् । अचूचुटत् । मुट चूर्णने । अमूमुटत्। घट चलने । अजीघटत् । छद षट्ट संवरणे । अचीछदत् । अषीषट्टत् । क्षिप क्षान्तौ । अचिक्षिपत् । नक्क धक्क नाशने । अननक्कत् । अदधक्कत् । चक्क चुक्क व्यथने । अचचक्कत् अचुचुक्कत् । क्षल शौचे । अचिक्षलत् । चुद संचोदने । अचूचुदत् । गुडि सुजि जसि पल रक्षणे । अजुगुण्डत् । असुसुञ्जत् । अजजंसत् अजजंसतां अजजंसन् । अपीपलत् । तिल प्रतिष्ठायां । अतीतिलत् । तुल उन्माने। अतूतुलत् । मूल रोहणे । अमूमुलत् । मान पूजायां । अमीमनत् । श्लिष श्लेषणे । अशिश्लिषत् । ज्ञप मानबन्धे च । अजिज्ञपत् । व्यय क्षये । अविव्ययत् । चूर्ण संकोचने । अचुचूर्णत् । पूज पूजायां । अपुपूजत् । अर्क ईड स्तवने । आर्चिकत् । ऐडिडत् । शुठ आलस्ये। अशूशुठत् । शुठि शोषणे । अशुशुण्ठत् । पचि विस्तारवचने । अपप-

श्वत् । तिज निशाने । अतीतिजत् । वर्ध छेदनपूर्णयोः । अववर्धत् ।
कुबि आच्छादने । अचुकुंबत् । लुबि तुबि अर्दने । अलुलुम्बत् ।
अतुतुम्बत् । म्रक्ष म्लक्ष रक्षणे । अमम्रक्षत् । अमम्लक्षत् । इल प्रे-
रणे । ऐलिलत् । लुण्ठ स्तेये । अलुलुण्ठत् । छर्द वमने । अचछर्दत् ।
गुडि वेष्टने । अजुगुण्डत् । गर्द अभिकाङ्क्षायां । अजगर्दत् । रुष
रोषणे । अरूरुषत् । मडि भूषायां हर्षे च । अममण्डत् । श्रण
दाने । अशिश्रणत् । भडि कल्याणे । अबभण्डत् । तत्रि कुटुम्बधारणे ।
अततन्त्रत् । मत्रि गुप्तभाषणे । अममन्त्रत् । विद संवेदने । अवीवि-
दत् । दंश दशने । अददंशत् । तूण रूपणे । अतूतुणत् । भ्रूण आ-
शायां । अबुभ्रूणत् । शठ श्लाघायां । अशीशठत् । स्यम वितर्के ।
असिस्यमत् । गूरी उद्यमे । अजूगुरत् । कुत्स अवक्षेपणे । अचुकु-
त्सत् । कूट प्रमादे । अचूकुटत् । वञ्च प्रलंभने । अववञ्चत् । मद
तृप्तियोगे । अमीमदत् । दिवु परिकूजने । अदीदिवत् । कुस्म कु-
स्मयने । अचुकुस्मत् । चर्च अध्ययने । अचचर्चत् । कण निमीलने ।
अचीकणत् । जसु ताडने । अजीजसत् । पष बन्धने । अपीपषत् ।
अम रोगे । आमिमत् । चट स्फुट भेदने । अचीचटत् । अपुस्फुटत् ।
घुषिर् शब्दे । अजूघुषत् । लस शिल्पयोगे । अलीलसत् । भूष अल-
ङ्कारे । अबूभुषत् । रक लक आस्वादने । अरीरकत् । अलीलकत् ।
लिगि चित्रीकरणे । अलिलिङ्गत् । मुद संसर्गे । अमूमुदत् । मुच प्र-
मोचने । अमूमुचत् । ग्रस कवलग्रहणे । अजिग्रसत् । पूरी आप्याय-
ने । अपूपुरत् । "इतः परमदन्ताः" । कथ वाक्यप्रबन्धने । अचकथत् ।
गण संख्याने । अजगणत् । पट वट ग्रन्थे । अपपठत् । अववटत् ।
रह त्यागे । अररहत् । पद गतौ । अपपदत् । कल गतौ संख्याने च ।
अचकलत् । मह पूजायां । अममहत् । स्पृह ईप्सायां । अपस्पृहत् ।
शूच पैशून्ये । अशुशूचत् । कुमार क्रीडायां । अचुकुमारत् । गोम् उ-
पदेहे । अजुगोमत् । गवेष मार्गणे । अजगवेषत् । भाज पृथक्कर्मणि ।

अबभाजत् । स्तेन चौर्ये । अतिस्तेनत् । परस्मैभाषा । आगर्वादात्मनेपदी । पद गतौ । अपपदत अपपदेतां अपपदन्त । अपपदथाः अपपदेथां अपपदध्वं । अपपदे अपपदावहि अपपदामहि । मृग अन्वेषणे । अममृगत । कुह विस्मापने । अचुकुहत । शूर वीर विक्रान्तौ । अशुशूरत । अविवीरत । स्थूल परिबृंहणे । अतुस्थूलत । अर्थ उपयाच्ञायां । आर्थत । संग्राम संयुद्धे । अससंग्रामत । गर्व माने । अजगर्वत । आत्मनेभाषा । मूत्र प्रस्रवणे । अमुमूत्रत् । पार तीर कर्मसमाप्तौ । अपपारत् । अतितीरत् । चित्र विचित्रीकरणे । अचिचित्रत् । छिद्र कर्णभेदे । अचिछिद्रत् । अन्ध दृष्ट्युपसंहारे । आन्दधत् । दण्ड दण्डनिपातने । अददण्डत् । सुख दुःख तत्क्रिययोः । असुसुखत् । अदुदुःखत् । रस आस्वादनस्नेहनयोः । अररसत् । व्यय वित्तसमुत्सर्गे । अवव्ययत् । वर्ण वर्णक्रियाविस्तारगुणवचनेषु । अववर्णत् । पर्ण हरितभावे । अपपर्णत् । अघ पापकरणे । आजिघत् । इति चुरादयः ।

मास्मभूत् । मास्मैधिष्ट । मास्मपाक्षीत् मास्मपाक्तां मास्मपाक्षुः । मास्मपाक्षीः मास्मपाक्तं मास्मपाक्त । मास्मपाक्षं मास्मपाक्ष्व मास्मपाक्ष्म । मास्मपक्त मास्मपक्षातां मास्मपक्षत । मास्मपक्थाः मास्मपक्षाथां मास्मपग्ध्वं । मास्मपक्षि मास्मपक्ष्वहि मास्मपक्ष्महि । माभूत् । मैधिष्ट । मापाक्षीत् । मापक्त । इति अद्यतनी समाप्ता ।

परोक्षा ॥ ३०४ ॥ चिरातीते काले परोक्षा विभक्तिर्भवति । अक्ष्णां परः परोक्षं । सम्प्रति इन्द्रियाणामविषय इत्यर्थः । चण् परोक्षाचेक्रीयतसन्नन्तेषु द्विर्वचने सति ॥

भवतेरः ॥ ३०५ ॥ भवतेरभ्यासस्य अकारो भवति परोक्षायां । आगमादेशयोरागमो विधिर्बलवान् । गुणो न भवति । बभूव बभूवतुः बभूवुः । इडागमो सार्वधातुकस्यादिव्यञ्जनादेरिति व्यञ्जनादाविडागमः । बभूविथ बभूवथुः बभूव । बभूव बभूविव बभूविम ।

नाम्यादेर्गुरुमतोऽनृच्छः ॥ ३०६ ॥ ऋच्छ इति वर्जिता-न्नाम्यादेर्गुरुमतो धातोरेकस्वरादाम् भवति परोक्षायां ।

आमः कृञनुप्रयुज्यते ॥ ३०७ ॥ आमन्तस्य कृञनुप्रयुज्यते परोक्षायां । द्विर्वचनं ।

ऋवर्णस्याकारः ॥३०८॥ अभ्यास ऋवर्णस्याकारो भवति ।

सर्वत्रात्मने ॥ ३०९ ॥ सर्वेषां धातूनां गुणो न भवति परोक्षायामात्मनेपदे सर्वत्र । एधाञ्चक्रे एधाञ्चक्राते एधाञ्चक्रिरे ।

कृञोऽसुटः ॥ ३१० ॥ असुटः कृञः परोक्षायां थलि चानिड् भवति । एधाञ्चकृषे एधाञ्चक्राथे एधाञ्चकृढ्वे । एधाञ्चक्रे एधाञ्चकृवहे एधाञ्चकृमहे ।

असुभुवौ च परस्मै ॥३११॥ आमन्तस्यासुभुवावप्यनुप्रज्यते परस्मैपदे परे । परस्मैपदं चातिदिश्यते । एधामास एधामासतुः एधामासुः । एधामासिथ धामासथुः एधामास । एधामास एधामासिव एधामासिम । एधांबभूव एधांबभूवतुः एधांबभूवुः । अस्योपधायामित्यादिना दीर्घः । पपाच ।

परोक्षायां च ॥३१२॥ सर्वेषां धातूनां गुणो न भवति परोक्षायां परस्मैपदे द्वित्वबहुत्वयोः परतः ।

अस्यैकव्यञ्जनमध्येनादेशादेः परोक्षायाम्॥३१३॥ अनादेशादेर्धातोरेकव्यञ्जनमध्यगतस्यास्य एत्वं भवत्यभ्यासलोपश्च परोक्षायामगुणे । पेचतुः पेचुः ।

श्लोकः ।

नित्यात्वतां स्वरान्तानां सृजिदृशोश्च वेट् थलि ।
ऋचि नित्यानिटः स्युश्चेद्व्येञां नित्यमिट् थलि ॥

इत्येषामिट् वा भवति थलि परे ।

थलि च सेटि ॥ ३१४ ॥ अनादेशादेर्धातोरेकव्यञ्जनमध्यगतस्य अस्य एत्वं भवत्यभ्यासलोपश्च सेटि थलि परे । पेचिथ पपक्थ पेचथुः पेच ।

अट्युत्तमे वा ॥३१५॥ उपधाया अस्य दीर्घो भवति अन्त्यानां नामिनां च वृद्धिर्भवति वा परोक्षायामुत्तमपुरुषेऽटि परे । पपाच पपच ।

सृवृभृस्तुद्रुश्रुव एव परोक्षायाम् ॥३१६॥ एषामेव न इट् भवति परोक्षायामन्येषां भवत्येव । इति स्रादिनियमादिट् । पेचिव । पेचिम । पेचे पेचाते पेचिरे । पेचिषे पेचाथे पेचिध्वे । पेचे पेचिवहे पेचिमहे । अस्यैकव्यञ्जनमित्युपलक्षणम् । उपलक्षणम् किं । स्वस्य स्वसदृशस्य च ग्राहकमुपलक्षणम् । इत्याकारस्यानेकव्यञ्जनस्यापि क्वचित् । राध् साध् संसिद्धौ ।

राधो हिंसयाम् ॥३१७॥ हिंसार्थस्य राधेः एत्वं भवति अभ्यासलोपश्च परोक्षायामगुणे ॥ अपरराध अपरेधतुः अपरेधुः । इत्यादि । हिंसायामिति किं । आरराध आरराधतुः । इत्यादि ॥

राजिभ्राजिभ्रासिभ्लासीनां वा ॥ ३१८ ॥ एषां वा एत्वं भवति अभ्यासलोपश्च परोक्षायामगुणे । राजृ दीप्तौ । रराज रेजतुः रराजतुः रेजुः रराजुः । रेजिथ रराजिथ । "थलि च सेटि वा एत्वमभ्यासलोपश्च" । रेजथुः रराजथुः रेज रराज । रराज रेजिव रराजिव रेजिम रराजिम । रेजे रराजे रेजाते रराजाते रेजिरे रराजिरे । रेजिषे रराजिषे रेजाथे रराजाथे रेजिढ्वे रराजिढ्वे । रेजे रराजे रेजिवहे रराजिवहे रेजिमहे रराजिमहे । भ्रासृट् भ्राजृट् भ्लासृट् दीप्तौ । भ्रेजे बभ्राजे । भ्रेसे बभ्रासे । भ्लेसे बभ्लासे । कासृ भासृ दीप्तौ । चकासे चकासाते चकासिरे । चकासिषे चकासाथे चकासिध्वे । चकासे चकासिवहे चकासिमहे । एवं बभासे बभासाते बभासिरे । एकव्यञ्जनमध्यगतस्येति किं । ननन्द ननन्दतुः ननन्दुः । ननन्दिथ ननन्दथुः ननन्द । ननन्द ननन्दिव ननन्दिम ।

परोक्षायामिन्धिश्रन्थिग्रन्थिदम्भीनामगुणे ॥ ॥ ३१९ ॥ इन्धिश्रन्थिग्रन्थिदम्भीनामनुषङ्गलोपो भवति परो-

क्षायामगुणे । इत्यनेनानुषङ्गलोपः । इन्धि दीप्तौ । समीधे समीधाते समीधिरे ।

तॄफलभजत्रपश्रन्थिग्रन्थिदम्भीनां च ॥ ३२० ॥ एषामुपधाया अस्य एत्वं भवति अभ्यासलोपश्च परोक्षायामगुणे । सेट् थलि च । तॄ प्लवनतरणयोः । ततार ।

ऋदन्तानां च ॥३२१॥ ऋदन्तानां गुणो भवति परोक्षायामगुणे । तेरतुः तेरुः । तेरिथ तेरथुः तेर । ततार ततर तेरिव तेरिम । फल निष्पत्तौ । पफाल फेलतुः फेलुः । भजश्रीङ् सेवायां । बभाज भेजतुः भेजुः । त्रपुष् लज्जायां । त्रेपे त्रेपाते त्रेपिरे । श्रन्थ ग्रन्थ संदर्भे । शश्रन्थ श्रेथतुः श्रेथुः । निरनुषङ्गैः तॄप्रभृतिभिः साहचर्यादभ्यासलोपः । अकारस्य एत्वं च न स्यात् । शश्रन्थिथ । जग्रन्थ । ग्रेथतुः ग्रेथुः । जग्रन्थिथ । दम्भू दम्भे । ददम्भ देभतुः देभुः । ददम्भिथ । अन्यत्रानुषङ्गलोप इति किं । ननन्द ननन्दतुः ननन्दुः । ननन्दिथ सस्रंसे । बभ्रंसे । दध्वंसे ।

परोक्षायामभ्यासस्योभयेषाम् ॥ ३२२ ॥ उभयेषां ग्रहादिस्वप्यादीनामभ्यासस्यान्तस्थायाः सम्प्रसारणं भवति परोक्षायां गुण्यर्थोयं योगः । ग्रहीङ् उपादाने । जग्राह । ग्रहिज्यावयीत्यादिना संप्रसारणं । जगृहतुः जगृहुः । जग्रहिथ ।

आकारादट् औ ॥ ३२३ ॥ आकारात्परस्याट् और्भवति ।

सन्ध्यक्षरे च ॥३२४॥ धातोराकारस्य लोपो भवति सन्ध्यक्षरे च परे । ज्या वयोहानौ । जिज्यौ ॥

य इवर्णस्य ॥ ३२५ ॥ असंयोगात्पूर्वस्यानेकाक्षरस्य इवर्णस्य यो भवति । इति इवर्णस्य यकारः । जिज्यतुः जिज्युः ।

इटि च ॥३२६॥ धातोराकारस्य लोपो भवति इटि परे । जिज्यिथ जिज्यथुः जिज्य । जिज्यौ जिज्यिव जिज्यिम । वेञ तन्तुसन्ताने ।

वेञश्च वयिः ॥ ३२७ ॥ वेञो वा वयिर्भवति परोक्षायाम् । तत्र संप्रसारणं भवति । उवाय ऊयतुः ऊयुः । उवयिथ ऊयथुः ऊय । उवाय उवय ऊयिव ऊयिम । पक्षे संन्ध्यक्षरान्तानामाकारो विकरणे इत्याकारादेशः ।

न वाश्व्योरगुणे च ॥३२८॥ वाश्व्योरगुणे च गुणिनि संप्रसारणं न भवति परोक्षायां । ववौ ववतुः ववुः । वविथ ववाथ ववथुः वव । ववौ वविव वविम । व्यध ताडने । विव्याध विविधतुः विविधुः । विव्यधिथ विव्यद्ध । वश कान्तौ । उवाश ऊशतुः ऊशुः । उवशिथ उवष्ठ । व्यच व्याजीकरणे । विव्याच विविचतुः विविचुः । विव्यचिथ । प्रच्छ ज्ञीप्सायां ।

प्रच्छादीनां परोक्षायाम् ॥ ३२९ ॥ प्रच्छादीनां संप्रसारणं भवति परोक्षायां । पप्रच्छ पप्रच्छतुः पप्रच्छुः । पप्रच्छिथ पप्रष्ठ । ओव्रश्चू छेदने । वव्रश्च वव्रश्चतुः वव्रश्चुः । वव्रश्चिथ । इवर्णतवर्गलसा दन्त्या इतिन्यायात् सकारस्य दकारः । भ्रस्ज पाके । बभ्रज्ज बभ्रज्जतुः बभ्रज्जुः । बभ्रज्जिथ । स्कोः संयोगाद्योरन्ते च इति सकारलोपः । भृज्जादीनां ष इति षत्वं । बभ्रष्ठ । स्वपि वचि यजादीनां यण् परोक्षाशीष्षु । इति संप्रसारणं भवति । ञिष्वप् शये । सुष्वाप सुषुपतुः सुषुपुः । सुष्वपिथ सुष्वप्थ सुषुपथुः सुषुप । सुष्वाप सुष्वप सुषुपिव सुषुपिम । वच परिभाषणे । उवाच ऊचतुः ऊचुः । उवक्थ ।

श्लोकः ।

यजो वशो वहश्चैव वेञ्व्येञौ ह्वयतिस्तथा ।
वद्वसौ श्वयतिश्चैव स्मृता नव यजादयः ॥ १ ॥

यज देवपूजासंगतिकरणदानेषु । इयाज ईजतुः ईजुः । इयजिथ । भ्रज्जादीनां षः । इति षत्वं । इयष्ठ । ईजथुः ईज । इयाज इयज ईजिव ईजिम । ईजे ईजाते ईजिरे । ईजिषे ईजाथे ईजिध्वे ।

ईजे ईजिवहे ईजिमहे । टुवप् बीज सन्ताने । उवाप ऊपतुः ऊपुः । ऊपिथ उवप्थ ऊपथुः ऊप । ऊपे ऊपाते ऊपिरे । वहि प्रापणे । उवाह ऊहतुः ऊहुः । उवहिथ । सहिवहो रोदवर्णस्येति ओत्वं । उवोढ । ऊहे ऊहाते ऊहिरे ।

न व्ययतेः परोक्षायाम् ॥३३०॥ व्ययतेराकारो न भवति परोक्षायां गुणिनि । विवाय विव्यतुः विव्युः । विव्ययिथ विव्येथ विव्यथुः विव्य । विवाय विवय विव्यिव विव्यिम । विव्ये विव्याते । विव्यिरे । व्हेञ्—स्पर्धायां वाचि ।

अभ्यस्तस्य च ॥ ३३१ ॥ ह्वयतेरभ्यस्तमात्रस्य च संप्रसारणं भवति । जुहाव जुहुवतुः जुहुवुः । जुहुविथ जुहोथ । जुहुवे जुहुवाते जुहुविरे । वद व्यक्तायां वाचि । उवाद ऊदतुः ऊदुः । उवदिथ । ऊदे ऊदाते ऊदिरे । वस निवासे । उवास ऊषतुः ऊषुः । उवसिथ उवस्थ । ऊषे ऊषाते ऊषिरे । टुओश्वि गतिवृद्धयोः ।

श्वयतेर्वा ॥ ३३२ ॥ श्वयतेर्वा संप्रसारणं भवति परोक्षायां चेक्रीयते च । शुशाव शुशुवतुः शुशुवुः । शुशविथ शुशोथ शुशुवथुः शुशुव । शुशाव शुशव शुशुविव शुशुविम । शुशुवे शुशुवाते शुशुविरे । शिश्वाय शिश्वियतुः शिश्वियुः । शिश्वयिथ शिश्वेथ शिश्वियथुः शिश्विय । शिश्वाय शिश्वय । शिश्विये शिश्वियाते शिश्वियिरे । इति भ्वादिः ॥

वा परोक्षायाम् ॥३३३॥ अदेर्घस्लृ आदेशो भवति वा परोक्षायां । जघास । गमहनेत्यादिना उपधालोपो भवत्यगुणे । जक्षतुः जक्षुः । जघसिथ जघस्थ जक्षथुः जक्ष । जघास जघस जक्षिव जक्षिम । घस्लाभावे ।

अस्यादेः सर्वत्र ॥३३४॥ अभ्यासस्यादेरस्य दीर्घो भवति परोक्षायां सर्वत्र । आद आदतुः आदुः । आदिथ आत्थ आदथुः आद । आद आद्व आद्म । शीङ् स्वप्ने । शिश्ये शिश्याते शिश्यिरे ।

शिश्रियषे । उवाच ऊचतुः ऊचुः । ऊचे ऊचाते ऊचिरे । उष दाहे । विद ज्ञाने । जागृ निद्राक्षये ।

उषविदजागृभ्यो वा ॥ ३३५ ॥ उषादिभ्यो वा आम् भवति परोक्षायां । उषाञ्चकार उषाञ्चक्रतुः उषाञ्चक्रुः ।

आमि विदेरेव ॥ ३३६ ॥ आमि परे विदेरेव गुणो न भवति । विदाञ्चकार विदाञ्चक्रतुः विदाञ्चक्रुः । जागराञ्चकार जागराञ्चक्रतुः जागराञ्चक्रुः । आमभावे अभ्यासस्यासवर्णे इत्युवादेशः । उवोष ऊषतुः ऊषुः । विवेद विविदतुः विविदुः । जजागार ।

परोक्षायामगुणे ॥ ३३७ ॥ जागर्तेर्गुणो भवति परोक्षायामगुणे परे । जजागरतुः जजागरुः । इत्यदादिः ॥

भीह्रीभृहुवां तिवच्च ॥ ३३८ ॥ एषां वा आम् भवति परोक्षायां स च तिवद्भवति । इति तिवद्भावाद्द्विर्वचनं । जुहुवाञ्चकार जुहुवाञ्चक्रतुः जुहुवाञ्चक्रुः । जुहाव जुहुवतुः जुहुवुः । जुहविथ जुहोथ जुहुवथुः जुहुव । जुहाव जुहव जुहुविव जुहुविम । ञिभी भये । बिभयाञ्चकार बिभयाञ्चक्रतुः बिभयाञ्चक्रुः । बिभाय बिभ्यतु बिभ्युः । बिभयिथ बिभेथ । ह्री लज्जायां । जिह्रयाञ्चकार जिह्रयाञ्चक्रतुः जिह्रयाञ्चक्रुः । जिह्राय जिह्रियतुः जिह्रियुः । बिभराञ्चकार बिभराञ्चक्रतुः बिभराञ्चक्रुः । इत्यादि । जहे जहाते जहिरे । दधौ दधतुः दधुः । दधिथ दधाथ । दधे दधाते दधिरे । दधिषे दधाथे दधिध्वे । दधे दधिवहे दधिमहे । इति जुहोत्यादिः । दिदेव दिदिवतुः दिदिवुः । सुषुवे सुषुवाते सुषुविरे । ननाह नेहतुः नेहुः । नेहिथ ननद्ध नेहतुः नेह । ननाह नेहिव नेहिम । नेहे नेहाते नेहिरे । इति दिवादिः । सुषाव सुषुवतुः सुषुवुः । सुषविथ । सुषोथ ।

अस्यादेः सर्वत्र ॥ ३३९ ॥ अभ्यासस्य अकारस्य दीर्घो भवति परोक्षायां सर्वत्र ।

अश्नोतेश्च ॥ ३४० ॥ अश्नोतेस्तस्माद्दीर्घीभूतादभ्यासाका-

रात्परः परादौ नकारागमो भवति परोक्षायां । आनशे आनशाते आनशिरे । व्यानशे व्यानशाते व्यानशिरे । ऋच्छ गतीन्द्रियप्रलयमूर्त्तिभावेषु ।

ऋच्छत्यॄतः ॥ ३४१ ॥ ऋच्छधातोर्गुणो भवति परोक्षायां ।

तस्मान्नागमः परादिरन्तश्चेत्संयोगः ॥ ३४२ ॥ तस्माद्दीर्घीभूतादभ्यासस्याकारात्परः परादौ नकारागमो भवति धातोरन्तः संयोगश्चेत्परोक्षायां । आनर्छ आनर्छतुः आनर्छुः । अञ्जू व्यक्तिमर्षणकान्तिगतिषु । आनञ्ज आनञ्जतुः आनञ्जुः । आनञ्जिथ आनङ्क्थ आनञ्जथुः आनञ्ज । आनञ्ज आनञ्जिव आनञ्जिम । तस्मादिति किं । आछि आयामे । आञ्छ आञ्छतुः आञ्छुः । अयमस्यादेः सर्वत्र इति न कृतो दीर्घः । अन्तश्चेत्संयोग इति किं । आट आटतुः । ऋध वृद्धौ ।

ऋकारे च ॥ ३४३ ॥ तस्माद्दीर्घीभूतादभ्यासाकारात्परः परादौ नकारागमो भवति ऋकारे च परोक्षायां । आनृधे आनृधाते आनृधिरे ।

चेः किर्वा ॥ ३४४ ॥ चेः किर्वा भवति परोक्षायां । चिकाय चिक्यतुः चिक्युः । चिक्ये । चिचाय चिच्यतुः चिच्युः । चिच्ये चिच्याते चिच्यिरे । इति स्वादिः । तुतोद तुतुदतुः तुतुदुः । मृञ् प्राणत्यागे ।

आशीरद्यतन्योश्च ॥ ३४५ ॥ मृञ् आत्मनेपदी भवति चकारादनि च परे नान्यत्र । ममार मम्रतुः मम्रुः ।

थल्यृकारात् ॥ ३४६ ॥ ऋकारान्तात् थलि नेड् भवति । ममर्थ मम्रथुः मम्र । मुमोच मुमुचतुः मुमुचुः । मुमुचे मुमुचाते मुमुचिरे । इति तुदादिः ॥ रुरोध रुरुधतुः । बुभुजे बुभुजाते । युयोज । युयुजे । इति रुधादिः । ततान तेनतुः तेनुः । तेने तेनाते तेनिरे । मेने मेनाते मेनिरे । चकार चक्रतुः । चक्रे चक्राते ।

सुट् भूषणे सम्पर्युपात् ॥ ३४७ ॥ सम्पर्युपात्परस्य कृञ् आदौ सुट् भवति भूषणेऽर्थे द्विर्वचने ।

शिट्परोऽघोषः ॥३४८॥ अभ्यासस्य शिटः परोऽघोषोऽवशेष्यो भवति शिटो लोप इत्यर्थः । संचस्कार ।

ऋतश्च संयोगादेः ॥३४९॥ संयोगादेर्धातोः ऋतो गुणो भवति परोक्षायामगुणे । संचस्करतुः संचस्करुः । संचस्करिथ संचस्करथुः संचस्कर । परिचस्कार परिचस्करतुः । उपचस्कार उपचस्करतुः उपचस्करुः । उपचस्करे उपचस्कराते उपचस्करिरे । उपचस्करिषे उपचस्कराथे उपचस्करिध्वे । उपचस्करे उपचस्करिवहे उपचस्करिमहे । इति तनादिः । चिक्राय चिक्रियतुः चिक्रियुः । चिक्रियिथ चिक्रियथुः । चिक्रिये चिक्रियाते चिक्रियिरे । वव्रे वव्राते वव्रिरे ।

सृवृभृस्तुद्रुस्रुवएव परोक्षायाम् ॥३५०॥ एभ्यो धातुभ्यः परो नेट् भवति एव परोक्षायां । जग्राह जगृहतुः जगृहुः । जगृहे । इति क्र्यादिः ।

चकास्कास्प्रत्ययान्तेभ्य आम् परोक्षायाम् ३५१ एभ्य आम् भवति परोक्षायां च । चकासृ दीप्तौ । चकासाञ्चकार चकासाञ्चक्रतुः । चकासाञ्चक्रे चकासाञ्चक्राते चकासाञ्चक्रिरे । कासृ भासृ दीप्तौ । कासाञ्चक्रे । चोरयाञ्चकार । चोरयाञ्चक्रे । पालयामास पालयामासतुः । पालयाञ्चकार पालयाञ्चक्रतुः पालयाञ्चक्रुः । एवं पालयाञ्चक्रे पालयाञ्चक्राते पालयाञ्चक्रिरे । तन्त्रयाञ्चक्रे । वारयाञ्चकार । वारयाञ्चक्रे ।

दयायासश्च ॥ ३५२ ॥ एभ्य आम् भवति परोक्षायां । दय दानगतिहिंसादानेषु । दयाञ्चक्रे । अयाञ्चक्रे । आसाञ्चक्रे । इति परोक्षा समाप्ता ॥

भविष्यति भविष्यन्त्याशीः श्वस्तन्यः ॥ ३५३ ॥ भविष्यति काले भविष्यन्त्याशीः श्वस्तन्यो भवन्ति ।

तासां श्वसंज्ञाभिः कालविशेषः ॥ ३५४ ॥ तासां विभक्तीनां श्वसंज्ञाभिः कालस्य विशेषो भवति । श्वो भवः कालः श्वस्तनस्तत्र श्वस्तनी भवति । भविता भवितारौ भवितारः । भवितासि भवितास्थः भवितास्थ । भवितास्मि भवितास्वः भवितास्मः । एधिता एधितारौ एधितारः । एधितासे एधितासाथे एधिताध्वे । एधिताहे एधितास्वहे एधितास्महे । पक्ता । नन्दिता । स्रंसिता । भ्रंसिता । ध्वंसिता । शकि वकि कौटिल्ये । शङ्किता । वङ्किता । वदिङ् अभिवादनस्तुत्योः । वन्दिता वन्दितारौ वन्दितारः । वन्दितासे । वेञ् तन्तुसन्ताने । व्याता व्यातारौ व्यातारः । व्यातासे । इति भ्वादिः । अत्ता । शयिता वक्ता । इत्यदादिः । होता । धाता । भर्त्ता । इति जुहोत्यादिः । देविता । सेविता । नद्धा । इति दिवादिः । सोता । अशिता । चेता । इति स्वादिः । तोत्ता । मर्त्ता । मोक्ता । इति तुदादिः । रोद्धा । भोक्ता । योक्ता । इति रुधादिः । तनिता । मनिता । कर्त्ता । इति तनादिः । क्रेता । वरिता । ग्रहीता । इति क्र्यादिः । चोरयिता । तन्त्रयिता । वारयिता । इति चुरादिः । इति श्वस्तनी समाप्ता ॥

भविष्यति भविष्यन्तीत्यादिना भविष्यति काले आशीः । इष्टस्याशंसनमाशीः ।

आशिषि च परस्मै ॥३५५॥ सर्वेषां धातूनां गुणो न भवति आशिषि च सर्वत्र परस्मैपदे परे । भूयात् भूयास्तां भूयासुः । भूयाः भूयास्तं भूयास्त । भूयासं भूयास्व भूयास्म । विनिमये चागतिहिंसाशब्दार्थहस इति चुरादित्वादात्मनेपदं । व्यतिभविषीष्ट । एधिषीष्ट एधिषीयास्तां एधिषीरन् । एधिषीष्ठाः एधिषीयास्थां एधिषीध्वं । एधिषीय एधिषीवहि एधिषीमहि । पच्यात् । पक्षीष्ट । नद्यात् । स्रंसिषीष्ट । भ्रंसिषीष्ट । ध्वंसिषीष्ट । स्वपिवचियजादीनामिति संप्रसारणम् । नाम्यन्तानामिति दीर्घश्च । सुप्यात् । इज्यात् । व्येञ् संवरणे । उभयपदी । वीयात् वीयास्तां वीयासुः ।

व्यासीष्ट व्यासीयास्तां व्यासीरन्। चिञ् चयने। चीयात्। चेषीष्ट। वेञ् तन्तुसन्ताने। उभयपदी। ऊयात् ऊयास्तां ऊयासुः। वासीष्ट वासीयास्तां वासीरन्। ज्या वयोहानौ। पराजीयात्। व्यध ताडने। विध्यात्। अद्यात्। अशूञ् व्याप्तौ। अशिषीष्ट अशिषीयास्तां अशिषीरन्। ब्रूञ् व्यक्तायां वाचि।

***ब्रुवो वचिः॥३५६॥** ब्रुवो वचिर्भवत्यसार्वधातुकविषये। उच्यात्। वक्षीष्ट। इत्यादि। अध्यात्। शयिषीष्ट। हूयात्। हासीष्ट।

आशिष्येकारः॥ ३५७॥ दामादीनामेकारो भवत्याशिष्यगुणे। विधेयात्। विधासीष्ट विधासीयास्तां विधासीरन्। उभयपदी। धेयात्। देयात्। मेयात्। गेयात्। पेयात्। स्थेयात् स्थेयास्तां। अवसेयात् अवसेयास्तां। हेयात्। अगुण इति किं। धासीष्ट धासीयास्तां॥ दासीष्ट। दीव्यात्। सविषीष्ट। विकल्पेन। सोषीष्ट सोषीयास्तां। नह्यात्। नत्सीष्ट। षुञ् अभिषवे। सूयात्। अभिषूयात्। अभिषीष्ट। "वा संयोगादेरस्य इति वक्तव्यम्"॥ ज्या वयो हानौ। ज्येयात्। ज्यायात्। म्लै गात्रविनामे। म्लेयात् म्लायात्। ग्लै हर्षक्षये। ग्लेयात् ग्लायात्। टोश्वि गतिवृद्ध्योः। निश्वीयात्। निश्वेषीष्ट। इत्यादि। तुद्यात्। शद्लृ शातने। शत्सीष्ट। भृषीष्ट। मुच्यात्। मुक्षीष्ट। रुध्यात् रुत्सीष्ट। भुज्यात्। भुक्षीष्ट। युज्यात्। युक्षीष्ट। तन्यात् तनिषीष्ट। मनिषीष्ट। विक्रीयात्। विक्रीषीष्ट। गृह्यात्। ग्रहीषीष्ट। चोर्यात्। चोरयिषीष्ट। चोरयिषीयास्तां। पाल्यात्। पल शल पत्लृ पथे च गतौ। पाल रक्षणे च। उभयपदी। पालयिषीष्ट। अर्च पूजायां। अर्च्यात् अर्च्यास्तां अर्च्यासुः। अर्चयिषीष्ट अर्चयिषीयास्तां। तन्त्रयिषीष्ट। वार्यात्। वारयिषीष्ट। इत्याशीः समाप्ता॥ भविष्यति भविष्यन्तीत्यादिना भविष्यत्काले भविष्यन्ती विभक्तिर्भवति। भविष्यति भविष्यतः भविष्यन्ति। भविष्यसि भविष्यथः भविष्यथ। भविष्यामि भविष्यावः भविष्यामः। एधिष्यते एधिष्येते एधिष्यन्ते। एधिष्यसे ए-

ध्यिष्येथे एधिष्यध्वे । एधिष्ये एधिष्यावहे एधिष्यामहे । पक्ष्यति पक्ष्यते । नन्दिष्यते । स्रंसिष्यते । भ्रंसिष्यते । ध्वंसिष्यते । एवं शङ्किष्यते । वङ्किष्यते । वन्दिष्यते । वेञ् संवरणे । वास्यति । वास्यते । अत्स्यति । वक्ष्यति वक्ष्यते । ह्वोष्यते । ह्वोष्यति । धास्यति । धास्यते । दास्यति । दास्यते । देविष्यति । सेविष्यते । नत्स्यति । नत्स्यते । सोष्यति । अशिष्यते । अक्ष्यते । चेष्यति । चेष्यते । तोत्स्यति ।

हन्नृदन्तात्स्ये ॥ ३५८ ॥ हनः ऋदन्ताच्च इडागमो भवति स्यकारे परे । हनिष्यति । मोक्ष्यति । रोत्स्यति । रोत्स्यते । भोक्ष्यते । योक्ष्यते । तनिष्यते । मनिष्यति । मनिष्यते । करिष्यति । करिष्यते । क्रेष्यति । वरिष्यति वरिष्यते । ग्रहीष्यति ग्रहीष्यते । चोरयिष्यति चोरयिष्यते । तन्त्रयिष्यते । वारयिष्यते । एवं ज्ञातव्यं । इति भविष्यन्ती समाप्ता ॥ भूतकरणवत्यश्चेत्यतीते काले क्रियातिपत्तिः । क्रियाया अतिपतनं क्रियातिपत्तिः । अभविष्यत् अभविष्यतां अभविष्यन् । अभविष्यः अभविष्यतं अभविष्यत । अभविष्यं अभविष्याव अभविष्याम । ऐधिष्यत ऐधिष्येतां ऐधिष्यन्त । ऐधिष्यथाः ऐधिष्येथां ऐधिष्यध्वं । ऐधिष्ये ऐधिष्यावहि ऐधिष्यामहि । अपक्ष्यत् अपक्ष्यतां अपक्ष्यन् । अनन्दिष्यत् । अस्रंसिष्यत् । अभ्रंसिष्यत । अध्वंसिष्यत । अव्यास्यत् । अव्यास्यत । आत्स्यत् । अशायिष्यत । अवक्ष्यत् अवक्ष्यत । अह्वोस्यत् । अहास्यत् । अधास्यत् अधास्यत । अदेविष्यत् असविष्यत । विकल्पेन । असोष्यत असोष्येतां असोष्यन्त । अनत्स्यत् अनत्स्यत । असोष्यत् । अशिष्यत् । विकल्पेन । आक्ष्यत आक्ष्येतां आक्ष्यन्त । अचेष्यत् । अचेष्यत । अतोत्स्यत् । अमरिष्यम् । अमोक्षत् । अमोक्षत । अरोत्स्यत् । अभोक्ष्यत । अयोक्ष्यत् । अयोक्ष्यत । अतनिष्यत् । अमनिष्यत् । अकरिष्यत् । अवरिष्यत् । अवरीष्यत । अग्रहीष्यत् । अग्रहीष्यत । अचोरयिष्यत् । अचोरयिष्यत अचोरयिष्येतां । अतन्त्रयिष्यत । अ-

वारयिष्यत् । अवारयिष्यत । पल रक्षणे । उभ । अपालयिष्यत् । अपालयिष्यत । अर्च पूजायां । उभ । अर्चयिष्यत् अर्चयिष्यत अर्चयिष्येतां अर्चयिष्यन्त एवं सर्वमगवन्तव्यम् । इति क्रियातिपत्तिः ।

अथाद्यतन्याः क्वचिद्विशेष उच्यते ।

इजात्मने पदे: प्रथमैकवचने ॥३५९॥ पद्धातोरिज्भवति कर्त्तर्यद्यतन्यामात्मनेपदे प्रथमैकवचने परे ।

इचस्तलोपः ॥ ३६० ॥ इचः परस्तलोपो भवति उदपादि उदपत्सातां उदपत्सत । उदपत्थाः उदपत्साथां उदपद्ध्वं । उदपत्सि उदपत्स्वहि उदपत्स्महि । समपादि ।

दीपजनबुधपूरितायिप्यायिभ्यो वा ॥३६१॥ एभ्यो वा इज् भवति कर्त्तर्यद्यतन्यामात्मनेपदे प्रथमैकवचने परे । दीपी दीप्तौ । अदीपि अदीपिष्ट ।

जनिवध्योश्च ॥ ३६२ ॥ जनिवध्योरुपधाभूतस्य दीर्घस्य ह्रस्वो भवति इचि परे । जनी प्रादुर्भावे । अजनि अजनिष्ट । अवधि अवधिष्ट । बुध अवबोधने । अबोधि । अबुद्ध । हचतुर्थान्तस्य धातोस्तृतीयादेरादिचतुर्थत्वमकृतवत् । अभुत्सत् अभुत्साताम् अभुत्सत । पूरी आप्यायने । अपूरि । अपूरिष्ट । तायृ सन्तानपालनयोः । स्फायी ओप्यायी वृद्धौ । अतायि अतायिष्ट । अप्यायि अप्यायिष्ट । इति विशेषः । भावकर्मणोरद्यतन्यादयः प्रदर्श्यन्ते ।

भावकर्मणोश्च ॥ ३६३ ॥ सर्वस्माद्धातोरिज्भवति भावकर्मणोर्विहिते अद्यतन्यामात्मनेपदे प्रथमैकवचने परे । अभावि । कर्मणि अन्वभावि । ऐधि । अपाचि । अनन्दि । अस्तम्भि । अभ्रंसि । अध्वंसि ।

अयिरिच्यादन्तानाम् ॥३६४॥ आदन्तानां धातूनामायिर्भवतीचि परे ॥ अरायि । अव्यायि । अपायि । अरायि अदायि । ग्लै हर्षक्षये । अग्लायि । म्लै गात्रविनामे । अम्लायि । अगायि ।

अमायि । अस्थायि । अवासायि । अघासि । अशायि । अवाचि अह्वावि । अह्वायि । अदायि । अभारि । अदेवि । असावि । अनाहिं ।

उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतीनामडन्तरोपि ॥ ३६५ ॥ उपसर्गस्थनिमित्तात्परेषां साडन्तरोपि षत्वमापद्यते । अपिशब्दादनन्तरोपि ॥ अभ्यषावि । आशी । अचायि । अतोदि अमारि । अमोचि । अरोधि । अभोजि अयोजि । अतानि । अमानि । अकारि । अक्रायि । अवारि । अग्राहि । अचोरि । अपालि । अतन्त्रि । अमन्त्रि । अवारि । आर्चि । अद्यतनी समाप्ता ॥ बभूवे देवदत्तेन । एधाञ्चक्रे ॥ पेचे । इत्यादि ॥ इति परोक्षा ॥ भविता देवदत्तेन । एधिता । पक्ता । इति श्वस्तनी समाप्ता ॥ आशीः । भविषीष्ट देवदत्तेन । एधिषीष्ट । पक्षीष्ट । भविष्यन्ती । भविष्यते देवदत्तेन । एधिष्यते । पक्ष्यते । इत्यादि ॥ क्रियातिपत्तिः । अभविष्यत देवदत्तेन । ऐधिष्यत । अपक्ष्यत इत्यादि ॥

स्यसिजाशीःश्वस्तनीषु भावकर्मार्थासु स्वरहनग्रहदृशामिडिज्वद्वा ॥३६६॥ भावकर्मार्थासु स्यसिजाशीःश्वस्तनिषु परतः स्वरहनग्रहदृशामिट् इज्वद्भवति वा ॥ अन्वभावि अन्वभाविषातां अन्वभाविषत । अन्वभाविष्ठाः अन्वभाविषाथां अन्वभाविढ्वं ॥ अन्वभाविषि अन्वभाविष्वहि अन्वभाविष्महि । अन्वभवि अन्वभविषातां अन्वभविषत । असाविषातां असाविषत । असोषातां असोषत । असविषातां । असविषत ।

***ह्रस्य हन्तेर्घिरिनिचोः ॥३६७॥** हन्तेर्हस्य घिर्भवति इनिचोः परतः । अघानि अघानिषातां अघानिषत ॥

हनिमन्यतेर्नोत् ॥ ३६८ ॥ आभ्यां परमसार्वधातुकमनिड् भवति । अहसातां अहसत

आत्मनेपदे वा ॥३६९॥ अद्यतन्यामात्मनेपदे परे हन्तेर्वधिरादेशो वा भवति । अवधि अवधिषातां अवधिषत ।

नेज्वदिटः ॥३७०॥ इज्वदिटो दीर्घो न भवति । अग्राहिषातां अग्राहिषत । अग्रहीषातां अग्रहीषत । अदर्शि अदर्शिषातां अदर्शिषत । अदृक्षातां अदृक्षत । अदृष्ठाः अदृक्षाथां अदृड्ढ्वं ॥ श्वस्तनिः । भाविता भविता । साविता सविता । सोता । घानिता । हन्ता । ग्राहिता । ग्रहीता । दर्शिता । द्रष्टा ॥ आशिः । भाविषीष्ट । भविषीष्ट । साविषीष्ट । सविषीष्ट । सोषीष्ट ॥

हन्तेर्वधिराशिषि ॥ ३७१ ॥ हन्तेर्वधिरादेशो भवति आशिषि च परे । वाधिषीष्ट वधिषीष्ट । ग्राहिषीष्ट । ग्रहीषीष्ट । दर्शिषीष्ट । दृक्षीष्ट ॥ भविष्यन्ती । भाविष्यते भविष्यते । साविष्यते सविष्यते । चायिष्यते चेष्यते । घानिष्यते हनिष्यते । ग्राहिष्यते ग्रहीष्यते । दर्शिष्यते दक्ष्यते ॥ क्रियातिपत्त्यां । अभाविष्यत अभविष्यत । असाविष्यत असविष्यत असोष्यत । अचायिष्यत अचयिष्यत । अघानिष्यत । अहनिष्यत । अग्राहिष्यत अग्रहीष्यत । अदर्शिष्यत अदृक्षत । इत्यादि । एवं सर्वमुन्नेयं ।

अथ सनादिप्रत्ययान्ता धातवः प्रदर्श्यन्ते ॥

गुप्तिज्किद्भ्यः सन् ॥३७२॥ गुप् तिज् कित् एभ्यः परः सन् भवति स्वार्थे ।

गुपादेश्च ॥ ३७३ ॥ गुपादेः सनि परे नेड् भवति ।

स्मिङ्पूङ्रञ्ज्वशकॄगॄदृधृप्रच्छां सनि ॥ ३७४ ॥ एषां धातूनां सनि परे इडागमो भवति । इति स्मिङादिनियमाभावात् ।

सनि चानिटि ॥३७५॥ नामिन उपधाया गुणो न भवति अनिटि सनि परे । द्विर्वचनमभ्यासकार्यं च कार्यं ।

ते धातवः ॥ ३७६ ॥ ते सनादिप्रत्ययान्ताः शब्दाः धातुसंज्ञा भवन्ति ।

पूर्ववत्सनन्तात् ॥ ३७७ ॥ सनन्ताद्धातोः पूर्ववत्पदं भव-

ति ॥ गुप् गोपनकुत्सनयोः । जुगुप्सते मां जुगुप्सेते जुगुप्सन्ते । जुगुप्सेत जुगुप्सतां अजुगुप्सत ।

अस्य च लोपः ॥३७८॥ धातोरस्य लोपो भवत्यनपि प्रत्यये परे । अजुगुप्सिष्ट । जुगुप्साञ्चक्रे । जुगुप्सिता । जुगुप्सिषीष्ट । जुगुप्सिष्यते । अजुगुप्सिष्यत ॥ तिज निशाने क्षमायाञ्च । तितिक्षते ॥ कित निवासे रोगापनयने च । विचिकित्सति । अकारोच्चारणं किं । स्वरादेर्द्वितीयस्येति सन एव द्विर्वचनार्थं । तेन प्रतीषिषति ।

मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य ॥ ३७९ ॥ मानादिभ्यो धातुभ्यः परः सन् भवति तेषां धातूनामभ्यासस्य दीर्घो भवति स्वार्थे ॥ मान पूजायां । मीमांसते । बध बन्धने । बीभत्सते । दान खण्डने । दीदांसते । शान तेजने । शीशांसति । शीशांसते ।

श्लोकः ।

गुपो बधेश्च निन्दायां क्षमायां च तथा तिजः ॥
संशये च प्रतीकारे कितः सन्नभिधीयते ॥ १ ॥
जिज्ञासावज्ञयोरेव मानदानो विधीयते ॥
निशानेर्थे तथाशानो नायमर्थान्तरे क्वचित् ॥ २ ॥

धातोर्वा तुमन्तादिच्छतिनैककर्तृकात् ॥ ३८० ॥ तुमन्तादिच्छतिना सह एककर्तृकाद्धातोः परः सन् वा भवति ।

उवर्णान्ताच्च ॥ ३८१ ॥ उवर्णान्ताद्धातोर्नेट् भवति सनि परे । भवितुमिच्छति । बुभूषति । एदिधिषते । पिपक्षति । पिपक्षते । निनन्दिषति । सिस्रंसिषते । बिभ्रंशिषते । दिध्वंसिषते । विवासति । विवासते । विव्यासति । विव्यासते ।

जेर्गिः सन्परोक्षयोः ॥ ३८२ ॥ जयतेर्गिर्भवति सन्परोक्षयोः परतः ।

स्वरान्तानां सनि ॥ ३८३ ॥ स्वरान्तानां धातूनां दीर्घो भवति सनि परे ।

नाम्यन्तानामनिटाम् ॥ ३८४ ॥ नाम्यन्तानां धातूनामनिटां सनि गुणो न भवति । विजिगीषते । परोक्षायां । जिगाय जिग्यतुः जिग्युः । विजिग्ये विजिग्याते विजिग्यिरे ॥ चिचीषति । निनीषति । तुष्टूषति । अदेर्घस्लृसनद्यतन्योः ।

वसतिघसेः सात् ॥ ३८५ ॥ आभ्यां परमसार्वधातुकमनिट् भवति ।

सस्य से सार्वधातुके तः ॥ ३८६ ॥ सस्य तकारो भवति असार्वधातुके सकारे परे । जिघत्सति । वस निवासे । विवत्सति । शिशयिषते । विवक्षति । विवक्षते । जुहूषति जिहासते ।

सनि मिमीमादारभलभशकपतपदामिस् स्वरस्य ॥ ३८७ ॥ मिआदीनां स्वरस्य इसादेशो भवति अभ्यासलोपश्च सनि परे । डुमिञ् प्रक्षेपणे । मातुमिच्छति मित्सति मित्सते ॥ मीङ् श्लेषणे । मातुमिच्छति । मित्सते । मा इति मेङ् माङोरपि ग्रहणं । मातुमिच्छति मित्सते । धित्सति धित्सते । दित्सति दित्सते । रभ राभस्ये । आरिप्सते । डुलभष् प्राप्तौ । आलिप्सते । शक्लृ शक्तौ । शक्तुमिच्छति शिक्षति । पल शल पत्लृ गतौ । पित्सति । पद गतौ । पित्सते ।

इवन्तर्धभ्रस्जदम्भुश्रियूर्णुभरज्ञपिसनितनिपतिदरिद्रां वा ॥ ३८८ ॥ एषां वा इट् भवति सनि परे । देवितुमिच्छति सन् दिदेविषति ॥ ऋध वृद्धौ । अर्द्धितुमिच्छति सन् अर्दिधिषति । भ्रस्ज पाके ॥ बिभ्रज्जिषति । बिभ्रक्षति । दम्भु दम्भे । दिदम्भिषति । भज श्रिङ् सेवायां । शिश्रयिषति । शिश्रीषति । यु मिश्रणे ।

अवर्णस्य जान्तस्थापवर्गपरस्यावर्णे ॥ ३८९ ॥ जान्तस्थापवर्गपरस्याभ्यासोवर्णस्य इत्वं भवत्यवर्णे परे सनि । यियविषति । युयूषति । जु इति सौत्रोऽयं धातुः । जिजावयिषति ॥ टुक्षुरु कुशब्दे । रिरावयिषति । लिलावयिषति । लुनाति कश्चित्तमन्यः प्रयुङ्-

स्के । धातोश्च हेताविन् । पिपावयिषति । पिपविषति । बिभावयिषति । बिभविषति । ऊर्णुञ् आच्छादने । प्रोर्णवितुमिच्छति सन् प्रोर्णुनविषति ॥ बिभरिषति । ज्ञपि । जिज्ञपयिषति ज्ञीप्सति । षणु दाने ॥

स्तौतीनन्तयोरेव सनि ॥ ३९० ॥ निमित्तात् परः स्तौतीनन्तयोरेव सनि षत्वभूते सनि परे । इति नियमान्न षत्वम् । सिसनिषति सिसाति ॥ दरिद्रा दुर्गतौ ।

दरिद्रातेरसार्वधातुके ॥ ३९१ ॥ दरिद्रातेरन्तस्य लोपो भवत्यसार्वधतुके सनि परे ॥ दिदरिद्रिषति । अत्र इटि च आकारलोपः ।

छ्वोः शूठौ पञ्चमे च ॥ ३९२ ॥ छकारवकारयोर्यथासंख्यं शुऊठ् इत्येतौ भवतः क्वौ धुट्यगुणे प्रत्यये पञ्चमे परे । दुद्यूषति ।

*** ऋधिज्ञपोरीरीतौ ॥३९३॥** ऋधिज्ञपोरीरीतौ भवतोऽभ्यासलोपश्च सनि परे । ज्ञीप्सति । ईर्त्सति ।

भृजादीनां षः ॥ ३९४ ॥ भृजादीनां धातूनामन्तः षो भवति धुट्यन्ते च । इति जकारस्य षकारः । बिभृक्षति ।

दम्भेस्सनि ॥३९५॥ दंभेरनुषङ्गो लोपो भवत्यनिटि सनि परे । तृतीयादेर्घढधभान्तस्येत्यादिना धत्वं ॥

दम्भेरिच्च ॥ ३९६ ॥ दम्भे स्वरस्य इत् ईच्च भवति अभ्यासलोपश्च सनि परे । धिप्सति । धीप्सति । शिश्रीषति । युयूषति ।

उरोष्ठ्योपधस्य च ॥३९७॥ उरोष्ठ्योपधस्य ऋदन्तस्य उर् भवति अगुणे प्रत्यये परे । नामिनोर्वोरकुर्च्छुर्व्यञ्जने इत्युपधाया दीर्घो भवति । बुभूर्षति ।

पञ्चमोपधाया धुटि चागुणे ॥ ३९८ ॥ पञ्चमस्योपधाया दीर्घो भवति क्वौ धुट्यगुणे प्रत्यये परे ।

वनतितनोत्यादिप्रतिषिद्धेटां धुटि पञ्चमोऽघातः ॥ ३९९ ॥ वनतेस्तनोत्यादेः प्रतिषिद्धेटां च धातूनां पञ्चमो लोप्यो

भवति आतश्च अद्भवति यथासंभवकौ धुट्यगुणे पञ्चमे प्रत्यये परतः अनद्यतने धुटि परे । धुटि खनिसनिजनां पञ्चमस्याकार इति नकार-स्थाने आकारादेशः । षणु दाने । सिषासति । पिपतिषति । पिपत्सति । पतितुमिच्छति ।

तनोतेरनिटि वा ॥ ४०० ॥ तनोतेरुपधाया दीर्घो भवति अनिटि सनि परे । तितांसति । तितंसति । तितनिषति । दरिद्राते रसार्वधातुक इत्यन्तलोपे प्राप्ते ।

अनिटि सनि ॥ ४०१ ॥ अनिटि सनि परे दरिद्रातेरन्त्य-स्य लोपो न । दरिद्रासति । दरिद्रिषति ।

*** स्तौतीनन्तयोरेव षणि॥४०२॥** निमित्तात्परः प्रत्यय-विकारागमस्थः स्तौतीनन्तयोरेव सः षमापद्यते षत्वभूते सनि परे । तुष्टूषति । सिषेवयिषति । इति नियमात् सुसूषति । निनत्सति । निनत्सते । " स्मिङ्पूङ्रञ्ज्वशकॄगृदृधृप्रच्छांसनि " स्मिङ् ईषद्धसने । सिस्मयिषते । पूङ् पिपविषते ।

पूञस्तु न स्यात् ॥३४३॥ पूञ् धातोः पर इट् न स्यात् । पूञ् पवने । पवितुमिच्छति पुपूषति । ऋ अरिरिषति । अञ्ज अञ्जिजिषति । अशू- अशिशिषति । चिकरिषति । गॄ निगरणे जिगरिषति । जिगलिषति । दृञ् अनादरे । दिदरिषति । धृञ् अनवस्थाने दिधरिषति ।

ग्रहिस्वपिप्रच्छां सनि ॥४०४॥ एषां सम्प्रसारणं भवति सनि परे । पिपृच्छिषति । सुषुप्सति ।

चेः किर्वा ॥ ४०५ ॥ चेः किर्भवति वा परोक्षायां सनि च परे । चिकीषति । चिकीषते । तुतुत्सति । मुमूर्षति । मुमूर्षते । मुमुक्षति । मुमुक्षते । रुरुत्सति । बुभुक्षते । युयुक्षति । युयुक्षते ।

ऋदन्तस्येरगुणे ॥४०६॥ ऋदन्तस्य इर् भवति अगुणे परे । चिकीर्षति । चिकीर्षते । चिक्रीषति । चिक्रीषते ।

वृङ्वृञोश्च ॥ ४०७ ॥ वृङ्वृञोश्च ऋकारस्य उर् भवत्यगुणे परे । वुवूर्षते । विवरिषते ।

ग्रहिगुहोः सनि ॥ ४०८ ॥ ग्रहिगुहोः सनि नेट् भवति । जिघृक्षति । जिघृक्षते । गुहू संवरणे । जुघुक्षति । चोरयितु मिच्छति सन् । चुचोरयिषति । तन्त्रयितुमिच्छति सन् । तितन्त्रयिषति । विवारयिषति । विवारयिषते । इत्यादि । एवं सर्वमुन्नेयं । इति सनन्तः समाप्तः ।

धातोर्यशब्दश्चेक्रीयितं क्रियासमभिहारे ॥४०९॥ क्रियासमभिहारे वर्त्तमानाद्धातोर्व्यञ्जनादेर्यशब्दग्रहणाधिक्याच्चेक्रीयितसंज्ञको यो भवति क्रियासमभिहारे । शुभरुचादिवर्जितादेकस्वरात्परो यशब्दो भवति क्रियासमभिहारः पौनःपुन्यं भृशार्थो वा । भृशं भवति पुनः पुनर्वा भवति ।

गुणश्चेक्रीयिते ॥ ४१० ॥ अभ्यासस्य गुणो भवति चेक्रीयिते प्रत्यये परे ।

चेक्रियितान्तात् ॥ ४११ ॥ चेक्रीयितान्ताद्धातोः कर्त्तर्यात्मनेपदं भवति । बोभूयते । बोभूयेत । बोभूयतां । अबोभूयत । अस्य च इति लोपः । अबोभूयिष्ट । बोभूयाञ्चक्रे । बोभूयिता । बोभूयिषीष्ट । अबोभूयिष्ट । अबोभूयिष्यत ।

दीर्घोऽनागमस्य ॥ ४१२ ॥ अनागमस्याभ्यासस्य दीर्घो भवति चेक्रीयिते प्रत्यये परे । पापच्यते । पापच्येत । पापच्यतां । अपापच्यत ।

यस्याननि ॥ ४१३ ॥ व्यञ्जनात्परस्य यस्य लोपो भवति । अननि प्रत्यये परे । अपापचिष्ट ।

गत्यर्थात्कौटिल्ये च ॥ ४१४ ॥ गत्यर्थाद्धातोः कौटिल्येऽर्थे चेक्रीयितसंज्ञको यो भवति ।

अतोन्तोऽनुस्वारोऽनुनासिकान्तस्य ॥४१५॥ अनु-

नासिकान्तस्य धातोरभ्यासस्यान्ते अनुस्वारागमो भवति चेक्रीयिते परे । चंक्रम्यते । कुटिल इति किम् । भृशं पुनः पुनर्वा क्रामति ।

वञ्चिस्रंसिध्वंसिभ्रंसिकसिपतिपदिस्कन्दामन्तोनी ॥ ४१६ ॥ एषामभ्यासस्यान्तो नी आगमो भवति चेक्रीयिते प्रत्यये परे । वनीवच्यते । अनिदनुबन्धानामगुणेऽनुषङ्गलोपः । अत्यर्थं स्रंसते । सनीस्रस्यते । दनीध्वस्यते । बनीभ्रस्यते । कस गतौ । कसि गतिशासनयोः । अत्यर्थं कसति चनीकस्यते । पनीपत्यते । पनीपद्यते । स्कन्दिर् गतिशोषणयोः । चनीस्कद्यते ।

घ्राध्मोरी ॥ ४१७॥ घ्राध्मोरित्येतयोराकारस्य ईकारो भवति चेक्रीयिते प्रत्यये परे । जेघ्रीयते देध्मीयते । "हन्तेर्घ्री वा वक्तव्यं" हन्तेर्घ्री वा भवति चेक्रीयिते प्रत्यये परे । अत्यर्थं हन्ति जेघ्रीयते

अभ्यासाच्च ॥ ४१८ ॥ अभ्यासात्परस्य हन्तेर्हस्य घो भवति ।

अतोन्तोऽनुस्वारोऽनुनासिकान्तस्य ॥ ४१९ ॥ धातोरभ्यासस्य अतः अकारस्यान्तोऽनुस्वारागमो भवति चेक्रीयिते परे । जंघन्यते ।

ये वा ॥ ४२० ॥ यकारादावगुणे प्रत्यये परे खनिसनिजनामन्तस्य आकारो भवति वा । खनु अवदारणे । चंखन्यते । चाखायते । षणु दाने । संसन्यते । सासायते । जंजन्यते । जाजायते ।

स्वपिस्यमिव्येञां चेक्रीयिते ॥ ४२१ ॥ एषां धातूनां सम्प्रसारणं भवति चेक्रीयिते परे । ञिष्वप् शये सोषुप्यते । स्यम स्वन ध्वन शब्दे । सेसिम्यते । व्येञ् संवरणे । अत्यर्थं व्ययति वेवीयते ।

अर्त्त्यश्नात्यूर्णुसूचिसूत्रिमूत्रिभ्यश्च ॥ ४२२ ॥ एभ्यः परश्चेक्रीयितसंज्ञकः प्रत्ययो भवति ।

चेक्रीयिते च ॥ ४२३ ॥ अर्त्तिसंयोगाद्योश्च गुणो भवति

चक्रीयिते परे । अकारस्य रेफस्य द्विरुक्तिर्भवति यकारेऽपि । अरार्यते । स्मृध्यै चिन्तायां सास्मर्यते । अट गतौ अटाट्यते । अशू भोजने अशाश्यते । प्रणोनूयते । सूच पैशून्ये । सोसूच्यते । सूत्र अवमोचने । सोसूत्र्यते । मूत्र प्रस्रवणे । मोमूत्र्यते ।

अर्यीर्ये ॥ ४२४ ॥ शिङो अयि भवति यकारे परे । शाशय्यते । वावच्यते । जोहूयते । जाहीयते । देदीयते । देधीयते । मेमीयते । जेगीयते । पेपीयते । तेष्ठीयते । अवसेषीयते । जेहीयते । देदीव्यते सोषूयते । नानह्यते । अभिषोषूयते । अशाश्यते । चेचीयते । चायृ पूजानिशामनयोः ।

चायः किः चेक्रीयिते ॥ ४२५ ॥ चायः किर्भवति चेक्रीयिते परे । अत्यर्थं चायति चेकीयते । अत्यर्थं तुदति तोतुद्यते ।

ऋत ईदन्तश्चिवचेक्रीयितयिन्नायिषु ॥ ४२६ ॥ ऋदन्तस्य च्विचेक्रीयितयिनूआयिषु परत ईदन्तो भवति ॥ मेम्रीयते । मोमुच्यते । रोरुध्यते । बोभुज्यते । योयुज्यते । तंतन्यते । मंमन्यते । चिक्रीयते ।

जपादीनां च ॥ ४२७ ॥ जपादीनामभ्यासस्यान्तोऽनुस्वारागमो भवति चेक्रीयिते परे । जपजभदहदंशभञ्जपशाषडेते जपादयः । जप मानसे च । भृशं पुनः पुनर्वा गर्हितं जपति जञ्जप्यते । जभजृभी गात्रविनामे । भृशं पुनः पुनर्वा जभति जञ्जभ्यते । दहू भस्मीकरणे । दंदह्यते । दंश दशने । दंदश्यते । भञ्जो अवमर्दने भृशं भनक्ति बम्भज्यते । पश इति सौत्रो धातुः भृशं पशति । पंपश्यते ।

चरफलोरुच परस्यास्य ॥ ४२८ ॥ चरफलोरभ्यासस्यान्तोऽनुस्वारागमः परस्यास्योच्च भवति चेक्रीयिते परे । अभ्र वभ्र मभ्र-चर विधिगत्यर्थाः । भृशं पुनःपुनर्वा गर्हितं चरति चञ्चूर्यते । पंफुल्यते । वेभ्रीयते ।

ऋमतो रीः ॥ ४२९ ॥ ऋमतो धातोरभ्यासस्यान्तो री

आगमो भवति चेक्रीयिते परे । ग्रहीङ् उपादाने-गृहिज्या इत्यादिना संप्रसारणम् । भृशं पुनः पुनर्वा गर्हितं गृह्णाति जरीगृह्यते । नृती गात्रविक्षेपे ।

नृतेश्चेक्रीयिते ॥ ४३० ॥ नृतेर्नकारस्य णकारो न भवति चेक्रीयिते परे । नरीनृत्यते । परीपृच्छ्यते । चोचूर्यते । एवं सर्वं वेदितव्यं ।

तस्य लुग्वा ॥ ४३१ ॥ तस्य चेक्रीयितस्य लुग्वा भवति यस्य स्थाने यो विधीयते स स्थानीतरादेशः स्थानिवद्भवत्यादेशः । प्रकृतिग्रहणे चेक्रीयितलुगन्तस्यापि ग्रहणं । धातुप्रकृतीनां ग्रहणे चेक्रीयितलुगन्तस्यापि धातोर्ग्रहणं भवतीति द्विर्वचनादि कार्यं भवति ॥ चर्करीतं परस्मैपदमदादौ दृश्यते ।

चर्करीताद्वा ॥ ४३२ ॥ चर्करीताद्धातोर्वा ईड् भवति व्यञ्जनादौ गुणिनि सार्वधातुके परे ।

यिलोपे च चेक्रीयितः ॥४३३॥ यिलोपे आयिलोपे च परस्मैपदं भवति । अत्यर्थं भवति बोभवीति बोभोति बोभूतः । स्वरादाविवर्णोवर्णान्तस्य धातोरियुवौ । बोभुवति । बोभूयात् बोभूयातां बोभूयुः ॥ बोभवीतु बोभोतु बोभूतात् बोभूतां बोभुवतु ।बोभूहि बोभूतात् बोभूतं बोभूत । अबोभवीत् अबोभोत् अबोभूतां अबोभुवुः । पापचीति पापक्ति पापक्तः पापचति । पापच्यात् ॥ पापक्तु पापक्तात् पापक्तां पापचतु । हुधुड्भ्यां हेर्द्धिः ॥ पापग्धि पापक्तात् पापक्तं पापक्त । अपापचीत् अपापक् अपापक्तां अपापचुः ॥ टुणदि समृद्धौ । नानंदीति नानंत्ति नानंत्तः नानंदति । ध्वंसु गतौ च । दनीध्वसीति दनीध्वस्ति दनीध्वस्तः दनीध्वसति । एवं सर्वमवगन्तव्यं ॥ शेशयीति ॥

न तिबनुबन्धगणसंख्यैकस्वरोक्तेषु ॥४३४॥ तिबनुबन्धगणसंख्यैकस्वर एभिरुक्तेषु निदानेषु प्रकृतिग्रहणे चेक्रीयितलुगन्तस्य ग्रहणं न भवति ॥ तिपा उक्ते ॥ सोषवीति सोषोति । सोषूयात् । सोषवीतु

सोषोतु सोषूतात् सोषूतां सोषुवतु । सोषूहि सोषूतात् सोषूतं सोषूत । सोषवाणि सोषवाव सोषवाम ॥ तिपानिर्देशात् सूतेः पञ्चम्यामिति गुणप्रतिषेधो न स्यात् । अनुबन्धोक्तेः। शेशितः शेश्यति-शिङः सार्वधातुके इति ङानुबन्ध इति निर्देशात् गुणो न भवति ॥ गुणोक्तेः ॥ चोकोटीति । कुटादेरनिनिचट्स्विति गुणप्रतिषेधो न स्यात् । संख्योक्तेः । रोरुदीति । रोरोत्ति । रुदादिः पञ्चको गण इति रुदादेः सार्वधातुके इतीण् न स्यात् । एकस्वरोक्तेः ॥ पापचीति । अनिडेकस्वरादात इत्येकस्वराधिकारे पचिवचीत्यादिनेट्प्रतिषेधो न स्यात् ॥ वावचीति । वावक्ति वावक्तः वावचति । जाहेति । दादेति दात्तः दादति ।

अभ्यस्तस्य चोपधाया नामिनः स्वरे गुणिनि सार्वधातुके ॥ ४३५ ॥ अभ्यस्तस्य चोपधाया नामिनो गुणो न भवति स्वरादौ गुणिनि सार्वधातुके परे । अत्यर्थं पुनः पुनर्वा दीव्यति देदिवीति ।

य्वोर्व्यञ्जने ये ॥ ४३६ ॥ धातोर्यकारवकारयोर्लोपो भवति यकारवर्जिते व्यञ्जने च परे । देदेति देद्यूतः देदिवति ॥ सोषवीति सोषोति । नानहीति नानद्धि । अभिषोषवीति अभिषोषोति । पुनः पुनर्वा क्रीणाति चेक्रयीति चेक्रेति । तोतोदीति तोतोत्ति ।

रिरोरीच्लुकि ॥ ४३७ ॥ ऋमतो धातोरभ्यासस्यान्ते रिरोरीच् भवति चेक्रीयितस्य लुकि । मरिमरीति मर्मरीति मरीमरीति । मरिमर्त्ति मर्मर्त्ति मरीमर्त्ति । मर्मृतः मरीमृतः मरिमृतः । मर्म्रति मरीम्रति मरिम्रति । मरीमरीषि मर्मरीषि मरिमरीषि । मरिमर्षि मर्मर्षि मरीमर्षि । मरीमृथः मर्मृथः मरिमृथः । मरीमृथ मर्मृथ मरिमृथ । मरीमरीमि मर्मरीमि मरिमरीमि । मरिमर्मि मर्मर्मि मरीमर्मि । मरिमृवः मर्मृवः मरीमृवः । मरिमृमः मर्मृमः मरीमृमः । मरिमृयात् मर्मृयात् मरीमृयात् । मरिमरीतु मर्मरीतु मरीमरीतु । मरीमर्तु मर्मर्तु मरिमर्तु । मरिमृतात् मर्मृतात् मरीमृतात् । मरिमृतां मर्मृतां मरीमृतां । मरिम्रतु

मर्म्रेतु मरीम्रतु । मरिमृहि मर्मृहि मरीमृहि । मरिमृतात् मर्मृतात् मरीमृतात् । मरिमृतं मर्मृतं मरीमृतं । मरिमृत मर्मृत मरीमृत । मरिमराणि मर्मराणि मरीमराणि । मरिमराव मर्मराव मरीमराव । मरिमराम मर्मराम मरीमराम । अमरिमरीत् अमर्मरीत् अमरीमरीत् । अमरिमः अमर्मः अमरीमः । अमरिमृतां अमर्मृतां अमरीमृतां । अमरिमरुः अमर्मरुः अमरीमरुः । अमरीमरीः अमर्मरीः अमरीमरीः । अमरिमृतं अमर्मृतं अमरीमृतं ॥ अमरिमृत अमर्मृत अमरीमृत । अमरीमरं अमर्मरं अमरिमरं । अमरिमृव अमर्मृव अमरीमृव ॥ अमरिमृम अमर्मृम अमरीमृम । एवमभ्यस्तस्य चोपधाया इत्यादिना गुणो न भवति ॥ नृति गात्रविक्षेपणे ।

***नृतेश्चेक्रियिते ॥४३८॥** नृतेर्नकारस्य णकारो न भवति चेक्रियितेपरे ॥ नरिनृतीति नर्नृतीति नरीनृतीति । नरिनर्त्ति नर्नर्त्ति नरीनर्त्ति । नरिनृतः नर्नृतः नरीनृतः । नर्नृतति नरीनृतति नरिनृतति ॥ मोमुचीति मोमोक्ति मोमुक्तः मोमुचति । रोरुधीति रोरोद्धि रोरुद्धः रोरुधति ॥ बोभुजीति बोभोक्ति बोभुक्तः बोभुजति । योयुजीति योयोक्ति योयुक्तः योयुजति ॥ तंतनीति तंतंति तंततः तंतनति । मंमनीति मंमंति मंमतः मंमनति ॥ जंजपीति जंजप्ति जंजप्तः जंजपति । चरिकरीति चर्करीति चरीकरीति । चरिकर्त्ति चर्कर्त्ति चरीकर्त्ति । चरिकृतः चर्कृतः चरीकृतः । चरिक्रति चर्क्रति चरीक्रति । चेक्रयीति चेक्रेति चेक्रीतः चेक्रियति । वरिवरीति वर्वरीति वरीवरीति । वरिवर्त्ति वर्वर्त्ति वरीवर्त्ति । वरिवृतः वर्वृतः वरीवृतः । वरिव्रति वर्व्रति वरीव्रति । जरीगृहीति जर्गृहीति जरीगृहीति । जरिगर्ढि जर्गर्ढि जरीगर्ढि ।

न ऋतः ॥४३९॥ ढे ढलोपे ऋमतोर्धातोर्दीर्घो न भवति । जरिगृढः जर्गृढः जरीगृढः । जरिगृहति जर्गृहति जरीगृहति । जरिगृहीषि जर्गृहीषि जरीगृहीषि । जरिघर्क्षि जर्घर्क्षि जरीघर्क्षि । जरिगृढः

जर्गृढः जरीगृढः । जरिगृढ जर्गृढ जरीगृढ । जरिगृहीमि जर्ग्गृहीमि जरीगृहीमि । जरिगर्ह्मि जर्गर्ह्मि जरीगर्ह्मि । जरिगृह्वः जर्गृह्वः जरिगृह्वः । जरिगृह्मः जर्गृह्मः जरीगृह्मः ।। जरिगृह्यात् जर्गृह्यात् जरीगृह्यात् । जरीगृहीतु जर्ग्गृहीतु जरिगृहीतु । जरिगर्ढु जर्गढु जरीगर्ढु । जरिगृढात् जर्ग्गृढात् जरीगृढात् । जरिगृढां जर्ग्गृढां जरीगृढां । जरिगृहतु जर्ग्गृहतु जरीगृहतु । जरीगृढि जर्ग्गृढि जरीगृढि । जरिगृढात् जर्ग्गृढात् जरीगृढात् । जरिगृढं जर्ग्गृढं जरीगृढं । जर्ग्गृढ जरिगृढ जरीगृढ । जरिगृहाणि जर्गृहाणि जरीगृहाणि । जरिगृहाव जर्ग्गृहाव जरीगृहाव । जरीगृहाम जर्ग्गृहाम जरिगृहाम । अजरीगृहीत् अजर्ग्गृहीत् अजरिगृहीत् । अजरिगृढां अजर्ग्गृढां अजरीगृढां । अजरीगृहुः अजर्ग्गृहुः अजरिगृहुः । अजरीगृहीः अजर्गृहीः अजरिगृहीः ।

न रात् ॥४४०॥ रेफात्परः संयोगान्तो लोप्यो न भवति । अजरिघर्ट् अजर्घर्ट् अजरीघर्ट् । अजरिगृढं अजर्गृढं अजरीगृढं । अजरिगृढ अजर्ग्गृढ अजरीगृढ । अजरीगृहं अजर्गृहं अजरिगृहं । अजर्ग्गृह्व अजरिगृह्व अजरीगृह्व । अजर्ग्गृह्म अजरीगृह्म अजरिगृह्म । इति चेक्रियितान्ताः ।

इन्कारितं धात्वर्थे ॥ ४४१ ॥ नाम्नः कारितसंज्ञकः इन्भवति धात्वर्थे ।

इनि लिङ्गस्यानेकाक्षरस्यान्तस्य स्वरादेर्लोपः॥४४२
अनेकाक्षरस्य लिङ्गस्य अन्त्यस्वरादेर्लोपो भवति इनि परे ॥ हस्तिनाऽतिक्रामति अतिहस्तयति । हलिंगृह्णाति ।

न हलिकल्योः ॥४४३॥ हलिकल्योर्वृद्धिर्न भवति ॥ हलयति । कलयति । अजहलत् । अचकलत् । कृतयति । अचकृतत् । वस्त्रं समाच्छादयति । संवस्त्रयति । समवस्त्रत् । वर्मणा सन्नह्यति । संवर्मयति । समवर्मत् । तत्करोति तदाचष्टे इति इन् । मुण्डं करोति मुण्ड-

यति । अमुमुण्डत् । एवं मिश्रयति । अमिमिश्रत् । सूत्रमाचष्टे सूत्रयति । असुसूत्रत् ।

सत्यार्थे वेदानामन्त आप् कारिते ॥ ४४४ ॥ सत्यार्थे वेदानामन्त आप् भवति कारिते परे । सत्यमाचष्टे । सत्यापयति । एवं अर्थापयति ।

न स्वरादेः ॥ ४४५ ॥ स्वरादेर्दीर्घो न भवति इन् चण् परे । आत्तिथपत् । वेदापयति । अविवेदपत् ।

रशब्द ऋतो लघोर्व्यञ्जनादेः ॥ ४४६ ॥ व्यञ्जनादेरनेकाक्षरस्य लिङ्गस्य लघो ऋतो रशब्दादेशो भवति इनि परे । पृथ प्रख्याने । पृथुं करोति प्रथयति । अपिप्रथत् । मृदुं करोति म्रदयति । अमिम्रदत् । दृढं करोति द्रढयति । अदिद्रढत् । कृशं करोति क्रशयति । अचक्रशत् । भृशं करोति भ्रशयति अबिभ्रशत् । परिवृढं करोति परिव्रढयति पर्यविव्रढत् । इत्यादिः ।

श्लोकः ।

पृथुं मृदुं दृढं चैव कृशं च भृशमेव च ।
परिपूर्वं दृढं चैव षडेतान्रविधौ स्मरेत् ॥ १ ॥

धातोश्च हेतौ ॥ ४४७ ॥ हेतुकर्तृकव्यापारे वर्त्तमानाद्धातोः कारितसंज्ञक इन् भवति । उवर्णस्य जान्तस्यापवर्गपरस्यावर्णे इत्यभ्यसावर्णस्य इकारः ॥ दीर्घो लघोरस्वरादीनामिति दीर्घः। भवति कश्चित्तमन्यः प्रयुंक्ते भावयति भावयते । भावयेत् । भावयतु । अभावयत् । इन्व्यजादेरुभयमित्युक्तत्वात् सर्वेषामिन्प्रत्ययानामुभयपदिनेयं ॥ अबीभवत् । भावयाञ्चक्रे । भावयिता । भाव्यात् । भावयिषीष्ट । भावयिष्यति । भावयिष्यते । अभावयिष्यत् अभावयिष्यते । पाचयति । अपीपचत् । एधयति । ऐदिधत् । नन्दयति । अनन्दत् । स्रंसयति असस्रंसत् ।

शाच्छासाह्वाव्यावेपामिनि ॥ ४४८ ॥ एषामा-

यिर्भवति इनि परे । शाययति । अशीशयत् । छाययति अचीच्छयत् । अवसाययति । अवासीषयत् । ह्वाययति ।

ह्वयतेर्नित्यम् ॥ ४४९ ॥ ह्वहतेर्नित्यं संप्रसारणं भवति कारिते च संश्चणोः परयोः ॥ अजूहवत् । व्याययति । अविव्ययत् । वाययति । अवीवयत् । पाययति ।

लोपः पिबतेरीचाभ्यासस्य ॥ ४५० ॥ पिबतेरभ्यासस्य ईद्भवति उपधायाश्च लोपो भवति इनि चण्परे । अपीप्यत् आदयति । आदिदत् । वाचयति अवीवचत् । हावयति अजूहवत् ।

अर्त्तिह्रिब्लिरिक्नुयिक्ष्माय्यादन्तानामन्तः पो यलोपो गुणश्च नामिनाम् ॥४५१॥ अर्त्यादीनामादन्तानां च पकारोन्तो भवति यथासंभवं यलोपश्च नामिनां गुणश्च इनि परे ॥ अर्प्पयति आर्प्पिपत् । ह्रेपयति । अजिह्रिपत् । ब्लि वरणे । ब्लेपयति ॥ अबिब्लपत् । रिङ् श्रवणे । रेपयति अरीरिपत् । क्नूयि शब्दे । क्नोपयति । अचुक्नुपत् । क्ष्मायि विधूनने क्ष्मापयति । अचिक्ष्मपत् । ह्वापयति । अजीह्वपत् । दापयति । अदीदपत् । मापयति । अमीमपत् । स्थापयति । स्थापयेत् । अस्थापत् ।

तिष्ठतेरित् ॥४५२॥ तिष्ठतेरिद्भवति इन् चण् परे । अतिष्ठिपत् । घ्रापयति ।

जिघ्रतेर्वा ॥ ४५३ ॥ जिघ्रतेर्वा इद्भवति इन् चण्परे । अजिघ्रिपत् । अजिघ्रपत् । देवयति । अदीदिवत् । सावयति । असूषुवत् । नाहयति । अनीनहत् । अभिषावयति । आशयति । आशिशत् । चाययति । अचीचयत् । तोदयति । अतूतुदत् । मारयति । अमीमरत् मोचयति अमूमुचत् । रोधयति । अरूरुधत् । भोजयति । अबूभुजत् । योजयति । अयूयुजत् । तानयति । अतीतनत् । मानयति । अमीमनत् । कारयति अचीकरत् ।

स्मिजिक्रीङामिनि ॥ ४५४ ॥ एषामाकारो भवति इनि परे । विस्मापयति । व्यसस्मपत् । विजापयति । व्यजिजपत् । विक्रापयति । व्यचीक्रपत् । अध्यापयति । अध्यापिपत् । वारयति अवीवरत् । ग्राहयति अजिग्रहत् । चोरयति । अचूचुरत् । तन्त्रयति । अततन्त्रत् ।

मानुबन्धानां ह्रस्वः॥४५५॥ मानुबन्धानां धातूनां ह्रस्वो भवति इनि परे॥ अस्योपधाया दीर्घो नभवति ॥ घटादयो मानुबन्धाः । घट चेष्टायां ॥ घटयति ॥ अजिघटत् । व्यथ भयचलनयोः ॥ व्यथयति । अविव्यथत् ।

जनिजॄष्क्नसुरञ्जोऽमन्ताश्च ॥४५६॥ एषां ह्रस्वो भवति सनिपरे । जनिङ् प्रादुर्भावे । जनयति । अजीजनत् । जॄष् वयोहानौ ॥ जरयति अजीजरत् । क्नसु ह्वरणदीप्तौ । क्नसयति । अचिक्नसत् । रञ्ज रागे ।

रञ्जेरिनि मृगरमणे ॥४५७॥ मृगरमणार्थे इनि परे रञ्जेरनुषङ्गलोपो भवति । रजयति । अरीरजत् । पक्षे रञ्जयति ॥ अररञ्जत् । रमुक्रिडायां । रमयति । अरिरमत् । श्रमु तपसि खेदे च । श्रमयति । अशिश्रमत् ।

ज्वलह्वलह्मलनमोनुपसर्गा वा ॥४५८॥ एते सोपसर्गा नित्यं मानुबन्धा भवन्ति॥एते अनुपसर्गा वा मानुबन्धा भवन्ति । तत्र सोपसर्गपक्षे मानुबन्धानां ह्रस्वः । ज्वल दीप्तौ । प्रज्वयति ॥ प्राजिज्वलत् ह्वल ह्मल चलने प्रह्वलयति । प्राजिह्वलत् । प्रह्मलयति । प्राजिह्मलत् । अमन्तत्वात् ॥ प्रणमयति । प्राणीनमत् । उपनमयति । उपानिनमत् । **अनुसर्गा वा॥४५९॥** एते अनुपसर्गा वा मानुबन्धा भवन्ति । ज्वलयति । ज्वालयति । अजिज्वलत् । ह्वलयति । ह्वालयति । अजिह्वलत् । ह्मलयति । अजिह्मलत् । नमयति ॥ नामयति । अनीनमत् ।

ग्लास्लावनवमश्च ॥ ४६० ॥ एते मानुबन्धा वा भवन्ति ॥ ग्लै हर्षक्षये । ग्लापयति । ग्लपयति । अजिग्लपत् । ष्णा शौचे ॥ स्नप-

यति । स्नापयति । असिस्नपत् । वन षण संभक्तौ ॥ वनयति । वानयति । अवीवनत् । टुवमुद्गिरणे । वमयति । वामयति । अवीवमत् ।

न कम्यमि चमः ॥४६१॥ एषां ह्रस्वो न भवति इनि परे ।

कमेरिनिङ् कारितम् ॥४६२॥ कमेः कारितसंज्ञक इनिङ् भवति स्वार्थे ॥ कमु कान्तौ । कामयते । अचिकमत् । अमहंममी-मृहय गतौ ॥ आमयति । आमिमत् । चमु अदने । चामयति । अचीचमत् ।

शमोऽदर्शने ॥४६३॥ शमोऽदर्शनेर्थे ह्रस्वो भवति इनि परे । शमयति रोगान् । अशिशमत् । अदर्शन इति किं ॥ निशामयति रूपं ॥ न्यशीशमत् ।

यमोऽपरिवेषणे ॥ ४६४ ॥ यमः अपरिवेषणेर्थे ह्रस्वो भवति इनि परे । यम उपरमे । नियमति । अपरिवेषण इति किं । आयामयति । आयीयमत् ।

स्वदिरवपरिभ्यां च ॥ ४६५ ॥ स्वदिरवपरिभ्यां च ह्रस्वो भवति इनि परे । स्वदिष् स्वदने । अवस्वदयति । अन्योपसर्गान्न भवति ॥ उपस्वादयति ॥ अवाचिस्वदत् । पर्य्यचिस्वदत् । उपाचिस्वदत् ।

पणो गतौ ॥ ४६६ ॥ पणो गत्यर्थे ह्रस्वो भवति इनि परे ॥ पणयति ॥ अगत्यर्थ इति किं पाणयति । अपीपणत् । इति इन्नन्ताः ॥

आत्मेच्छायां यिन् ॥ ४६७ ॥ नाम्नो यिन्भवति आत्मेच्छायां ।

यिन्यवर्णस्य ॥ ४६८ ॥ अवर्णस्य इत्वं भवति यिनि परे ॥ पुत्रमिच्छत्यात्मनः पुत्रीयति ॥ पुत्रीयेत् । पुत्रीयतु । अपुत्रीयत् । अपुत्रीयीत् ॥ पुत्रीयाञ्चकार । पुत्रीयिता । पुत्रीय्यात् । पुत्रीयिष्यति । अपुत्रीयिषीत् । एवं घटीयति । वस्त्रीयति सुवर्णीयति ।

काम्य च ॥४६९॥ नाम्नः काम्यो भवति आत्मेच्छायां । पुत्रमिच्छत्यात्मनः । पुत्रकाम्यति । पुत्रकाम्येत् । पुत्रकाम्यतु । अपु-

त्रकाम्यत् । अपुत्रकाम्यीत् । पुत्रकाम्याञ्चकार । पुत्रकाम्यिता । पुत्रकाम्यात् । पुत्रकाम्यिष्यति । अपुत्रकाम्यिष्यत् । एवं इदंकाम्यति ।

उपमानादाचारे ॥ ४७० ॥ उपमानान्नो यिन्भवति आचारेऽर्थे ॥ पुत्रमिव आचरति पुत्रीयति माणवकं । एवं क्षीरीयति जलं । भूपीयति पुत्रकं । इति यिन्नन्तः ।

कर्तुरायिस्सलोपश्च ॥ ४७१ ॥ कर्त्तुरुपमानान्नाम्नः आयि भवति आचारेऽर्थे यथासंभवं सलोपश्च ।

आयिताच्च ॥४७२॥ आयिप्रत्ययान्ताद्धातोरात्मनेपदं भवति । श्येन इव आचरति श्येनायते । श्येनायेत । श्येनायतां । अश्येनायत । अश्येनायिष्ट । श्येनायाञ्चक्रे । श्येनायिता । श्येनायिष्यते । अश्येनायिष्यत ॥ एवं अप्सरायते ॥

श्लोकः ।

ओजसोप्सरसो नित्यं पयसस्तु विभाषया ॥
आयिलोपश्च विज्ञेयो गर्दभत्यश्वतीत्यपि ॥ १ ॥

ओजस्वि इव आचरति । ओजायते । एवं अप्सरायते । पयायते ।

नामिव्यञ्जनान्तादायेरादेः ॥ ४७३ ॥ नामिव्यञ्जनान्तात्परस्य आयेरादेर्लोपो भवति ॥ पयस्यते ॥ वाशब्दस्येष्टाऽर्थत्वात्क्वचिदायिलोपः । आय्यन्ताच्चेत्यन्तग्रहणाधिक्यादायिलोपे परस्मैपदं भवति ॥ गर्दभ इव आचरति गर्दभति । एवं अश्वति । अग्नीयते । एवं पटूयते । पित्रीयते । रैयते ।

नलोपश्च ॥ ४७४ ॥ नलोपश्च भवतियिन्यायोः परतः । विध्वस्यते ॥ अनुडुह्यते ।

ओतायिन्नायिपरे स्वरवत् ॥ ४७५ ॥ ओतः परौ यिन्नायिस्वरवद्भवतः ॥ ओअविति संधिः गामित्यात्मन इच्छति गव्यति गौरिवाचरति । गव्यते ।

औत्वश्च ॥ ४७६ ॥ औतः परौ यिन्नायिस्वरवद्भवति ॥ नावमिच्छत्यात्मनः नाव्यति । नौरिवाचरति नाव्यते ।

वा गल्भक्लीबहोढेभ्यः ॥ ४७७ ॥ एभ्यः परमात्मनेपदं भवति । वाशब्दस्येष्टार्थत्वात् क्वचिदायिलोपः ॥ गल्भ इव आचरति गल्भते । क्लीबते । होढते ।

कष्टकक्षसत्रगहनाय पापे क्रमणे ॥४७८॥ एभ्यश्चतुर्थ्यन्तेभ्यः पापे वर्त्तमाने क्रमण इत्यर्थे आयिप्रत्ययो भवति । कष्टाय-कर्मणे क्रामति कष्टायते । एवं कक्षायते । सत्रायते । गहनायते पाप इति किं कष्टायतपसे क्रामति ।

बाष्पोष्मफेनमुद्वमति ॥ ४७९ ॥ बाष्पादिभ्यो द्वितीयान्तेभ्य उद्वमनेऽर्थे आयिप्रत्ययो भवति ॥ बाष्पमुद्वमति बाष्पायते । ऊष्माणमुद्वमति नस्य लोपः उष्मायते । फेनमुद्वमति फेनायते ।

सुखादीनि वेदयते ॥४८०॥ सुखादिभ्यो द्वितीयान्तेभ्यो-वेदयते इत्यर्थे आयिप्रत्ययो भवति । सुखमावेदयते सुखायते । एवं दुःखायते । तदनुभवतीत्यर्थः ।

शब्दादीन् करोति ॥४८१॥ शब्दादिभ्यो द्वितीयान्तेभ्यः करोत्यर्थे आयिप्रत्ययो भवति । शब्दं करोति शब्दायते । एवं वैरायते । कलहायते ।

नमस्तपोवरिवसश्च यिन् ॥ ४८२ ॥ एभ्यः यिन्भवति करोत्यर्थे । नमस्करोति नमस्यति । देवान् । एवं तपस्यति शत्रून् ॥ वरिवस्यति गुरून् ।

कण्ड्वादिभ्यो यन् ॥४८३॥ कण्ड्वादिभ्यो यन्भवति करोत्यर्थे ॥ कण्डूं करोति कण्डूयते । एवं तिरस्करोति तिरस्यते । इत्यायिप्रत्ययान्ताः ।

गुपूधूपविच्छपनेरायः ॥४८४॥ गुपूप्रभृतिभ्य आयः प्रत्ययो भवति स्वार्थे । गोपायति । गोपायाञ्चकार ॥ गोपायिता । एवं धू-

पायति । विच्छायति । विश विच्छ गतौ । पणायते । पणि व्यवहारे । पनायते । पन स्तुतौ च ॥ इत्यायान्ताः ।

अभूततद्भावे कृभ्वस्तिषु विकाराच्चिः ॥ ४८५ ॥ विकारान्नाम्नः श्विर्भवति अभूततद्भावेऽर्थे कृभ्वस्तिषु परेषु ।

*** च्वौऽचावर्णस्य ईत्वम् ॥४८६॥** अवर्णस्य ईत्वं भवति च्वौ च परे । च्विः सर्वापहारिप्रत्ययस्य लोपः । अशुक्लं शुक्लं करोति शुक्लीकरोति । अशुक्लः शुक्लः क्रियते शुक्लीक्रियते । अशुक्लः शुक्लो भवति शुक्लीभवति । अशुक्लः शुक्लः स्यात् शुक्लीस्यात् । अदीर्घो दीर्घः क्रियते दीर्घीक्रियते । अदीर्घं दीर्घं करोति दीर्घीकरोति । अदीर्घो दीर्घो भवति दीर्घीभवति । अदीर्घो दीर्घः स्यात् दीर्घीस्यात् । एवं पुत्रीक्रियते पुत्रीकरोति पुत्रीभवति पुत्रीस्यात् । अवनिता वनिता क्रियते वनितीक्रियते एवमग्नीक्रियते अग्नीकरोति अग्नीभवति अग्नीस्यात् । पटूक्रियते पटूकरोति पटूभवति पटूस्यात् ।

*** ऋत ईदन्तश्चिचेक्रीयितयिन्नायिषु ॥ ४८७ ॥** ऋदन्तस्य च्विचेक्रीयितयिन्नायिषु परत ईदन्तो भवति । मात्रीकरोति मात्रीक्रियते मात्रीभवति मात्रीस्यात् । पित्रीकरोति पित्रीक्रियते पित्रीभवति पित्रीस्यात् । इत्यादि । एवं सर्वमवगन्तव्यं । इति च्विप्रत्ययान्ताः समाप्ताः । अथ पुषादयः ।

पुषादिद्युतादिऌकारानुबन्धार्त्तिसर्त्तिशास्तिभ्यश्च परस्मै ॥ ४८८ ॥ इत्यण् प्रत्ययः सर्वत्र भवति । पुष पुष्टौ । अपुषत् । शुष शोषणे । अशुषत् । दुःख वैकल्ये । अदुःखत् । श्लिष आलिङ्गने । अश्लिषत् । ञिच्छिदा गात्रप्रक्षरणे । अच्छिदत् । क्षुध बुभुक्षायां । अक्षुधत् । शुध शौचे । अशुधत् । षिध संराद्धौ । असिधत् । रध हिंसायां । अरधत् । तृप प्रीणने । अतृपत् । दृप हर्षणमोचनयोः । अदृपत् । मुह वैचित्ये । अमुहत् । द्रुह जिघांसायां । अद्रुहत् । ष्णुह उद्गिरणे । अस्नुहत् । ष्णिह प्रीतौ । अस्निहत् । णश् अद-

र्शने । अनशत् । शम् दम् उपशमे । अशमत् अदमत् । तमु कांक्षायां । अतमत् । श्रमु तपसि खेदे च । अश्रमत् । भ्रमु अनवस्थाने । अभ्रमत् । क्षमूष् सहने । अक्षमत् । क्लमु ग्लानौ । अक्लमत् । मदी हर्षे । अमदत् । असु क्षेपणे । अपासत् । यसु प्रयत्ने । अयसत् । जसु मोक्षणे । अजसत् । तसु दसु उपक्षये । अतसत् । अदसत् । वसु स्तम्भे । अवसत् । प्लुष दाहे । अप्लुषत् । विष प्रेरणे । अविषत् । कुश श्लेषणे । अकुशत् । वुस उत्सर्गे । अवुसत् । मुश खण्डने । अमुशत् । मसि परिणामे । अमसत् । लुठ विलोडने । अलुठत् । उच समवाये । औचत् । भृश भ्रंश अधःपतने । अभृशत् । वृश वरणे । अवृशत् । कृश तनूकरणे । अकृशत् । ञितृष पिपासायां । अतृषत् । तुष हृष तुष्टौ । अतुषत् । अहृषत् । कुप क्रुध रुष रोषे । अकुपत् । अक्रुधत् । अरुषत् । डिप क्षेपे । अडिपत् । ष्टुप समुच्छ्राये । अस्तुपत् । गुप व्याकुलत्वे । अगुपत् । युप रुप लुप विमोहने । अयुपत् । अरुपत् । अलुपत् । लुभ गार्ध्ये । अलुभत् । क्षुभ संचलने । अक्षुभत् । नभ तुभ हिंसायां । अनभत् । अतुभत् । क्लिन्दू आर्द्रीभावे । अक्लिन्दत् । ञिमिदा स्नेहने । अमिदत् । ञिक्ष्विदा मोचने । अक्ष्विदत् । ऋध वृद्धौ । आर्द्धत् । गृधु अभिकांक्षायां । अगृधत् । इति पुषादिः । पुषादिद्युतादीत्यण् प्रत्ययः । द्युत शुभ रुच दीप्तौ । अद्युतत् अद्योतिष्ट । एवं सर्वत्र आत्मनेपदेऽपि । अशुभत् । अरुचत् । श्वित आवरणे ।

श्वितादीनां ह्रस्वः ॥ ४८९ ॥ श्वितादीनां ह्रस्वो भवति । अश्वितत् । घुट परिवर्तने । अघुटत् । रुट लुट लुठ प्रतीघाते । अरुटत् । अलुटत् । अलुठत् । क्षुभ संचलने । अक्षुभत् । श्रंस भ्रंस अवस्रंसने । अश्रसत् । अभ्रसत् । ध्वंस गतौ च । अध्वसत् । स्रंभु विश्वासे । अस्रभत् । वृत वर्तने । अवृतत् । वृध वृद्धौ । वृधु वर्धने । अवृधत् । शृद्धु शब्दकुत्सायां । अशृदत् । स्यन्दू प्रस्रवणे । अस्य-

दत् । कृपू सामर्थ्ये । अकृपत् । गृधु अभिकांक्षायां अगृधत् ।

ऋतो लृत् ॥ ४९० ॥ कृपेर्धातोः ऋतो लृत् भवति । अक्लृपत् । इति द्युतादिः ॥

श्लोकः ।

भावसेनत्रिविद्येन वादिपर्वतवज्रिणा ।
कृतायां रूपमालायां आख्यातः परिपूर्यते ॥ १ ॥

अथ कृदन्ताः केचित्प्रदर्श्यन्ते ॥

सिद्धिरिज्वद्ञ्णानुबन्धे॥४९१॥ ञ्णानुबन्धे कृत्प्रत्यये परे इचि कृतं कार्यमतिदिश्यते यथासम्भवं ।

धातोः॥४९२॥ अविशेषेण धातोरित्यधिकारो वेदितव्यः ।

कृत् ॥ ४९३ ॥ वक्ष्यमाणाः प्रत्ययाः कृत्संज्ञका वेदितव्याः ।

कर्त्तरि कृत् ॥ ४९४ ॥ कृत्प्रत्ययान्ताः कर्त्तृकारके भवन्ति ।

वर्त्तमाने शन्तृङानशावप्रथमैकाधिकरणामन्त्रितयोः॥ ४९५ ॥ अप्रथमैकाधिकरणमन्त्रितयोः परयोः वर्तमानकाले धातोः शन्तृङानशौ भवतः ॥

सार्वधातुकवत् ॥४९६॥ शानुबन्धे कृति परे सार्वधातुकवत्कार्यं भवति । कृदन्ताः प्रायो वाच्यलिङ्गाः । शन्तृङन्तं क्विबन्तं धातुत्वं न जहाति । भवन् पुमान् भवन्ती स्त्री भवत्कुलं । लोकोपचारादानशानङावात्मनेपदे ।

आनोऽत्रात्मने ॥ ४९७ ॥ अत्र आनः प्रत्यय आत्मनेपदं भवति ।

आन्मोन्त आने ॥४९८॥ अकारान्तान्मकारागमो भवति आने परे ॥ एधमानः पुत्रः । एधमाना लक्ष्मीः । एधमानं कुलं । तथा । पचन् पचन्ती पचत् । पचमानः पचमाना पचमानमित्यादि ॥ अदन् अदन्ती अदत् । शयानः शयाना शयानं ।

ङे न गुणः ॥ ४९९ ॥ नाम्यन्तयोर्धातुविकरणयोर्गुणो न भवति ङानुबन्धे कृति परे । ब्रुवन् ब्रुवाणः । जुह्वत् जुह्वानः । दधत् दधानः । दीव्यन् । सूयमानः । सुन्वन् सुन्वानः । अप्नुवानः । सर्वेषामात्मने इत्यादिना गुणो न भवति । चिन्वन् चिन्वानः । भावे । भूयमानं देवदत्तेन । एध्यमानमस्माभिः । भावे सर्वत्र नपुंसकलिङ्गत्वं । एकत्वं च कर्मणि । पच्यमान ओदनः । पच्यमानौ ओदनौ । पच्यमानाः ओदनाः । क्रियमाणः कट इत्यादि ।

वेत्तेः शन्तुर्वन्सुः ॥ ५०० ॥ विदः परस्य शन्तुर्वन्सुर्भवति । विद्वान् विद्वान्सौ ।

क्वन्सुकानौ परोक्षावच्च ॥ ५०१ ॥ धातोः परोक्षास्वरूपौ क्वन्सुकानौ भवतः ॥ क्वन्सु परस्मै कान आत्मनेपदं भवति ।

के यण्वच्च योक्तवर्जनम् ॥ ५०२ ॥ कानुबन्धे कृति परे यण्वत्कार्यं भवति योक्तं वर्जयित्वा इति न गुणः । बभूवान् बभूवान्सौ बभूवान्सः । एधाञ्चक्रिवान् । एधाञ्चक्राणः । अत्र नाम्यादेर्गुरुमत इत्यादिना आमः कृञ् प्रयुज्यते इत्यनुप्रयोगः । पेचिवान् पेचानः । चक्रिवान् चक्राणः ।

य्वोर्व्यञ्जनेऽये ॥ ५०३ ॥ धातोर्यकारवकारयोर्लोपो भवति यकारवर्जिते कृति व्यञ्जने परे । क्नूयी शब्दे । चुक्नूवान् । क्ष्मायी विधूनने । चक्ष्मावान् । दिव् क्रिडादौ । दिदिवान् । षिवु तन्तुसन्ताने । सिषिवान् । ष्ठिवु क्षिवु निरसने । तिष्ठिवान् । चिक्षिवान् ।

गमहनविदविशदृशां वा ॥ ५०४ ॥ एषां वन्स् आदिरिट् वा भवति यथासंभवं । उपधालोपः । जग्मिवान् । इडभावे ।

वमोश्च ॥ ५०५ ॥ वमोश्च परयोर्धातोर्मो नो भवति । जगन्वान् । जघ्निवान् । जघन्वान् । विविदिवान् । विविद्वान् । विविशिवान् । विविश्वान् । ददृशिवान् ।

दाश्वान्साह्वान्मीढ्वांश्च ॥ ५०६ ॥ एते क्वन्सुप्रत्यया-

न्ता निपात्यन्ते ॥ दाशृ दाने। दाश्वान् । षह मर्षणे । साह्वान् । मिह सेचने । मीढ्वान् ।

तव्यानीयौ ॥ ५०७ ॥ धातोस्तव्यानीयौ भवतः ।

ते कृत्याः ॥ ५०८ ॥ ते तव्यादयः कृत्या भवन्ति ।

भावकर्मणोः कृत्यक्तखलर्थाः ॥ ५०९ ॥ भावे कर्मणि च कृत्यक्तखलर्था वेदितव्याः ॥ पूर्वस्यापवादोऽयं ॥ सुजनेन भवितव्यं । भवनीयं। अनुक्ते कर्त्तरि तृतीया। एधितव्यं । एधनीयं । उक्ते कर्मणि प्रथमा । अभिभवितव्यः शत्रुः । अभिभवनीयः कर्त्तव्यः । करणीयः कटः । दातव्यं दानीयं धनं ।

कृत्ययुटोऽन्यत्रापि च ॥ ५१० ॥ कृत्ययुट् च उक्ताद्न्यत्रापि भवति । स्ना शौचे । स्नानीयं चूर्णं । दानीयो ब्राह्मणः । वृत् वर्तने । समावर्त्तनीयो गुरुः ॥

स्वराद्यः ॥ ५११ ॥ स्वरान्ताद्धातोर्यः प्रत्ययो भवति । चेयं जेयं नेयं ।

उदौष्ठ्यां कृद्यः स्वरवत् ॥ ५१२ ॥ उदौष्ठ्यां परः कृद्यः स्वरवद्भवति । लव्यं अवश्यलाव्यं ॥

शकिसहिपवर्गान्ताच्च ॥ ५१३ ॥ शकिसहिभ्यां पवर्गान्ताच्च यो भवति । शक्ल शक्तौ । शक्यं सह्यं । जप्यं लभ्यं ।

आत्खनोरिच्च ॥ ५१४ ॥ आकारान्तात्खनो नश्च यो भवति अनयोरन्त इकारागमो भवति । देयं पेयं । खनु अवदारणे । खनेरिकारादेशः । अन्येषामागमः । खेयं ।

यमिमदिगदां त्वनुपसर्गे ॥ ५१५ ॥ एषामुपसर्गाभावे यो भवति । यम्यं मद्यं गद्यं । अनुपसर्ग इति किं । ण्यण् प्रयाम्यं । प्रमाद्यं प्रगाद्यं ।

चरेराङि चागुरौ ॥ ५१६ ॥ अनुपसर्गे आङि चरेर्यो

भवति अगुरौ । आचर्यो देशः । अनुपसर्ग इति किं । अभिचार्यं । अगुराविति किं । आचार्यो गुरुः ।

पण्यावद्यवर्याविक्रेयगर्ह्यानिरोधेषु ॥ ५१७ ॥ एतेष्वर्थेषु एते निपात्यन्ते यथासंख्यं । पण्यमिति निपात्यते विक्रेयार्थे । अवद्यमिति निपात्यते गर्ह्यार्थे । वर्यमिति निपात्यते अनिरोधार्थे । पण व्यहारे स्तुतौ च । वद व्यक्तायां वाचि । वृञ् वरणे । पण्यं । अवद्यं । वर्यं ।

वह्यं करणे ॥ ५१८ ॥ वह्यमिति निपात्यते करणेऽर्थे । वह्यं शकटं वाह्यमन्यत् ।

अर्यः स्वामिवैश्ये ॥ ५१९ ॥ अर्यमिति निपात्यते स्वामिनि वैश्ये चार्थे । अर्यते इति अर्यः स्वामी अर्यो वैश्यः ।

उपसर्याकाल्याप्रजने ॥ ५२० ॥ प्रजने प्राप्तकाले चेत् उपसर्या इति निपात्यते । सृ गतौ । उपसर्या ऋतुमतीत्यर्थः ।

अजर्यं संगते ॥ ५२१ ॥ अजर्यमिति निपात्यते संगतेऽर्थे । न जीर्यत इत्यजर्यं आर्यसंगतं ।

नाम्नि वदः क्यप् च ॥ ५२२ ॥ नाम्नि उपपदे वदः क्यप् भवति यश्च ।

सप्तम्युक्तमुपपदम् ॥५२३॥ धात्वधिकारे सप्तम्या निर्दिष्टमुपपदसंज्ञं भवति ।

तत्प्राङ्नाम चेत् ॥५२४॥ तदुपपदं नाम चेद्धातोः प्राग्भवति ।

तस्य तेन समासः ॥५२५॥ तस्य नामोपपदस्य तेन कृदन्तेन सह समासो भवति । ब्रह्मणो वदनं अथवा ब्रह्मणा उच्यते ब्रह्मोद्यं ब्रह्मवद्यं ।

भावे भुवः ॥ ५२६ ॥ नाम्नि उपपदे भुवो धातोः क्यप् भवति भावे । ब्रह्मभूयं गतः ब्रह्मत्वं गत इत्यर्थः ।

हनस्त च ॥ ५२७ ॥ नाम्नि उपपदे हन्तेः क्यप् भवति नस्य तकारादेशो भवति । ब्रह्महत्या । अश्वहत्या ।

वृञ्दृजुषीण्शासुस्तुगुहां क्यप् ॥ ५२८ ॥ एषां क्यप् भवति । पुनः क्यप्ग्रहणं अधिकारनिवृत्त्यर्थं । तेन नाम्नि भावे चेति निवृत्त्यर्थं ।

धातोस्तोन्तः पानुबन्धे ॥ ५२९॥ ह्रस्वान्तस्य धातोस्तोऽन्तो भवति पानुबन्धे कृति परे । वृत्यं दृत्यं । जुषी प्रीतिसेवनयोः । जुष्यत इति जुष्यं । इत्यः । शासु अनुशिष्टौ ॥ शासेरिदुपधाया इत्यादिना आकारस्य इत्वं । शिष्यः । स्तुत्यः । गुह्यः ।

ऋदुपधाच्चाकृपिचृतेः ॥५३०॥ कृपि चृति वर्जित ऋकारोपधाद्धातोः क्यप् भवति । वृत्यं नृत्यं दृश्यं स्पृश्यं ।

भृञोऽसंज्ञायाम् ॥ ५३१ ॥ भृञ् असंज्ञायां क्यप् भवति । भ्रियत इति भृत्यः ।

ग्रहोऽपिप्रतिभ्यां वा ॥५३२॥ अपिप्रतिभ्यां परात् ग्रहेः क्यप् भवति वा । अपिगृह्यं । अपिग्राह्यं । पक्ष्ये घ्यण् । प्रतिगृह्यं प्रतिग्राह्यं ।

पदपक्ष्ययोश्च ॥५३३॥ पदपक्ष्ययोरर्थयोर्ग्रहेः क्यप् भवति । पक्षे भवः पक्ष्यः । प्रगृह्यं पदं । पक्षे अर्जुनगृह्या सेना ।

वौ नीपूञ्भ्यां कल्कमुञ्जयोः ॥५३४॥ वावुपपदे नीपूञ्भ्यां कल्कमुञ्जयोरर्थयोः क्यप् भवति । विनीयः कल्को विपूयो मुञ्जः ।

कृवृषिमृजां वा ॥५३५॥ कृञादिभ्यो वा क्यप् भवति । कृत्यं कार्यं । वृष वृक्ष सचने । वृष्यं । वर्ष्यं । मृज्यं । मर्ज्यं ।

***मृजो मार्जिः॥५३६॥** मृजु इत्येतस्य धातोर्मार्जिरादेशो भवति । चजोः कगौ धुडघानुबन्धयोरिति जकारस्य गकारः ॥ मार्ज्यं मार्ग्यं ।

सूर्यरुच्याव्यथ्याः कर्त्तरि ॥ ५३७ ॥ एते कर्त्तरि निपात्यन्ते । सरति सूते वा लोकानिति सूर्यः । रोचत इति रुच्यः । व्यथदुःखभयचलनयोः न व्यथते इति अव्यथ्यः ।

भिद्योध्यौ नदे ॥५३८॥ एतौ कर्त्तरि नदे निपात्येते । भिनत्ति कूलानीति भिद्यः । उज्झत्युदकमित्युध्यः ।

युग्यं च पत्रे ॥५३९॥ युग्यमिति निपात्यते पत्रे वाहनार्थे । युज्यते अनेनेति युग्यं ।

कृष्टपच्यकुप्यसंज्ञायाम्॥५४०॥ एते निपात्यन्ते संज्ञायां। कृष्टे स्वयमेव पच्यन्ते कृष्टपच्याः व्रीहयः। कुप्यं सुवर्णरजताभ्यामन्यत्।

ऋवर्णव्यञ्जनान्ताद्घ्यण् ॥५४१॥ ऋवर्णान्तात् व्यञ्जनान्ताद्धातोः घ्यण् भवति । णकार इद्वृद्ध्यर्थः । घकारश्चजोः कगौ इत्यर्थः । कार्यं । स्तृञ् आच्छादने । निस्तार्यं । श्लोकृ लोचृ दर्शने । आलोक्यं आलोच्यं । वाद्यं । कृप कृपायां । कृपेरो-लः । कल्प्यं

चजोः कगौ धुट्घानुबन्धयोः ॥ ५४२ ॥ चजोः कगौ यथासंख्यं भवतः धुटि घानुबन्धे परे । वाक्यं पाक्यं योग्यं भोग्यं ।

न कवर्गादिव्रज्यजाम् ॥५४३॥ कवर्गादेः व्रजेः अजश्च चजोः कगौ न भवतः । क्षीज कूज गुज अव्यक्ते शब्दे ॥ कूज्यं । कूजं । खज मन्थे । खाज्यं प्राव्राज्यं । अज क्षेपणे । आज्यं ।

घ्यण्यावश्यके ॥ ५४४ ॥ आवश्यके गम्यमाने चजोः कगौ न भवतः घ्यणि परे । अवश्यपाच्यं । अवश्यभोज्यं ।

प्रवचर्चिरुचियाचियजित्यजाम्॥५४५॥ एषां चजोः कगौ न भवतः घ्यणि परे । प्रवाच्यः । आर्च्यः । रोच्यः । याच्यः । याज्यः । त्यज हानौ । त्याज्यः ।

निःप्राभ्यां युजेः शक्ये ॥५४६॥ निःप्राभ्यां परस्य युजेर्गो न भवति शक्यार्थे घ्यणि परे । नियोक्तुं शक्यः नियोज्यः । एवं प्रयोज्यः भृत्यः ।

भुजोऽन्ने ॥ ५४७ ॥ भुजो गो न भवति शक्यार्थे घ्यणि परे । अन्ने । भोक्तुं शक्यं भोज्यं अन्नं । भोज्यं पयः ।

आसुयुवपिरपिलपित्रपिदभिचमां च ॥ ५४८ ॥ आङ्पूर्वात्सुनोतेर्य्वित्यादिभ्यश्च ण्यण् भवति । आसाव्यं । यु मिश्रणे । यूयते याव्यं । टुवप् बीजतन्तुसन्ताने । वाप्यं । रप लप जल्प व्यक्तायां वाचि । राप्यं । लाप्यं । त्रपूष् लज्जायां । त्राप्यं । दंभेरिह प्रकृति न लोपः । अवदाभ्यं । आचाम्यं ।

उवर्णादावश्यके ॥ ५४९ ॥ उवर्णान्तात् ण्यण् भवति अवश्यं भावे गम्यमाने । अवश्यं लूयत इति लाव्यं । एवं नाव्यं । भाव्यं ।

पाधोर्मानसामिधेन्योः ॥ ५५० ॥ पाधोरित्येतयोर्मानसामिधेन्योरर्थयोर्यथासंख्यं ण्यण् भवति । आयिरिच्यादन्तानामिति आयिप्रत्ययः । पाय्यं । धाय्यं । सामिधेनी ऋक् ।

प्राङोर्नियोऽसंमतानित्ययोः स्वरवत् ॥ ५५१ ॥ प्राङोरुपपदयोर्नियोधातोरसंमतानित्ययोर्यथासंख्यं ण्यण् भवति स च स्वरवत् । प्रणाय्यश्चोरः । निग्राह्य इत्यर्थः । यो गार्हपत्यादानीयत इति स चानित्यो रूढितः । आनाय्यो दक्षिणाग्निः ।

सञ्चिकुण्डपः क्रतौ ॥ ५५२ ॥ संपूर्वाच्चिनोतेः कुण्डपूर्वात्पिबतेर्ण्यण् भवति स च स्वरवत् क्रतावभिधेये । सञ्चायः क्रतुः । कुण्डपायः क्रतुः ।

राजसूयश्च ॥५५३॥ क्रतावभिधेये राजसूय इति निपात्यते । राजा सोतव्यः राजा वा सूयते इति राजसूयः ।

सान्नाय्यनिकाय्यौ हविर्निवासयोः ॥५५४॥ एतौ निपात्येते हविर्निवासयोरर्थयोः । सान्नाय्यं हविः विशिष्टमन्त्रनिकाय्यो निवासः ।

परिचाय्योपचाय्यावग्नौ ॥ ५५५ ॥ एतावग्नावर्थे निपात्येते । परिचाय्योऽग्निः उपचाय्योऽग्निः ।

चित्याग्निचित्ये च ॥ ५५६ ॥ एतावन्नावर्थे निपात्येते । चयनं चित्यं । अग्नेश्चयनमग्निचित्या ।

अमावास्या वा ॥ ५५७ ॥ अमासहार्थे अमापूर्वाद्वसतेर्ण्यण् भवति कालाधिकरणे वा दीर्घत्वं निपात्यते । अमा सह वसतश्चन्द्रार्कौ यस्यां तिथौ सा तिथिः अमावस्या । अमावास्या । यल्लक्षणेनानुपपन्नं तत्सर्वं निपातनात्सिद्धं ।

वुण्तृचौ ॥ ५५८ ॥ धातोर्वुण्तृचौ भवतः ।

युवुलामनाकान्ताः ॥ ५५९ ॥ युवुलां स्थाने यथासंख्यं अन अक अन्त इत्येते भवन्ति । भवतीति भावकः भविता । कारकः कर्त्ता । नायकः नेता । हारकः हर्त्ता । बुभूषकः । अस्य च लोपः बुभूषिता । गुणश्चेक्रीयिते । बोभूयकः । बोभूयिता । भावकः । भावयिता। पुत्रीयिकः पुत्रीयिता ।

हन्तेस्तः ॥ ५६० ॥ हन्तेर्नकारस्य तो भवति ञ्णानुबन्धे प्रत्यये परे । हस्य हन्तेर्घिरिणिचोः । घातकः । हन्ता । हन हिंसागत्योः । आयिरिच्यादन्तानां । दायकः। दाता । अवसायकः । अवसाता । गायकः । गाता ।

नसेटोऽमन्तस्यावमिकमिचमाम् ॥५६१॥ सेटोऽमन्तस्य वमिकमिचमिवर्जितस्य इचि कृतं कार्यं न भवति ञ्णानुबन्धे कृति परे । शमकः शमिता । दमकः दमिता । यमकः यमिता ।

अच्पचादिभ्यश्च ॥ ५६२ ॥ पचादिभ्यः अच् भवति । सर्वे धातवः पचादिषु पठ्यन्ते । पचः पठः करः देवः ।

नन्द्यादेर्युः ॥ ५६३ ॥ नन्द्यादेर्युर्भवति । सर्वे धातवो नन्द्यादौ पठ्यन्ते । नन्दतीति नन्दनः । रमु क्रीडायां रमणः । राध साध संसिद्धौ । राधनः साधनः ।

ग्रहादेर्णिन् ॥ ५६४ ॥ ग्रहादेर्गणात् णिन् भवति । सर्वे धातवः ग्रहादौ पठ्यन्ते । ग्राही ग्राहिणौ ग्राहिणः । स्थायी मायी श्रावी ।

नाम्युपधात्प्रीकृगृज्ञां कः ॥ ५६५ ॥ नाम्युपधात् प्रीणातेः किरतेर्गिरतेर्जानातेश्च को भवति। क्षिप प्रेरणे विक्षिपः। लिख विलेखने विलिखः। कृशः। प्रीञ् तर्पणे कान्तौ च प्रियः। उत्किरः।

वा स्वरे ॥५६६॥ गिरते रेफस्य वा लकारो भवति स्वरे परे। उद्गिरः। उद्गिलः। प्रज्ञः।

उपसर्गे चातो डः ॥ ५६७ ॥ उपसर्गे तु आकारान्ताड्डो भवति। सुग्लः। सुम्लः। प्रस्थः। प्रह्वः। छो छेदने। प्रच्छः।

धेट्दृशिपाघ्राध्मः शः ॥५६८॥ उपसर्गे उपपदे एभ्यः शो भवति। उद्धयः। उत्पिबः। उज्जिघ्रः। उद्धमः।

साहिसातिवेद्युदेजिचेतिधारिपारिलिम्पिविदां त्वनुपसर्गे ॥५६९॥ एषामनुपसर्गे शो भवति। साहयतीति साहयः। एवं सातयः। वेदयः। एजृ कम्पने। उदेजयः। चिती संज्ञाने। चेतयः। धृङ् धारणे। धारयः। पार तीर कर्मसमाप्तौ। पारयः। लिम्पः। विन्दः।

वा ज्वालादिदुनीभुवो णः ॥ ५७० ॥ ज्वालादिभ्यो दुनोतेः नयतेर्भवतेश्च अनुपसर्गे णो भवति वा पक्षे अच्। ज्वल दीप्तौ। ज्वलः ज्वालः। चल कम्पने। चलः चालः। कसपर्यन्तोज्वलादिः। टुदु उपतापे। दवः दावः। नयः नायः। भवः भावः।

समाङोः स्रुवः ॥ ५७१ ॥ समाङोः स्रवतेर्णो भवति। संस्रावः। आस्रावः। समाङोरिति किं। परिस्रवः।

अवे हृषोः ॥५७२॥ अव उपपदे हरतेः स्यतेश्च णो भवति। हृञ् हरणे। अवहारः। षोऽन्त कर्मणि। अवसायः।

दिहिलिहिश्लिषिश्वसिव्यधत्तीणश्यातां च ॥ ५७३ ॥ एषां णो भवति। दिह उपचये देहः। लिह आस्वादने लेहः। श्लिष आलिङ्गने श्लेषः। श्वस प्राणने श्वासः।

व्यध ताड़ने व्याधः । अत्यायः । च्युङ् छ्युङ् ज्युङ् ग्युङ् प्रुङ् प्लुङ् गाङ् श्यैङ् गतौ । अवश्यायः । दायः । पायः । प्रत्याय इत्यादि ।

ग्रहेर्वा ॥ ५७४ ॥ ग्रहेर्वा णो भवति । ग्राहो जलचरः । ग्रहः ।

स्वरवृदृगमिग्रहामल् ॥ ५७५ ॥ स्वरान्ताद्वृदृगमिग्रहिभ्यश्च अल् भवति घञोपवादः ।

गेहे त्वक् ॥ ५७६ ॥ ग्रहेर्गेहेऽभिधेये तु अग्भवति । गृह्णातीति गृहं । गृहा दाराः ।

नृतिखनिरञ्जिभ्य एव शिल्पिनि वुस् ॥५७७॥ एभ्य एव शिल्पिनि अभिधेये वुस् भवति । नर्त्तकः नर्त्तकी खनकः खनकी । रंज रागे ।

उषिघिनीणोश्च ॥५७८॥ रंजे पञ्चम लोप्यो भवति उषिघिनिणोः परतः ॥ रज्यते इत्येवं शिल्पमस्य ॥ रजकः रजकी ।

गस्थकः ॥ ५७९ ॥ गायतेः शिल्पिन्यर्थे थको भवति । गाथकः । गाथकी ।

ण्युट् च ॥ ५८० ॥ गायतेः शिल्पिन्यर्थे ण्युट् च भवति । गायनः गायनी ।

हः कालव्रीह्योः ॥ ५८१॥ जहाते काले व्रीहौ चार्थे ण्युट् भवति । जहाति काले भावानिति हायनः संवत्सरः । जहत्युदकमिति हायना व्रीहयः ।

आशिष्यकः ॥ ५८२ ॥ आशिषि गम्यमाने धातोरकः प्रत्ययो भवति । जीव प्राणधारणे । जीवतात् जीवकः । एवं नन्दकः ।

प्रुसृल्वां साधुकारिणि ॥ ५८३ ॥ एषां साधुकारिण्यर्थे अकः प्रत्ययो भवति साधुकरणं शिल्पमेव। च्युङ् छ्युङ् प्रुङिति दण्डकधातुः । साधुप्रवते साधुप्रवकः । एवं स्रवकः । सरकः । लवकः । साधुसरतीति । साधुलुनातीति । सृ गतौ । इत्यादि ।

कर्मण्यण् ॥ ५८४ ॥ कर्मण्युपपदे धातोरण् भवति । कुंभं

करोतीति कुम्भकारः । एवं काण्डलावः । वेदाध्यायः । कुंभकारी ।

ह्वावामश्च ॥ ५८५ ॥ एभ्यः कर्मण्युपपदे अण् भवति । मित्राह्वायः । तन्तुवायः । धान्यमायः ।

शीलिकामिभक्षाचरिभ्यो णः ॥ ५८६ ॥ एभ्यो णो भवति कर्मण्युपपदे । दधिशीला । दधिकामा । दधिभक्षा । कल्याणाचारा स्त्री ।

आतोऽनुपसर्गात्कः ॥ ५८७ ॥ कर्मण्युपपदेऽनुपसर्गादाकारान्ताद्धातोः को भवति । धनं ददातीति धनदः । एवं सर्वज्ञः ।

नाम्निस्थश्च ॥ ५८८ ॥ नाम्नि उपपदे तिष्ठतेराकारान्ताच्च को भवति । समे तिष्ठतीति समस्थः । कूटस्थः । कच्छेन पिबतीति कच्छपः । द्वाभ्यां पिबतीति द्विपः ।

तुन्दशोकयोः परिमृजापनुदोः ॥ ५८९ ॥ तुन्दशोकयोः कर्मणोरुपपदयोः परिमृजापनुदिभ्यां को भवति । तुन्दं परिमार्ष्टीति तुन्दपरिमृजः अलसः । एवं शोकमपनुदतीति शोकापनुदः । आनन्दकारी ।

प्रेदाज्ञः ॥ ५९० ॥ कर्मणि प्रोपपदे दाज्ञाभ्यां को भवति । प्रदः । पथि प्रज्ञः ।

समिख्यः ॥५९१॥ कर्मणि समिचोपपदे ख्यातेः को भवति ।

चक्षिङः ख्याङ् ॥ ५९२ ॥ चक्षिङ् इत्येतस्य ख्याङादेशो भवति असार्वधातुके । गां संचष्टे गोसंख्यः ।

गष्टक् ॥ ५९३ ॥ कर्मण्युपदे गायतेष्टक् भवति । मधुरं गायतीति मधुरगी । सामगी ।

सुरासीध्वोः पिबतेः ॥ ५९४ ॥ सुरासीध्वोरुपपदयोः पिबतेष्टग्भवति । सुरापी । सीधुपी ।

हृञोऽच् वयोऽनुद्यमनयोः ॥ ५९५ ॥ कर्मण्युपपदे हरते-

रज् भवति वयसि अनुद्यमने गम्यमाने । ऊर्द्ध्वं नयनमुद्यमनं ततोऽन्यदनुद्यमनं । कवचहरः क्षत्रियकुमारः

आङि ताच्छील्ये ॥५९६॥ कर्मण्याङि चोपपदे ताच्छिल्यार्थे हरतेरज् भवति । पुष्पाणि आहर्तुं शीलमस्य पुष्पाहरो विद्याधरः ।

अर्हश्च ॥ ५९७ ॥ कर्मण्युपपदे अर्हतेरज् भवति । पूजामर्हतीति पूजार्हः ।

धृञः प्रहरणे चादण्डसूत्रयोः ॥ ५९८ ॥ दण्डसूत्रवर्जिते प्रहरणवाचके उपपदे धृञोऽज् भवति । वज्रधरः । चक्रधरः । अदण्डसूत्रयोरिति किं । दण्डधारः । सूत्रधारः ।

धनुर्दण्डत्सरुलाङ्गलाङ्कुशयष्टितोमरेषु ग्रहेर्वा ॥ ५९९ ॥ एषूपपदेषु ग्रहेरज् भवति । धनुर्ग्रहः । धनुर्ग्राहः । दण्डग्रहः । दण्डग्राहः । त्सरुग्रहः त्सरुग्राहः । लाङ्गलग्रहः । लाङ्गलग्राहः । अङ्कुशग्रहः । अङ्कुशग्राहः । यष्टिग्रहः । यष्टिग्राहः । तोमरग्रहः । तोमरग्राहः ।

स्तम्बकर्णयोरमिजपोः ॥ ६०० ॥ स्तम्बकर्णयोरुपपदयोरमिजपिभ्यां अज् भवति । स्तम्बेरमो हस्ती । कर्णेजपः पिशुनः ।

शंपूर्वेभ्यः संज्ञायाम् ॥६०१॥ शंपूर्वेभ्यः धातुभ्यः संज्ञायां अज् भवति । शंकरोति इति शंकरः । शंभवः शंवदः ।

शीङोऽधिकरणे च ॥ ६०२ ॥ अधिकरणे च नाम्नि उपपदे शेते अज् भवति । खे शेते खशयः । चकारात् ।

पार्श्वपृष्ठादौ करणे ॥६०३॥ पार्श्वपृष्ठादौ करणे उपपदे शीङः अज् भवति । पार्श्वेन शेते पार्श्वशयः । पृष्ठशयः कुब्जः ।

चरेष्टः ॥ ६०४ ॥ अधिकरणे नाम्नि उपपदे चरेष्टो भवति । कुरुषु चरतीति कुरुचरः । एवमटवीचरः ।

पुरोऽग्रतोऽग्रेषु सर्त्तेः॥६०५॥ एषूपपदेषु सर्त्तेष्टो भवति। पुरःसरः। अग्रतःसरः। अग्रेसरः।

पूर्वे कर्त्तरि ॥ ६०६ ॥ पूर्वशब्दे कर्त्तर्युपपदे सर्त्तेष्टो भवति। पूर्वसरः पूर्वसरी।

कृञोहेतुताच्छील्यानुलोम्येष्वशब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु॥६०७॥ अशब्दादिषु कर्मसूपपदेषु हेतौ ताच्छील्ये आनुलोम्ये कृञष्टो भवति। हेतौ यशस्करी विद्या। ताच्छील्ये श्राद्धकरः। आनुलोम्ये वचनकरः। अशब्दादिष्विति किं। शब्दकारः। श्लोककारः। कलहकारः। गाथाकारः। वैरकारः। चाटुकारः। सूत्रकारः। मन्त्रकारः। पदकारः।

तदाद्यन्तानन्तकारबहुबाह्वहर्दिवाविभानिशाप्रभाभाश्चित्रकर्तृनान्दीकिंलिपिलिबिबलिभक्तिक्षेत्रजंघाधनुररुःसंख्यासु च ॥ ६०८ ॥ तदादिषु कर्मसूपपदेषु कृञष्टो भवति। तत्करोतीति तत्करः तस्करः। रूदित्वात्तस्य सकारः। यत्करः। आदिकरः। अन्तकरः। अनन्तकरः। कारकरः। बहुकरः। बाहुकरः। अहस्करः। दिवाकरः। विभाकरः। निशाकरः। प्रभाकरः। भास्करः। चित्रकरः। कर्त्तृकरः। नान्दीकरः। किं करोतीति किंकरः। लिपिकरः। लिबिकरः। बलिकरः। भक्तिकरः। क्षेत्रकरः जंघाकरः। इत्यादि।

भृतौ कर्मशब्दे ॥ ६०९ ॥ कर्मशब्दे उपपदे कृञष्टो भवति भृतावर्थे। कर्मकरो भृत्यः।

इस्तम्बशकृतोः व्रीहिवत्सयोः ॥६१०॥ स्तम्बशकृतोरुपपदयोः कृञः इर्भवति। स्तम्बकरिः व्रीहिः। शकृत्करिः बालवत्सः।

हरतेर्दृतिनाथयोः पशौ ॥ ६११ ॥ दृतिनाथयोरुपपदयोर्हरतेरिर्भवति पशावर्थे। दृतिहरिः। नाथहरिः पशुः।

फले मलरजःसुग्रहे ॥ ६१२ ॥ एषूपपदेषु ग्रहेरिर्भवति । फलेग्रहिः । मलग्रहिः । रजोग्रहिः ।

देववातयोरापेः ॥ ६१३ ॥ देववातयोरुपपदयोराप्नोतेरिर्भवति । देवान्प्राप्नोति देवापिः । वातापिः ।

आत्मोदरकुक्षिषु भृञः खिः ॥ ६१४ ॥ एषु कर्मसूपपदेषु भृञः खिर्भवति । नस्तु कचित् इति नलोपः ।

ह्रस्वारुषोर्मोन्तः ॥ ६१५ ॥ ह्रस्वान्तस्यानव्ययस्यारुषश्चोपपदस्य मकारान्तो भवति खानुबन्धे कृति परे । आत्मानं बिभर्त्तीति आत्मंभरिः । एवमुदरंभरिः । कुक्षिंभरिः ।

एजेः खश् ॥ ६१६ ॥ कर्मण्युपपदे एजयतेरिनन्तात् खश् भवति । एजृ कंपने जनमेजयतीति जनमेजयः ।

शुनीस्तनमुञ्जकूलास्यपुष्पेषु धेटः ॥ ६१७ ॥ एषु कर्मसूपपदेषु धेटः खश् भवति ।

दीर्घस्योपपदस्यानव्ययस्य खानुबन्धे ॥ ६१८ ॥ दीर्घान्तस्यानव्ययस्योपपदस्य ह्रस्वो भवति खानुबन्धे कृतिपरे । धेट् पाने । शुनीं धयतीति शुनिंधयः । स्तनं धयतीति स्तनंधयः । मुञ्जंधयः । कूलन्धयः । आस्यन्धयः । पुष्पंधयः । शुनिन्धयी ।

नाडीकरमुष्टिपाणिनासिकासु ध्मश्च ॥ ६१९ ॥ एषु कर्मसूपपदेषु धमतेर्धेटश्च खश् भवति । नाडिन्धमः । करन्धमः । करन्धयः । मुष्टिन्धयः । मुष्टिन्धमः । पाणिन्धयः । पाणिन्धमः । नासिकन्धमः । नासिकन्धयः ।

विध्वरुस्तिलेषु तुदः ॥ ६२० ॥ एषु कर्मसूपपदेषु तुदः खश् भवति । विधुंतुदः ।

संयोगादेर्धुटः ॥ ६२१ ॥ संयोगदिर्धुटो लोपो भवति धुटि परे । अरुंतुदः । तिलन्तुदः ।

असूर्योग्रयोर्दृशः ॥ ६२२ ॥ अनयोरुपपदयोर्दृशः खश् भवति । असूर्यंपश्या राजदाराः । उग्रंपश्याः ।

ललाटे तपः ॥ ६२३ ॥ ललाटे उपपदे तपतेः खश् भवति ललाटंतपः ।

मितनखपरिमाणेषु पचः ॥ ६२४ ॥ एषु कर्मसूपपदेषु पचः खश् भवति । मितम्पचा ब्राह्मणी । नखंपचा यवागूः । प्रस्थंपचः । द्रोणंपचा स्थाली ।

कूलउद्रुजोद्वहोः ॥ ६२५ ॥ कूले उपपदे उद्रुजोद्वहोः खश् भवति । रुजो भंगे कूलमुद्रुजा नदी । कूलमुद्वहः समुद्रः ।

वहंलिहाभ्रंलिहपरन्तपेरंमदाश्च ॥ ६२६ ॥ एते-खशान्ता निपात्यन्ते । वहंलिहा गौः । अभ्रंलिहो वायुः । परंतपः खलः । इरंमदा ज्योतिः । चकारात् वातमजन्तीति वातमजाः । श्राद्धं जहातीति श्राद्धजहा माषाः ।

वदेः खः प्रियवशयोः ॥ ६२७ ॥ अनयोरुपपदयोर्वदेः खो भवति । प्रियंवदः । वशंवदः ।

सर्वकूलाभ्रकरीषेषु कषः ॥ ६२८ ॥ एषूपपदेषु कषतेः खो भवति । कषसिषेति दण्डकधातुः सर्वंकषः खलः । कूलंकषा नदी । अभ्रंकषो गिरिः । करीषंकषा वात्या ।

भयर्त्तिमेघेषु कृञः ॥ ६२९ ॥ एषूपपदेषु कृञः खो भवति । भयंकरः । ऋतिंकरः । मेघंकरः ।

क्षेमप्रियमद्रेष्वण्च ॥ ६३० ॥ एषूपपदेषु कृञः खो भवति अण्च । क्षेमंकरः क्षेमकारः । प्रियंकरः प्रियकारः । मद्रंकरः मद्रकारः ।

नाम्नितृभृवृजिधारितपिदमिसहां संज्ञायाम् ६३१
नाम्न्युपपदेभ्यः संज्ञायां खो भवति । रथेन तरतीति रथंतरं साम । विश्वं बिभर्तीति विश्वंभरा भूः । पतिं वृणीते पतिंवरा कन्या । धनञ्जय-

तीति धनञ्जयः। वसुं धारयतीति वसुन्धरा। शत्रुं तापयतीति शत्रुंतपः। अरिं दमयतीति अरिन्दमः । शत्रुं सहते इति शत्रुंसहः ।

गमश्च ॥ ६३२ ॥ नाम्नि उपपदे गमश्च खो भवति संज्ञायां। सुतंगमः । हृदयङ्गमा वाचः।

उरोविहायसोरुरविहौ च ॥ ६३३ ॥ उरोविहायसो-रुरविहौ भवतः । गमश्च खो भवति संज्ञायां। उरसा गच्छतीति उरङ्गमः । विहायसा गच्छतीति विहङ्गमः ।

डोऽसंज्ञायामपि ॥ ६३४ ॥ नाम्नि उपपदे गमे डो भवतीत्यसंज्ञायामपि । भुजाभ्यां गच्छतीति भुजगः । तुरगः । प्लवगः । पतगः । अध्वगः । दूरगः । पारगः । पन्नगः । सुगः । दुर्गः। नगः। अगः । उरगः । विहगः ।

विहङ्गतुरङ्गभुजङ्गाश्च ॥ ६३५ ॥ एते डान्ता निपात्यन्ते संज्ञायां । विहङ्गः । तुरङ्गः । भुजङ्गः ।

अन्यतोऽपि च ॥ ६३६ ॥ नाम्नि उपपदे गमेरन्यस्मादपि डो भवति । वारि चरतीति वारचः हंसः। गिरौ शेते गिरिशः। वरानाहन्तीति वराहः । परिखन्यते परिखा ।

हन्तेः कर्मण्याशीर्गत्योः ॥६३७॥ कर्मण्युपपदे आशिषि गतौ च वर्तमानाद्धन्तेर्डो भवति । शत्रुं वध्यात् शत्रुहः । क्रोशं हन्तीति क्रोशहः ।

अपात्क्लेशतमसोः ॥ ६३८ ॥ क्लेशतमसोरुपपदयोरपहन्तेर्डो भवति क्लेशापहः। तमोपहः । दुःखापहः । ज्वरापहः । विषापहः । अन्यतोऽपि अन्यापहः । दर्पापहः ।

कुमारशीर्षयोर्णिन् ॥ ६३९ ॥ कुमारशीर्षयोरुपपदयोः हन्तेर्णिन् भवति । कुमारघाती । शीर्षघाती ।

टग्लक्षणे जायापत्योः ॥ ६४० ॥ जायापत्योरुपपदयोर्हन्तेष्टग् भवति लक्षणवत्कर्त्तरि ।जायाघ्नः ब्राह्मणः । पतिघ्नी वृषली ।

अमनुष्यकर्तृकेऽपि च ॥ ६४१ ॥ अमनुष्यकर्त्तृकेऽपि च वर्त्तमानात् हन्तेरपि टग्भवति । जायाघ्नः तिलकः । पतिघ्नी पाणिरेखा । पित्तघ्नं घृतम् । वातघ्नं तैलं । श्लेष्माणं हन्तीति श्लेषमघ्नं त्रिकटुकं । अपिशब्दात् कृतघ्नः ।

हस्तिबाहुकवाटेषु ॥ ६४२ ॥ एषु कवाटेषु हन्तेष्टग्भवति ॥ हस्तिनं हंतीति हस्तिघ्नः । एवं बाहुघ्नः । कवाटघ्नः ।

पाणिघताडघौ शिल्पिनि ॥ ६४३ ॥ एतौ शिल्पे निपात्येते । पाणिना हन्तीति पाणिघः । ताडघः ।

नग्नपलितप्रियान्धस्थूलशुभगाढ्येष्वभूततद्भावे कृञः ख्युट् करणे ॥ ६४४ ॥ नग्नादिषूपपदेषु अभूततद्भावेर्थे कृञः ख्युट् भवति करणे । अनग्नो नग्नः क्रियते अनेन नग्नं करणं द्यूतं । एवं पलितंकरणं तैलं । प्रियंकरणं शीलं । अन्धंकरणः शोकः । स्थूलंकरणं दधि । शुभगंकरणं रूपं । आढ्यंकरणं वित्तं ।

भुवः खिष्णुखुकञौ कर्त्तरि ॥ ६४५ ॥ नग्नादिषूपपदेषु अभूततद्भावे भुवः खिष्णुखुकञौ भवतः कर्त्तरि । अनग्नो नग्नो भवति । नग्नंभविष्णुः । नग्नंभावुकः । पलितंभविष्णुः । पलितंभावुकः । प्रियंभविष्णुः । प्रियंभावुकः । अन्धंभविष्णुः अन्धंभावुकः । स्थूलंभविष्णुः स्थूलंभावुकः ।

भजो विण् ॥ ६४६ ॥ कर्मणि भजो विण् भवति । वेर्लोपोऽपृक्तस्य इति वेर्लोपो भवति ॥ अर्द्धभाक् पादभाक् ।

सहः छन्दसि ॥ ६४७ ॥ छन्दसि भाषायां सहो विण् भवति । तुरासहते ।

सहेष्षोढः ॥ ६४८ ॥ सहेस्सकारस्य षत्वं भवति हकारस्य ढकारो भवति चेत् । तुराषाड् तुरासाहौ तुरासाहः ।

वहश्च ॥ ६४९ ॥ नाम्नि उपपदे वहश्च विण् भवति । प्रष्ठवाट् प्रष्ठौही ।

अनसि डश्च ॥ ६५० ॥ अनस्युपपदे वहश्च विण् भवति । अनसश्च डो भवति । अनड्वान् । अनडुही ।

दुहः को घश्च ॥६५१॥ दुहः को भवति अन्तस्य घादेशः । ब्रह्मदुघा कामदुघा ।

विट्कमिगमिखनिसनिजनाम् ॥६५२॥ नाम्नि एभ्यो विट् भवति ।

विड्वनोरा: ॥ ६५३ ॥ विटि च वनि च प्रत्यये परे पञ्चमान्तस्याकारो भवति । उदधिकाः । अग्रेगाः । विषखाः । गोषाः । अब्जजाः ।

आतो मन् कनिप्वनिप्विचः ॥६५४॥ आकारान्ताद्धातोर्मन् क्वनिप् विच् एते प्रत्यया भवन्ति । मन् सुष्ठु ददातीति सुदामा । अश्व इव तिष्ठतीति अश्वत्थामा । क्वनिप् । सुपीवा । सुधीवा । वनिप् । भूरिदावा । घृतपावा । विच् । क्षीरपाः । सर्वापहारी प्रत्ययलोपः ।

अन्येभ्योऽपि दृश्यन्ते ॥ ६५५ ॥ अन्येभ्योपि धातुभ्यः एते प्रत्यया दृश्यन्ते । मन् कृतवर्मा क्वनिप् । इण गतौ । प्रातरेति प्रातरित्वा । वनिप् । विच् । त्विष हिंसायां त्विट् ।

क्विप् ॥ ६५६ ॥ धातोः क्विप् दृश्यते । उखायाः स्रंसते उखास्रत् । पर्णध्वत् ।

वः क्वौ ॥ ६५७ ॥ वेञः सम्प्रसारणं दीर्घमापद्यते क्वावेव । ऊः उवौ उवः ।

ध्याप्योः ॥ ६५८ ॥ ध्याप्योः सम्प्रसारणं दीर्घमापद्यते क्वौ परे । आधीः । व्याधीः । आपीः । वचनात्सम्प्रसारणं सिद्धम् ।

पञ्चमोपधाया धुटि चागुणे ॥६५९॥ पञ्चमान्तस्योपधायाः क्वौ धुटि चागुणे प्रत्यये परे दीर्घो भवति ।

मोनो धातोः ॥ ६६० ॥ धातोर्मकारस्य नकारो भवति धुट्यन्ते च । प्रशान् । प्रतान् ।

च्छ्वोः शूठौ पञ्चमे च ॥ ६६१ ॥ छकारवकारयोः शू ऊठि-

स्येतौ भवतः । क्वौ धुट्यगुणे पञ्चमे च । लिश विछ गतौ । विछ गोविट् । प्रच्छ ज्ञीप्सायां । पथिप्राट् । क्वचिद् ह्रस्वस्य दीर्घता । दिवू अक्षद्यूः । षिवू स्यूः । प्रच्छ प्रष्टः पृष्ठा । दिवू द्यूतः । द्यूत्वा । विच्छ विश्नः । छस्य द्विः पाठे निमित्ताभावे नैमित्तिकस्याप्यभावः ।

श्रिव्यविमविह्वरित्वरामुपधया ॥ ६६२ ॥ एषामुपधया सह वकारस्य ऊद् भवति क्वौ धुट्यगुणे पञ्चमे च । श्रिवु गतिशोषणयोः । स्रूः । अव रक्ष पालने । अवू ऊः । मव्य बन्धने मूः । ज्वर रोगे । जूः । त्वरे तूः ।

राल्लोप्यौ ॥ ६६३ ॥ रेफात्परौ छकारवकारौ लोप्यौ भवतः क्वौ धुट्यगुणे पञ्चमे च । मूर्च्छ मूः । धूर्व धूः ।

वहेः पञ्चम्यां भ्रंशेः ॥ ६६४ ॥ वहेः पञ्चम्यन्त उपपदे भ्रंशेः क्विप् भवति । भ्रश भ्रंश अधःपतने । वहात् भ्रश्यत इति वहभ्रट् ।

स्पृशोऽनुदके ॥ ६६५ ॥ अनुदके नाम्नि उपपदे स्पृशः क्विप् भपति । स्पृश संस्पर्शे । घृतस्पृक् मन्त्रस्पृक् ।

अदोऽनन्ने ॥ ६६६ ॥ अनन्न उपपदे अदः क्विप् भवति । सस्यमत्तीति सस्यात् । तृणात् ।

क्रव्ये च ॥ ६६७ ॥ क्रव्ये चोपपदे अदः क्विप् भवति पक्केऽर्थे । क्रव्यात् । पुनर्वचनादण् अपक्केऽपि क्रव्यादः राक्षसः ।

ऋत्विग्दधृक्स्रक्दिगुष्णिहश्च ॥ ६६८ ॥ एते क्विबन्ता निपात्यन्ते । ऋतौ यजतीति स्वपि वचि इत्यादिना संप्रसारणं वमुवर्णे इति वत्वं । ऋत्विक् । धृष्णोतीति दधृक् । स्रक् । दिक् । उष्णिक् ।

सत्सूद्विषद्रुहयुजविदभिदजिनीराजामुपसर्गेऽप्यनुपसर्गेऽपि ॥ ६६९ ॥ एषामुपसर्गेऽप्यनुपसर्गेपि नाम्नि अप्यनाम्नि उपपदे क्विप् भवति । उपसीदतीति उपसत् । सत् सभासत् । सूरदादिः प्रसूः । सूः । अण्डसूः । द्विष् अप्रीतौ । विद्विट् ।

मित्रद्विट्। द्रुह जिघांसायां प्रध्रुक् ध्रुक्। मित्रध्रुक् प्रधुक् गोधुक् प्रयुक् युक् अश्वयुक् संवित् वित् वेदवित्। प्रभित् भित् काष्ठभित्। प्रच्छित् छित् रज्जुच्छित्। प्रजित् जित् अवनिजित्। अवनीः नीः सेनानीः विराट् राट् गिरिराट्।

कर्मण्युपमानेत्यदादौ दृशेष्टक्सकौ च ॥ ६७० ॥ कर्मण्युपमानेत्यदादौ उपपदे दृशेष्टक्सकौ च भवतः। चकारात् क्विप् च।

आसर्वनाम्नः ॥ ६७१ ॥ दृग्दृशदृक्षेषु परतः सर्वनाम्न आकारो भवति। दृशिर् प्रेक्षणे। तमिव पश्यतीति अथवा सइव दृश्यते इति। तादृशः। तादृक्षः। तादृक्। यादृशः। यादृक्। यादृक्षः। एतादृशः। एतादृक्षः। एतादृक्।

इदमीः ॥ ६७२ ॥ दृगादिषु परत इदमीर्भवति। इदमिव पश्यतीति ईदृशः। ईदृक्षः। ईदृक्।

किं कीः ॥ ६७३ ॥ दृगादिषु किं कीर्भवति। किमिव पश्यतीति कीदृशः। कीदृक्षः। कीदृक्।

अदोमूः ॥ ६७४ ॥ दृगादिषु अदस् अमूर्भवति। अमुमिव पश्यतीति अमूदृशः। अमूदृक्षः। अमूदृक्।

दृग्दृशदृक्षेषु समानस्य सः ॥ ६७५ ॥ दृगादिषु परेषु समानस्य सभावो भवति। समानमिव पश्यतीति सदृशः। सदृक्षः। सदृक्।

नाम्न्यजातौ णिनिस्ताच्छील्ये ॥ ६७६ ॥ अजातौ नाम्नि उपपदे धातोर्णिनिर्भवति ताच्छील्येऽर्थे तच्छब्देन धात्वर्थो गृह्यते। उष्णं भोक्तुं शीलमस्य उष्णभोजी। धर्ममवभासितुं शीलमस्य धर्ममवभास्यत इति एवं शीलः धर्मावभासी। प्रियवादी। प्रियवादिनी।

कर्तर्युपमाने ॥ ६७७ ॥ कर्तृवाचिनि उपमाने उपपदे

धातोर्णिनिर्भवति। उष्ट्र इव क्रोशतीति उष्ट्रक्रोशी। ध्वांक्षरावी। हंसगामिनी।

व्रताभीक्ष्ण्ययोश्च ॥ ६७८ ॥ व्रताभीक्ष्ण्ययोरर्थयोर्धातोर्णिनिर्भवति। व्रतं शास्त्रविहितो नियमः। आभीक्ष्ण्यं पौनःपुन्यं। अश्राद्धभोजी। स्थण्डिलशायी। क्षीरपायिणः उशीनराः। सौवीरपायिणो बाह्लिकाः।

मनः पुंवच्चात्र ॥ ६७९ ॥ कर्मण्युपपदे मन्यतेर्णिनिर्भवति उपपदस्य पुंवद्भवति यथासम्भवं। पटुमानी। पट्वीमात्मानं मन्यते पटुमानिनी।

खश्चात्मने ॥ ६८० ॥ कर्मण्युपपदे आत्मार्थे मन्यतेर्णिनिर्भवति खश्च प्रत्ययः पुंवच्च। विदुषीमिव आत्मानं मन्यते विद्वन्मानिनी। पटुमिवात्मानं मन्यते पटुमन्यः।

करणेऽतीते यजः ॥ ६८१ ॥ करणे उपपदे यजेर्णिन् भवति अतीतेऽर्थे। अग्निष्टोमेन इष्टवान् अग्निष्टोमयाजी। वाजपेययाजी।

कर्मणि हनः कुत्सायाम् ॥६८२॥ कर्मण्युपपदे हन्तेर्णिनिर्भवति अतीते काले वर्त्तमानात् कुत्सायां। पितृघाती। मातुलघाती।

क्विप् ब्रह्मभ्रूणवृत्रेषु ॥ ६८३ ॥ ब्रह्मादिषूपपदेष्वतीते हन्तेः क्विप् भवति अतीतकाले। ब्रह्माणं हन्तिस्म ब्रह्महा। भ्रूणहा। वृत्रहा।

कृञः सुपुण्यपापकर्ममन्त्रपदेषु ॥ ६८४ ॥ एतेषूपपदेषु कृञः क्विप् भवति अतीते। सुष्ठु करोतिस्म सुकृत्। पुण्यकृत्। पापकृत्। कर्मकृत्। मन्त्रकृत्। पदकृत्।

सोमे सुञः ॥ ६८५ ॥ सोमे उपपदे सुञः क्विप् भवति अतीते। सोमं सुनोतिस्म सोमसुत्।

चेरग्नौ ॥ ६८६ ॥ अग्नावुपपदे चिनोतेः क्विप् भवति अतीते। अग्निं चिनोतिस्म अग्निचित्।

विक्रिय इन् कुत्सायाम् ॥६८७॥ विक्रीणातेरतीते कु-

त्सायां इन् भवति । सोमं विक्रीणीते सोमविक्रयी । डुक्रीञ् द्रव्य-विनिमये ।

दृशेः क्वनिप् ॥ ६८८ ॥ कर्मण्युपपदे दृशेः क्वनिप् भवति अतीते । मेरुं पश्यतिस्म मेरुदृश्वा ।

सहराज्ञोर्युधः ॥ ६८९ ॥ सहराज्ञोरुपपदयोः युधः क्वनिप् भवति अतीते । युधसम्प्रहारे सहयुध्यतेस्म सहयुध्वा । राजानं युध्यतेस्म राजयुध्वा ।

कृञश्च ॥ ६९० ॥ सहराज्ञोरुपपदयोः कृञः क्वनिप् भवति अतीते । सह कृत्वा । राजकृत्वा ।

सप्तमीपञ्चम्यन्ते जनेर्डः ॥ ६९१ ॥ सप्तम्यन्ते पञ्चम्यन्ते उपपदे जनेर्डो भवति अतीते । जले जातं जलजं । सरसिजं । संस्कारात् जातं संस्कारजं । बुद्धिजं । एवं पङ्केजं । नीरेजं ।

अन्यत्रापि च ॥ ६९२ ॥ अन्यस्मिन्नप्युपपदे जनेर्डो भवति अतीते । न जातः अजः । द्वाभ्यां जातो द्विजः । अभिजः । अग्रजः । अनुजः । पुमांसमनुजातः ॥

श्लोकः ।

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ॥
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥ १ ॥
वर्णागमो गवेन्द्रादौ सिंहे वर्णविपर्ययः ॥
षोडशादौ विकारः स्याद्वर्णनाशः पृषोदरे ॥ २ ॥
वर्णविकारनाशाभ्यां धातोरतिशयेन यः ।
योगः स उच्यते प्राज्ञैर्मयूरभ्रमरादिषु ॥ ३ ॥

मह्यां रौतीति मयूरः । भ्रमन् रौतीति भ्रमरः । व्यञ्जनान्तस्य यत्सुभोरिति न्यायात् पुंसोऽन् शब्दलोप इति सूत्रेण अन्शब्दलोपः । संयोगान्तस्य लोप इति सलोपः । पुमनुजः । स्त्र्यनुजः ।

निष्ठा ॥ ६९३ ॥ धातोर्निष्ठाप्रत्ययो भवति अतीते काले ।

क्तक्तवन्तू निष्ठा ॥ ६९४ ॥ क्तक्तवन्तू निष्ठासंज्ञौ भवतः।

न श्र्युवर्णवृतां कानुबन्धे ॥ ६९५ ॥ श्रयतेरुवर्णान्तस्य वृङ्वृञ्‌ऋदन्तस्य च नेड् भवति कानुबन्धेऽसार्वधातुके । श्रितः श्रितवान् । युतः युतवान् । भूतः भूतवान् । वृतः वृतवान् ।

रान्निष्ठा तो नोऽपृमूर्च्छिमदिख्याध्याभ्यः॥६९६॥ रेफात्परस्य निष्ठातकारस्य नकारो भवति नतु पृमूर्च्छिमदिख्याध्याभ्यः । शॄ हिंसायां । शीर्णः शीर्णवान् । कीर्णः कीर्णवान् । गीर्णः गीर्णवान् ।प्रतिषेधः किम् । पॄ पूर्त्तः पूर्त्तवान् । मूर्च्छा मोहसमुच्छ्राययोः। मूर्छा मूर्च्छावान् । मूर्त्तः मूर्त्तवान् । मत्तः । नडीङ्श्वीदनुबन्धवेटामपतिनिष्कषोरिति इट्प्रतिषेधः ॥ ख्यातः । ध्यातः । क्षातः । ध्यातः ।

निष्ठेटीनः ॥ ६९७ ॥ निष्ठायामिटि परे इनो लोपो भवति । चोर्यतेस चोरितः चोरितवान् । कारितः कारितवान् ॥ क्षुधिवसोश्चेति वर्त्तते ।

निष्ठायाश्च ॥ ६९८ ॥ क्षुधिवसोर्निष्ठायां वा नेट् भवति ।

लुभो विमोहने ॥ ६९९ ॥ विमोहनेऽर्थे लुभो निष्ठायां वा नेट् भवति । क्षुधितः क्षुधितवान् । उषितः उषितवान् । लुभ गार्ध्ये । लुभितः लुभितवान् । लुब्धः लुब्धवान् ।

पूङ्क्लिशोर्वा ॥ ७०० ॥ पूञः क्लिशश्च निष्ठायामिड् वा भवति । पूतः पूतवान् । पवितः पवितवान् । क्लिश विबाधने । क्लिष्टः क्लिष्टवान् । क्लिशितः क्लिशितवान् ।

न डीङ्श्वीदनुबन्धवेटामपतनिष्कुषोः ॥ ७०१ ॥ डीङ् श्वयतेरीदनुबन्धस्य च वेटस्य निष्ठायां नेड् भवति अपतिनिष्कुषोः ।

ल्वाद्योदनुबन्धाच ॥ ७०२ ॥ लूञादिभ्यः ओदनुबन्धेभ्यश्च परस्य निष्ठातकारस्य नकारो भवति । डीङ् विहायसा गतौ । डीनः डीनवान् । टुओश्वि गतिवृद्ध्योः ।

तद्दीर्घमन्त्यम् ॥७०३॥ तत्सम्प्रसारणमन्त्यं चेद्दीर्घमापद्यते ।

शूनः शूनवान् । दीप्तः दीप्तवान् । ओलजी ओलस्जी व्रीडायां । लज्ज-तेस्म अन्तरङ्गत्वात् चजोः कगौ धुटि घानुबन्धयोरिति जकारस्य गकारः । लग्नः लग्नवान् ।

धुटि खनिसनिजनाम् ॥७०४॥ एषां पञ्चमान्तस्य आकारो भवति धुटि परे । खातः । सातः । जातः । जातवान् । वेटः । गुहू संवरणे । ढे ढ लोपो दीर्घश्चोपधायाः । गूढः गूढवान् ।

दाद्दस्य च ॥ ७०५ ॥ दकारात्परस्य निष्ठातकारस्य दस्य च नकारो भवति ।

आदनुबन्धाच्च ॥७०६॥ आकारादनुबन्धाद्धातोर्नेड् भवति निष्ठायां । ञिमिदा स्नेहने । मिन्नः मिन्नवान् । क्लिदू आर्द्रीभावे । क्लिन्नः क्लिन्नवान् ।

आतोऽन्तःस्थासंयुक्तात् ॥७०७॥ अन्तःस्थासंयुक्तादाकारात्परस्य निष्ठातकारस्य नकारो भवति । ग्लै हर्षक्षये । ग्लानः ग्लानवान् । म्लै गात्रविनामे । म्लानः । श्रा पाके । श्राणः । द्रा कुत्सायां गतौ । विद्राणः विद्राणवान् ।

व्रश्चेः कश्च ॥ ७०८ ॥ व्रश्चेः परस्य निष्ठातकारस्य नकारो भवति कश्चान्तादेशः । व्रश्चू छेदने सम्प्रसारणं । वृक्णः वृक्णवान् ।

क्षैशुषिपचां मकवाः ॥ ७०९ ॥ एभ्यो निष्ठातकारस्य यथासंख्यं मकवा भवन्ति । क्षै जै षै क्षये । क्षामः क्षामवान् । शुष्कः । पक्वः ।

***वनतितनोत्यादिप्रतिषिद्धेटां धुटि पञ्चमोऽच्चान्तः** ॥ ७१० ॥ वनतेस्तनोत्यादेः प्रतिषिद्धेटश्च पञ्चमस्य लोपो भवति धुट्यगुणे पञ्चमे च । आकारस्य अद् भवति । वनषण संभक्तौ । वतः । ततः । हतः । यतः । रतः । नतः । गतः । गतवान् ।

जपिवमिभ्यामिड् वा ॥ ७११ ॥ जपिवमिभ्यामिड्

वा भवति निष्ठायां । जप विमानसे च । जप्तः जप्तवान् । जपितः जपितवान् । वान्तः वान्तवान् । वमितः वमितवान् ।

व्याङ्भ्यां श्वसः ॥७१२॥ व्याङ्भ्यां परस्य श्वस इड् वा भवति निष्ठायां । विश्वस्तः । विश्वसितः । विश्वस्तवान् विश्वसितवान् । आश्वस्तः आश्वस्तवान् । आश्वसितः आश्वसितवान् ।

भावादिकर्मणोर्वा ॥ ७१३ ॥ आदनुबन्धाद्धातोर्भाव-आदिक्रियायाञ्च इड् वा भवति निष्ठायां ।

शीङ्पूङ्धृषिक्ष्विदिस्विदिमिदां निष्ठासेट् ॥७१४ शीङादीनां निष्ठा सेट् गुणी भवति । शयितः शयितवान् । पवितः पवितवान् । ञिधृषा प्रागल्भ्ये । धर्षितः धर्षितवान् । प्रक्ष्वेदितः प्रक्ष्विण्णः। प्रस्वेदितः प्रस्विन्नः । प्रमेदितः । प्रमिन्नः । प्रमिन्नवान् ।

स्फायः स्फीः ॥७१५॥ स्फायः स्फीरादेशो भवति निष्ठायां । स्फायी ओप्यायी वृद्धौ । स्फीतः स्फीतवान् ।

भावादिकर्मणोर्वोदुपधात् ॥ ७१६ ॥ उदुपधाद्धातोर्निष्ठा सेट् गुणी भवति वा भावे आदिक्रियायाञ्च । द्योतितमनेन द्युतितमनेन । प्रद्योतितः प्रद्युतितः ।

यपि चादो जग्धिः ॥ ७१७ ॥ तकारादौ अगुणे यपि च परे अदेर्जग्धिर्भवति । जग्धं अद्यतेस्म निष्ठाक्तः ।

द्यतिमास्थां त्यगुणे ॥ ७१८ ॥ एषां तकारादावगुणे प्रत्यये परे इट् भवति । दोऽवखण्डने । दितवान् अवसितः । माङ् माने । मितः । स्थितः स्थितवान् ।

वा छाशोः ॥७१९॥ छाशोस्तकारादावगुणे इड् वा भवति । छो छेदने । अवच्छितः अवच्छातः । शो तनूकरणे निशितः निशातः ।

दधातेर्हिः ॥ ७२० ॥ दधातेर्हिर्भवति तकारादावगुणे । अभिहितः । अभिहितवान् ।

स्वरान्तादुपसर्गात्तः ॥ ७२१ ॥ स्वरान्तादुपसर्गात्पर-

स्य दासंज्ञकस्य तो भवति तकारादावगुणे । प्रत्तं प्रत्तवान् । नित्तं नित्तवान् ।

दद्दोऽधः ॥ ७२२॥ अघेटो दासंज्ञकस्य दद्भवति तकारादावगुणे । दत्तः दत्तवान् । दत्त्वा दत्तिः । धाव गतिशुध्योः । छ्वोः शूठौ ।

अवर्णादूठो वृद्धिः ॥७२३॥ अवर्णात्परस्य ऊठो वृद्धिर्भवति । धौतः ।

आदिकर्मणि क्तः कर्त्तरि च ॥७२४॥ आदिक्रियायां कर्त्तरि च क्तो भवेदिति वेदितव्यः । प्रकृतः कटं भवान् । प्रकृतः कटो भवता । सुप्तो भवान् । प्रसुप्तं भवता । प्रशब्दः आदिक्रियाद्योतकः ।

गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च ॥७२५॥ गत्यर्थेभ्यः अकर्मकेभ्यः श्लिषादिभ्यश्च कर्त्तरि क्तो भवति । गतो ग्रामं भवान् । ग्रामो भवता प्राप्तः । ग्रामं भवान् प्राप्तः प्राप्तो ग्रामो भवता । गतोऽयं गतमनेन । प्राप्तोऽयं प्राप्तमनेन । अकर्मकात् । शयितो भवान् शयितं भवता । श्लिषादयः सोपसर्गाः सकर्मकाः आश्लिष्टो गुरुं भवान् । आश्लिष्टो गुरुर्भवता । श्लिष आलिङ्गने । अधिशयितः खट्वां भवान् । अधिशयिता खट्वा भवता । उपस्थितो गुरुं भवान् । उपस्थितो गुरुर्भवता । उपासितो गुरुं भवान् । उपासितो गुरुर्भवता । वस निवासे । अनूषितो गुरुं भवान् । अनूषितो गुरुर्भवता । अनुजातो बुधं चन्द्रमाः । अनुजातो बुधश्चन्द्रमसा । आरूढो वृक्षं कपिः आरूढो वृक्षः कपिना । जॄषु झॄषु वयोहानौ । अनुजीर्णो वृषलीं भवान् । अनुजीर्णा वृषली भवता ।

क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसादनार्थेभ्यः ॥ ७२६ ॥ ध्रुवस्य भावो ध्रौव्यं प्रत्यवसादनं भोजनं । ध्रौव्यार्थेभ्यः गत्यर्थेभ्यः प्रत्यवसादनार्थेभ्यश्चक्तो भवति अधिकरणे । इदमेषामासितं । इदमासितमेभिः । अत्रासितोऽयं । इदमेषां यातं इदं तैर्यातं

यामान्ते याताः । इदमेषां भुक्तं इदं तैर्भुक्तं ओदनं ते भुक्ताः । इदमेषां पीतं । पयस्तैः पीतं । पयस्ते पीताः । पीतं पयः ।

ञ्यनुबन्धमतिबुद्धिपूजार्थेभ्यः क्तः ॥७२७॥ मतिरिच्छा बुद्धिर्ज्ञानं पूजा सत्कारः । ञ्यनुबन्धमतिबुद्धिपूजार्थेभ्यः क्तो भवति वर्तमानकाले भावे कर्मणि कर्त्तरि च यथासम्भवं । ञिमिदा स्नेहने । मिन्नः । स्विन्नः । क्ष्विण्णः । राज्ञां मतः । सतामिष्टः । बुद्धौ राज्ञां बुद्धः । राज्ञां ज्ञातः । पूज पूजायां । राज्ञां पूजितः । सतामर्चितः ।

नपुंसके भावे क्तः ॥७२८॥ भावे क्तो भवति नपुंसके । उपासितमत्र । सुजल्पितं । कुमारस्य शयितं । आस् उपवेशने । आसितं पुत्रस्य एधितं ।

युट् च ॥ ७२९ ॥ भावे नपुंसके युट् च भवति । भवनं । पचनं । यजनं । वसनं । देवनं । तोदनं । रोदनं । करणं । मननं । इत्यादि सर्वमवगन्तव्यं ।

तच्छीलतद्धर्मतत्साधुकारिष्वाक्वेः ॥ ७३० ॥ आक्वेः कोऽर्थः क्विपमभिव्याप्य इत्यर्थः । तच्छीलादिषु कर्तृषु अतः परं केचित्प्रत्यया वेदितव्याः ।

तृन् ॥ ७३१ ॥ तच्छीलादिषु धातोस्तृन् भवति । वदिता जनापवादान् मूर्खः । मुण्डयितारः श्राविष्ठायिनाः । अधीतृ ज्ञानं ।

भ्राज्यलङ्कृञ्भूसहिरुचिवृतिवृधिचरिप्रजनापत्रपेनामिष्णुच् ॥ ७३२ ॥ एभ्यः इष्णुच् भवति तच्छीलादिषु । भ्राजिष्णुः । अलङ्करिष्णुः । भविष्णुः । सहिष्णुः । रोचिष्णुः । वर्त्तिष्णुः । वर्धिष्णुः । चरिष्णुः । प्रजनिष्णुः । त्रपूष् लज्जायां । अपत्रपिष्णुः । इनन्तेभ्यः । धारयिष्णुः ।

मदिपतिपचामुदि ॥ ७३३ ॥ उद्युपपदेभ्य एभ्य इष्णुच् भवति तच्छीलादिषु । उन्मदिष्णुः । उत्पतिष्णुः ।

जिभुवोः ष्णुक् ॥ ७३४ ॥ आभ्यां ष्णुग्भवति तच्छीलादिषु । जिष्णुः । भूष्णुः ।

क्रुधिमण्डिचलिशब्दार्थेभ्यो युः ॥७३५॥ एभ्यो युर्भवति तच्छीलादिषु । कुप क्रुध रुष रोषे । कोपनः । क्रोधनः । रोषणः । एते क्रुध्यर्थाः । मण्ड्यर्थात् । मडि भूषायां । मण्डनः । भूष अलङ्कारे । भूषणः । चल्यर्थात् । चल कम्पने । चलनः । टुवेपृ कम्पे चलने । वेपनः कम्पनः । शब्दार्थात् रवणः भाषणः ।

रुचादेश्च व्यञ्जनादेः ॥ ७३६ ॥ व्यञ्जनादेश्च रुचादेर्गणात् युर्भवति तच्छीलादिषु । रोचनः । लोचनः । वर्त्तनः । वर्द्धनः । दीपनः ।

ततो यातेर्वरः ॥ ७३७ ॥ ततश्चेक्रीयतान्ताद्यातेर्वरो भवति तच्छीलादिषु । यस्यानि इति यलोपश्च । यायावरः ।

कसिपिसिभासीशस्थाप्रमदां च ॥ ७३८ ॥ एषां वरो भवति तच्छीलादिषु ।

घोषवत्योश्च कृति ॥ ७३९ ॥ घोषवति तौ च कृति नेड् भवति । कस्वरः । पेस्वरः । भास्वरः । ईश्वरः । स्थावरः । प्रमद्वरः ।

सनन्ताशंसिभिक्षामुः ॥ ७४० ॥ सनन्तस्याशंसेर्भिक्षेश्च उर्भवति तच्छीलादिषु । बुभूषुः । पिपासुः । बुभुक्षुः । चिकीर्षुः । शंस स्तुतौ च । आशंसुः । भिक्ष याच्ञायां । भिक्षुः ।

उणादयो भूतेऽपि ॥ ७४१ ॥ उणादयः प्रत्यया वर्त्तमाने भूतेऽपि भवन्ति ।

कृवापाजिमिस्वदिसाध्यशूदृषणिजनिचरिचटिभ्य उण् ॥ ७४२ ॥ एभ्यो धातुभ्यः उण् प्रत्ययो भवति णकार इद्वद्भावः । करोतीति कारुः । वा गतिगन्धनयोः । वातीति वायुः । पायुः । जायुः । मिङ् हिंसायां । मायुः । स्वद आस्वादने । स्वादुः । साधू संसिद्धौ साध्यतीति साधुः । अशूङ् व्याप्तौ । अश्नुते

इति अश्रुः । दृकि विदारणे । दृणातीति दारुः । षणु दाने । सनोतीति सानुः । जनिङ् प्रादुर्भावे । जायत इति जानुः । चर गतिभक्षणयोः । चरतीति चारुः । चट विगतौ । चटतीति चाटुः । "सर्वधातुभ्यः । अस्"। मनु ज्ञाने । सृ गतौ । तिज निशाने । रुजो भङ्गे । मनः । सरः । तेजः । रोगः ।

भविष्यति गम्यादयः ॥७४३॥ औणादिका गमीत्येवमादयः भविष्यति भवन्ति भविष्यत्कालवृत्तिभ्यः गमादिभ्यः इनादयः स्युरित्यर्थः ।

गमेरिणि च ॥७४४॥ गम्लृ गतावित्येतस्माद्धातोरिन्णिनौ भवतः । ग्रामं गमिष्यतीति ग्रामंगमी । ग्रामंगामी ।

भवतेश्च ॥ ७४५ ॥ भूसत्तायां इत्येतस्माद्धातोरिन्णिनौ भवतः भविष्यत्काले । भविष्यतीति भवी भावी । इत्यादि सर्वमुणादिषु वेदितव्यम् ।

वुण्तुमौ क्रियायां क्रियार्थायाम् ॥ ७४६ ॥ क्रियायां क्रियार्थायामुपपदे धातोर्वुण् तुमौ भवतः भविष्यदर्थे । वर्तमानात् । पाचको व्रजति पक्तुं व्रजति प्रक्ष्यामि इति व्रजतीत्यर्थः । एवं गन्तुं दातुं पातुं धरितुं तरितुं योक्तुं भोक्तुं स्रष्टुं द्रष्टुं प्रष्टुं ।

सहिवहोरोदवर्णस्य ॥ ७४७ ॥ सहिवहोरवर्णस्य ओत्वं भवति धुटि परे । सोढुं । वोढुं ।

शन्त्रानौ स्यसंहितौ शेषे च ॥ ७४८ ॥ क्रियार्थायां क्रियायामुपपदे भविष्यदर्थे वर्त्तमानाद्धातोः स्येन संहितौ शन्त्रानौ शतृङानशौ भवतः । करिष्यामि इति व्रजति कटं करिष्यन् व्रजति । कटं करिष्यमाणो व्रजति । शेषे च करिष्यतीति करिष्यन् करिष्यमाणः । यक्ष्यन् यक्ष्यमाणः ।

पदरुजविशस्पृशो वा घञ् ॥ ७४९ ॥ एषां घञ् भवति वा । पादः । वेशः । रोगः स्पर्शः । उच समवाये ओकः ।

भावे ॥ ७५० ॥ सर्वस्माद्धातोर्घञ् भवति । पाकः । यागः । योगः । त्यज हानौ । त्यागः । भोगः । भागः । पारः । भावः । इत्यादि ॥

घञीन्धेः ॥७५१॥ इन्धेः पञ्चमस्य लोपो भवति भावकरणयोः विहिते घञि परे । ञिइन्धी दीप्तौ । इन्धनं एधः ॥

रञ्जेर्भावकरणयोः ॥ ७५२ ॥ रञ्जेर्भावकरणविहिते घञि परे पञ्चमो लोप्यो भवति । रञ्ज रागे । रञ्जनं रागः ।

उपसर्गादसुदुर्भ्यां लभेः प्राक्भात्खल्घञोः ॥७५३॥ सुदुर्वर्जितादुपसर्गात्परस्य लभेर्भात् प्राङ् मकारागमो भवति खल्घञोः परतः ।

उपसर्गाणां घञि बहुलम् ॥७५४॥ उपसर्गाणां दीर्घो भवति बहुलं घञि परे । डुलभष् प्राप्तौ । उपलम्भः उपालम्भः । प्रलम्भः प्रालम्भः असुदुर्भ्यामिति किं । सुलभः । दुर्लभः ।

अकर्त्तरि च कारके संज्ञायाम् ॥ ७५५ ॥ कर्तृवर्जिते कारके भावे च संज्ञायां घञ् भवति । दीयते अस्मादिति दायः । चीयतेऽस्मादिति चायः । एवंविघातः । अस-क्षेपणे प्रास्यते अस्मादिति प्रासः । आहारः । विहरन्त्यस्मिन्निति वा विहारः । भुज्यते इति भोगः ।

स्वरवृदृगमिग्रहामल् ॥ ७५६ ॥ स्वरान्ताद्वृदृगमिग्रहिभ्यश्च अल् भवति भावे । भूयते भवनं वा भवः । भयनं । जयनं । भयः । जयः । वरणं वरः । दरणं दरः । गमनं गमः । ग्रहणं ग्रहः ।

ट्वनुबन्धादथुः ॥ ७५७ ॥ ट्वनुबन्धाद्धातोरथुर्भवति भावे । टुवेपृ कम्पि चलने । वेपथुः । कम्पथुः । टुदु उपतापे । दवथुः । टुवेपृ । वेपनं वेपथुः । टुणादि समृद्धौ । नन्दथुः । टुवम् उद्गिरणे । वमथुः । टु ओश्वि गतिवृद्ध्योः । श्वयथुः ।

ड्वनुबन्धात्रिमक्तेन निर्वृत्ते ॥ ७५८ ॥ ड्वनुबन्धाद्धातो-

त्रेर्मग्भवति तेन धात्वर्थेन निर्वृत्ते । पाकेन निर्वृत्तं पक्त्रिमं । एवं कारणेन निर्वृत्तं कृत्रिमं ।

याचिविछिप्रछियजिस्वपिराक्षियतां नङ्॥७५९॥ एभ्यो नङ् भवति भावे । याच्ञा। छ्वोःशूठौ इति शकारः । विश्नः । प्रश्नः। यज्ञः । स्वप्नः । रक्ष्णः । यती प्रयत्ने । प्रयत्नः ।

उपसर्गे दः किः ॥ ७६० ॥ उपसर्गे उपपदे दासंज्ञकात्किर्भवति भावे । आलोपोऽसार्वधातुके इत्याकारलोपः । आदिः । आधिः । व्याधिः । विधिः । सन्धिः । निधिः ।

कर्मण्यधिकरणे च ॥७६१॥ कर्मण्युपपदे दासंज्ञकात्किर्भवति अधिकरणे च । बाला धीयन्तेऽस्मिन्निति बालधिः । एवं जलधिः । वारिधिः । अब्धिः । वार्धिः । अम्भोधिः ।

कर्मव्यतिहारे णच् स्त्रियाम् ॥७६२॥ क्रियाव्यतिहारे वर्त्तमानाद्धातोः भावे णच् भवति स्त्रियां । तत्र न वृद्ध्यागमः किन्तु वृद्धिरादौ सण् इति वृद्धिः । क्रियाव्यतिहारे क्रुश आव्हाने रोदने च । पुनःपुनः व्यवक्रोशनं व्यवक्रोशः । व्यवक्रोश एव व्यावक्रोशी । हसि विहसने । पुनःपुनः व्यवहस्यते व्यवहासः । व्यवहास एव व्यवहासी ।

अभिविधौ भावे इनण् ॥७६३॥ अभिविधिरिति कोऽर्थः । अभिव्याप्तेः साकल्येन क्रियासंबन्ध इत्यर्थः । अभिविधौ गम्यमाने धातोरिनण् भवति भावे स्वार्थे अण् भवति । कुटकौटिल्ये । संकुटनं संकोटिनं । संकोटिनमेव सांकौटिनं वर्त्तते । एवं सांराविणम् । सांहासिनं वर्तते ।

षानुबन्धभिदादिभ्यस्त्वङ् ॥ ७६४ ॥ षानुबन्धेभ्यो भिदादिभ्यश्च भावे अङ् भवति स्त्रियां । क्रप क्रपायां । क्रपसामर्थ्ये । क्रपा । व्यथ दुःखभयचलनयोः।व्यथा । व्यध ताड़ने व्यधा । छिदिर् छिदा । गुहू संवरणे । गुहा । स्पृह ईप्सायां स्पृहा ।

आतश्चोपसर्गे ॥ ७६५ ॥ उपपदे आकारान्ताद्धातोरङ् भवति स्त्रियां । सन्ध्या । संस्था । उपधा । अन्तर्धा ।

रोगाख्यायां वुञ् ॥ ७६६ ॥ रोगाख्यायां धातोर्वुञ् भवति स्त्रियां । प्रवाहिका । प्रच्छर्द्दिका ।

संज्ञायां च ॥ ७६७ ॥ संज्ञायाञ्च धातोर्वुञ् भवति स्त्रियां । भञ्जो आमर्द्दने । उद्दालपुष्पाणि भज्यन्ते यस्या क्रीडायां सा उद्दालपुष्पभञ्जिका । एवं शालपुष्पप्रवाहिका ।

प्रश्नाख्यानयोरिञ्वुञ्चवा ॥७६८॥ प्रश्ने आख्याने अवगम्यमाने धातोरिञ् भवति वुञ्च भवति । वाग्रहणात् यण्वा प्राप्तं च । त्वं कां कारिमकार्षीः कां कारिकां कां क्रियां कां कृत्यां । अहं सर्वां कारिमकार्षं सर्वां कारिकां सर्वां क्रियां सर्वां कृत्यां । एवं त्वं कां कारणामाकार्षीः । त्वं कां पाचिकामपाक्षीः । कां पक्तिं ।

नञ्यन्याक्रोशे ॥ ७६९ ॥ नञ्युपपदे आक्रोशे गम्यमाने धातोरनिर्भवति । अकरणिस्ते वृषल भूयात् । जीव प्राणधारणे । एवमजीवनिः । जन जनने अजननीः । अप्राणनीः ।

युट् ॥७७०॥ नपुंसके भावे युट् भवति । गमनं । हस हसने । हसनं । शयनं । यजनं ।

करणाधिकरणयोश्च ॥ ७७१ ॥ करणेऽधिकरणे च युट् भवति । ओव्रश्चच्छेदने इध्मानि प्रकर्षेण वृश्च्यन्ते अनेन अस्मिन्निति वा इध्मप्रव्रश्चनः । गौः दुह्यते अनयाऽस्यामिति गोदोहनी । शक्तूनि धीयन्ते शक्तुधानी । स्थानं । आसनं । यानं । यजनं ॥

पुंसि संज्ञायां घः ॥ ७७२ ॥ करणाधिकरणयोश्च पुंसि संज्ञायां घो भवति ।

छादेर्घे स्मन्त्रन्क्विप्सु च ॥ ७७३ ॥ छादेः ह्रस्वो

भवति घ इस् मन् त्रन् क्विप् एषु परतः। छद षट संवरणे। उरः छाद्यते अनेनेति उरश्छदः । एवं दन्तच्छदः ।

अर्चिशुचिरुचिहुसृपिछादिछर्दिभ्य इस् ॥७७४॥ एभ्य इस् भवति । अर्चिः । शोचिः । रोचिः । हविः । सर्पिः । छदिः । छर्द वमने । छर्दिः ।

सर्वधातुभ्यो मन् ॥ ७७५ ॥ छद्म ।

छदिगमिपदिनीभ्यस्त्रन् ॥ ७७६ ॥ एभ्यः परः त्रन् प्रत्ययो भवति । छाद्यते अनेनेति छत्रं । क्विप् । तनुछत् । कुर्वन्ति अनेनेति करः । शृण्वन्त्यनेनेति श्रवः । लीङ् श्लेषणे। लीयन्ते अस्मिन्निति लयः ।

ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् ॥७७७॥ कृच्छ्रं दुःखं दुरोऽर्थः । अकृच्छ्रं सुखं सोरर्थः । एषूपपदेषु कृच्छ्रार्थेषु खल् भवति भावे कर्मणि कर्त्तरि च । ईषदप्रयासेन क्रियत इति ईषत्करः कटो भवता। दुष्करः। सुकरः । ईषद्बोधं काव्यं । दुर्बोधं व्याकरणं। सुबोधं अध्यात्मं ।

कर्तृकर्मणोश्च भूकृञोः ॥ ७७८ ॥ ईषदादिषूपपदेषु आभ्यां कर्त्तृकर्मणोः खल् भवति । ईषदाढ्यस्य भवनं ईषदाढ्यंभवं । भवता दुराढ्यंभवं । भवता स्वाढ्यंभवं । ईषदाढ्यः क्रियते ईषदाढ्यंकरो भवान् । दुराढ्यङ्करः । स्वाढ्यंकरः ॥

आद्भ्यो युवदरिद्रातेः ॥ ७७९ ॥ ईषदादिषूपपदेषु आकारान्तेभ्यो युर्भवति अदरिद्रातेः ॥ ईषत्पानः सोमो भवता । दुष्पानः । सुपानः । ईषद्यानः । दुर्यानः । सुयानः । ईषद्दाना । दुर्दाना । सुदाना ।

अलंखल्वोः प्रतिषेधयोः क्त्वा वा ॥ ७७८ ॥ अलं खलु शब्दयोः प्रतिषेधार्थयोरुपपदयोर्धातोः क्त्वा वा भवति ।

सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमम्
॥ अहार्यत्वादनर्घ्यत्वादक्षयत्वाच्च सर्वदा
सङ्गमयति विद्यैव नीचगापि नरं सरित्
समुद्रमिव दुर्धर्षं नृपं भाग्यमतः परम्

विनयाद्याति पात्रताम्

अलंकृत्वा गच्छति । खलुकृत्वा । अलंभुक्त्वा । खलुभुक्त्वा । अलङ्करणेन । खलुकरणेन । अलं भोजनेन । खलुभोजनेन ।

तुम् सन्ध्यक्षरान्तोऽव्ययं ॥७८१॥ क्त्वामकारसन्ध्यक्षरान्ताश्च कृतुसंभवा अव्ययानि भवन्ति । अव्ययाच्चेति विभक्तीनां लुक् ॥

एककर्तृकयोः पूर्वकाले ॥ ७८२ ॥ एककर्त्तृकयोर्धात्वर्थयोर्मध्ये पूर्वक्रियाकाले वर्त्तमानाद्धातोः क्त्वा भवति । भुक्त्वा व्रजति । स्नात्वा भुङ्क्ते । गत्वा गृह्णाति ।

गुणीक्त्वासेड्रुदादिक्षुधक्लिशकुशकुषगृधमृडमृदवदवसग्रहां ॥ ७८३ ॥ अरुदादिक्षुधादीनां च क्त्वा सेड्गुणी भवति ।

उदनुबन्धपूक्लिशां क्त्वि ॥ ७८४ ॥ उदनुबन्धात्पूञः क्लिशश्च इड् वा भवति क्त्वाप्रत्यये परे । देवनं पूर्वं पश्चात्किंचिदिति देवित्वा द्यूत्वा । वृधु । वर्धनं पूर्वं पश्चात्किंचिदिति वर्धित्वा वृध्वा । स्रंसु भ्रंसु अवस्रंसने । स्रंसित्वा । स्रस्त्वा । भ्रंसित्वा । भ्रस्त्वा । पवित्वा । पूत्वा । क्लेशित्वा । क्लिष्ट्वा ।

व्यञ्जनादेर्व्युपधस्यावो वा ॥ ७८५ ॥ उश्च इश्च वी वी उपधे यस्यासौ व्युपधः व्यञ्जनादेरुकार इकारोपधस्यावकारान्तस्य धातोः क्त्वा सेट् गुणी भवति । द्योतित्वा द्युतित्वा । लेखित्वा लिखित्वा ।

तृषिमृषिकृषिवञ्चिलुञ्च्यृतां च ॥ ७८६ ॥ एषां क्त्वा सेट् गुणीभवति वा । ञितृषा पिपासायां । तर्षित्वा तृषित्वा । मृष सहने च । मर्षित्वा मृषित्वा । कृष विलेखने । कर्षित्वा कृषित्वा । वञ्च प्रलंभने । वञ्चित्वा । लुञ्चु अपनयने । लुञ्चित्वा । ऋत इति सौत्रो धातुः । अर्तित्वा ऋतित्वा ।

थफान्तानां चानुषङ्गिणां ॥७८७॥ थान्तानां फान्तानां

चानुषङ्गिणां त्का सेट् गुणीभवति वा । श्रन्थग्रन्थ सन्दर्भे । श्रन्थित्वा ग्रन्थित्वा । श्रथित्वा ग्रथित्वा । गुफ गुम्फ इभी ग्रन्थे । गुम्फित्वा । गुफित्वा ।

जान्तनशामनिटां ॥७८८॥ जान्तनशामनिटां चानुषङ्गिणां क्त्वा गुणीभवति वा । षञ्ज सङ्गे । संक्त्वा सक्त्वा । रञ्ज रागे । रक्त्वा । रंक्त्वा । भञ्जो आमर्द्दने । भंक्त्वा भक्त्वा । ष्वञ्ज परिष्वङ्गे । स्वंक्त्वा स्वक्त्वा ।

मस्जिनशोर्धुटि ॥ ७८९ ॥ मस्जिनशोः स्वरात्परो नकारागमो भवति धुटि परे । टुमस्जो शुद्धौ । मंक्त्वा मक्त्वा । णश अदर्शने । नंष्ट्वा नष्ट्वा । रुदादिभ्यश्च इड् वा भवति । नशित्वा ।

इज्जहातेः क्त्वि ॥७९०॥ जहातेरिद् भवति क्त्वा प्रत्यये । हित्वा ।

समासे भाविन्यनञः क्त्वोयप् ॥ ७९१ ॥ अनञः क्त्वान्तेन समासे भाविनि क्त्वाप्रत्ययस्य यपादेशो भवति । अभिभूय । अभिभवनं पूर्वं पश्चात्किंचिदिति । अभिभूयास्थितं । विजित्य । प्रस्तुत्य । अधीत्य । उपेत्य ।

मीनात्यादिदादीनामाः ॥ ७९२ ॥ मीनातिमिनोति दीङ्दांदामागायति पिबति स्थास्यति जहातीनामाकारो भवति यपि परे । मीङ् हिंसायां । प्रमाय । डुमिङ् प्रक्षेपणे । परिमाय । दीङ् क्षये । दीङ् अनादरे । प्रदाय । दामादीनामी बाधनार्थं । आदाय । निमाय । प्रगाय । प्रपाय । प्रस्थाय । अवसाय । विहाय ।

यपि च ॥ ७९३ ॥ वनतितनोत्यादिप्रतिषिद्धेटां पञ्चमो लोप्यो भवति आतश्च अद्भवति, यथासम्भवं धुट्यगुणे यपि च परे । प्रवत्य प्रतत्य प्रमत्य प्रहत्य ।

वा मः ॥७९४॥ प्रतिषिद्धेटां मकारो लोप्यो भवति वा यपि च परे । प्रणत्य प्रणम्य आगत्य आगम्य ।

ये वा ॥ ७९५ ॥ खनि वनि सनि जनामन्तस्य आकारो भवति यकारे वा । खन खनने । प्रखाय प्रखन्य । प्रवाय प्रवन्य । षणु दाने । प्रसाय । प्रसन्य । जनीप्रादुर्भावे । प्रजाय प्रजन्य ।

लघुपूर्वो यपि ॥ ७९६ ॥ लघुपूर्व इन् अय् भवति यपि च परे । प्रशमय्य प्रगमय्य । गण् संख्याने विगणय्य ।

णमूचाभीक्ष्ण्ये द्विश्च पदं ॥७९७॥ एककर्त्तृकयोः पूर्वकाले वर्त्तमानाद्धातोर्णम् क्त्वा च आभीक्ष्ण्ये पदं च द्विर्भवति । भोजं भोजं व्रजति । भुक्त्वा भुक्त्वा व्रजति । पाचं पाचं भुङ्क्ते । पक्त्वा पक्त्वा भुङ्क्ते । दायं दायं तुष्यति । दत्वा दत्वा तुष्यति । पायं पायं तृप्यति । पीत्वा पीत्वा तृप्यति ।

कर्मण्याक्रोशे कृञः खमिञ् ॥ ७९८ ॥ कर्मण्युपपदे कृञः खमिञ् भवति आक्रोशे गम्यमाने । चौरंकारमाक्रोशति । अधःकारं निरीक्ष्यते । बधिरंकारं शृणोति । पङ्गुकारं गच्छति ।

यावति विन्दजीवोः ॥ ८९९ ॥ यावदित्यस्य निर्दिष्टवाची यावदित्युपपदे विन्दतेर्जीवतेश्च णम् भवति । यावद्वेदं भुङ्क्ते । यावन्तं लभते तावन्तं भुङ्क्ते इत्यर्थः । यावज्जीवमधीते । यावन्तं जीवति तावन्तं अधीते इत्यर्थः ।

कर्म्मणि चोपमाने ॥ ८०० ॥ उपमाने कर्त्तरि कर्मणि चोपपदे धातोर्णम् भवति । चूड़क इव नष्टः चूड़कनाशं नष्टः । गुरुरिव अभवत् गुरुभावमभवत् । रत्नमिव निहितं रत्ननिधायं निहितं ।

निमूलसमूलयोः कषः ॥ ८०१ ॥ निमूलसमूलयोः कर्मणोरुपपदयोः कषतेर्णम् भवति । निमूलकाषं कषति निमूलं कषतीत्यर्थः । समूलकाषं कषति समूलं कषतीत्यर्थः । अभ्रकाषं कषति अभ्रंकषतीत्यर्थः । ओदनमिव पक्वः ओदनपाकं पक्व इत्यादि प्रयोगादनुसर्त्तव्यम् ।

स्त्रियां क्तिः ॥८०२॥ धातोर्भावे क्तिर्भवति स्त्रियां । घोषवत्योश्च कृतीति नेट् । भूयते भवनं वा भूतिः । नवनं नुतिः । स्तवनं स्तु-

तिः । वर्धनं वृद्धिः । धारणं धृतिः । वर्त्तनं वृत्तिः । यजनं इष्टिः । श्रुविश्रवणे श्रवणं श्रुतिः । बुध अवगमने बोधनं बुद्धिः । कारणं कृतिः भ्रमु अवस्थाने भ्रमणं पञ्चमोपधाया धुटि चागुणे इति उपधाया दीर्घः भ्रान्तिः ।

भ्रूल्वादिभ्योऽपृणातेः क्तेः ॥ ८०३ ॥ पृणाति वर्जितादृकारान्ताल्ल्वादिभ्यश्च परस्य क्तेर्न्नकारो भवति । कृविक्षेपे करणं कीर्यते इति वा कीर्णः । गरणं गीर्णिः ॥ लवनं लूनीः । पृणातेस्तु उरोष्टचोपधस्य च पृपालनपूरणयोः परणं पूर्त्तिः । मरणं मूर्त्तिः ।

ह्राज्याग्लाभ्यश्च ॥ ८०४ ॥ एभ्यो धातुभ्यश्च परस्य क्तेः नकारो भवति स्त्रियां । ओहाक्त्यागे हानं हानिः । ज्यावयो हानौ ज्यानं ज्यानिः । ग्लानं ग्लानिः

संपदादिभ्यः क्विप् ॥ ८०५ ॥ संपदादिभ्यः क्विप् भवति भावे स्त्रियां ॥ पदगतौ संपद्यते संपदनं वा संपत् । षद्लृविशरणगत्यवसादनेषु ॥ संसदनं संसत् । परिषदनं परिषत् ।

व्रजयजोःक्यप् ॥ ८०६ ॥ आभ्यां भावे स्त्रियां क्यब्भवति । व्रज्गतौ प्रव्रजनं प्रव्रज्या । इज्या ।

श च ॥८०७॥ कृञः भावे शो भवति क्यप् क्तिश्च स्त्रियां । क्रीयते करणं वा यणाशिषोर्ये इति इकारागमः क्रिया धातोस्तोन्तः पानुबन्धे कृत्या कृतिः ।

शंसिप्रत्ययादः ॥ ८०८ ॥ शंसेः प्रत्ययान्ताद्धातोर्भावे अप्रत्ययो भवति स्त्रियां । शंसुविस्तुतौ प्रशंसनं प्रशस्यते इति वा । प्रशंसा प्रत्ययान्तात् बुभूषणं बुभूष्यत इति वा बुभूषा । वचपरिभाषणे विवक्षणं विवक्षा । विधित्सनं विधित्सा । पिपतिषणं पिपतिषा । पिपासनं पिपासा । बोभूयनं बोभूया । कण्डूञ् गात्र विकर्षणे स्वार्थे यण् कण्ड्वादेर्यण् कण्डूयनं कण्डूया ।

गुरोश्चनिष्ठायां सेटः ॥ ८०९ ॥ निष्ठायां सेटः गुरुमतो

धातोरप्रत्ययो भवति स्त्रियां । ईह चेष्टायां ईहनं ईह्यत इति वा ईहा। ईक्षदर्शने ईक्षणं ईक्षा । एवं सर्वमवगन्तव्यम् ।

श्लोकः ।

भावसेनत्रिविद्येन वादि पर्वतवज्रिणा ॥
कृतायां रूपमालायां कृदन्तः परिपूर्यते ॥ १ ॥

श्लोकः ।

मन्दबुद्धिप्रबोधार्थं भावसेनमुनीश्वरः ॥
कातन्त्ररूपमालाख्यां वृत्तिं व्यररचत्सुधीः ॥ १ ॥

शार्दूलविक्रीडितम् ।

क्षीणेऽनुग्रहकारिता समजने सौजन्यमात्माधिके
सन्मानं नुतभावसेनमुनिपे त्रैविद्यदेवे मयि ॥
सिद्धान्तोऽयमथापि यः स्वधिषणा गर्वोद्धतः केवलम्
संस्पर्द्धेत तदीयगर्वकुहरे वज्रायते मद्वचः ॥ २ ॥

इतिरूपमालाप्रक्रिया समाप्ता ।

मुकुरविमलगण्डं चन्द्रसङ्काशतुण्डं
गजकरभुजदण्डं कामदाहाग्निकुण्डं ॥
विनुतमुनिपखण्डं गोमटेशप्रचण्डं
गुणनिवहकरण्डं नौमि नाभेयपिण्डम् ॥१॥

महामूर्तिश्शान्तेर्निखिलमहसां शाश्वतपदश्शरच्चन्द्र ज्योत्सनाप्रकृतिविकृतिः कञ्जवदनः ॥ ज्वलच्छुक्लध्यानस्फुरद्मलशुक्लाह्वयमहालेश्याद्रव्याकारः स जयति गिरौ गोमठजिनः ॥ १ ॥ कलाकेलिः कान्तेर्विमलतरसौन्दर्यनिलयोमहापुण्यैर्दृश्यस्त्रिदशपतिपूज्याङ्घ्रिकमलः । लसन्निर्वाणश्रीघनतरपरीरंभविसरन्महायोगानन्दः स जयति गिरौ गोमठजिनः ॥२॥ लतादंभान्मूर्तिर्ललितभुजसंवेष्टिततनुः महानन्दात्किञ्चिन्मुकुलितविशालाक्षियुगलः ॥ लसत्कायोत्सर्गव्यतिकरसुखान्निश्चलवपुःसुराधीशाराध्यः स जयति गिरौ गोमठजिनः ॥ ३ ॥

अस्य ग्रन्थस्य शोधनपत्रम् ।

पृष्ठम्	पङ्क्तिः	अशुद्धिः	शुद्धिः
५	११	मातृ ऋकारेण	मातृ ॠकारेण
८	२		उपैलकीयति
९	१३	गोश्वौ	गोऽश्वौ
१३	३	नवाग्रहणेन ऌानुनासिके प्वपीच्छन्त्यन्ये (७२)	ऌानुनासिकेप्वपी-च्छन्त्यन्ये (७२)
१३	५	तश्श्मशानम्....	तच्छमशानम्
१४	१७	एवासत् पुरुषवत्	एव सत् पुरुषवत्
२२	२३	रपृवर्णेभ्यो नोणमन्त्यः	रषृवर्णेभ्यो नोणमनन्त्यः।
२८	१०	सख्युरन्तोनुर्भवति	सख्युरन्तोऽनुर्भवति
२९	२१	ईकारान्त	ईकारान्तः
२९	२४	अघुट्	अघुट्
३६	९	आदेशा	आदेशौ
३६	१०	प्राप्नुवतः	प्राप्नुतः
४१	८	भवति । संबुद्धौ	भवति संबुद्धौ
४७	२[illegible]	अदद्यञ्चु	अदद्यञ्च्
५७	१४	अनड्वाहन् हिवन्सी	अनड्वाह् नहि वन्सी
६७	१७	अव्	अव
७२	१८	सोर्यगुणैः	शौर्यगुणैः
७६	९	वृंस्	वंस्
८६	१७	सर्पिका	सर्पिःका
९९	१२	पर	परा
१०५	३	सावधातु	सार्वधातु
१०७	१७	यणू	यण्
११६	१०	अदोद्र	अदोऽद्र
१२०	२२	आदीधीयाथाम्	आदीध्याथाम्
१२५	२२	बिभ्रताम्	बिभ्राताम्

पृष्ठः	पङ्क्तिः	अशुद्धिः		शुद्धिः
१३४	३	अमनुथा	....	अमनुथाः
१४२	६	घुटि गुण	....	धुटि गुण
१४२	८	घुटि परे	....	धुटि परे
१४२	९	घुट्यन्ते	....	धुट्यन्ते
१४४	७	समस्थिषथाम्	....	समस्थिषाताम्
१४४	९	अदेविष्ठांः	....	अदेविष्टाम्
१४६	७	ऋधि	....	क्रुधि
१४६	७	वुध्यति	....	वुध्यति
१४८	६	पटुकरोति....	....	पटुं करोति
१५८	४	ऋच्छरुतः	....	ऋच्छऋतः
१६९	२	घुटि	....	धुटि
१७१	६	श्रंसते	....	स्रंसते
१७१	६	सनीसस्रस्यते	....	सनीस्रस्यते
१७३	२२	नानंति नानंतः	....	नानंत्ति नानंत्तः
१८५	४	त्रैविद्येन	....	त्रिविद्येन
१९०	७	ध्यण्	....	ड्यण्
१९१	२	आङ्पूवात्	....	आङ्पूर्वात्
१९४	१७	ण्युङ्	....	ण्युट्
१९६	२१	खशथः	....	खशयः
१९९	२१	क्षमप्रिय	....	क्षेमप्रिय
२०२	२६	प्रष्ठोही	....	प्रष्ठौही